श्चादघंनशत् भद्रंभवातिनःपुरः इंद्रआशाभ्यस्परिसर्वाभ्योअभयंकरत् जेताशत्रून्वि

Indira Gandhi National
Centre for the Arts

चर्षणीः त्रिष्टुब्देवेति समर्चस्य सूक्तस्य वसिष्ठ ऋषिः आद्यानां तिसृणामग्निश्चतुर्णां
विश्वेदेवा गायत्री धितीयानुष्टुप् तिसृणां गायत्र्यौ त्यैद्व अनुष्टुभौ अभिषेके त्रिष्टुब्देव
सवितर्वरिष्ठे सोमः धामभिः अग्ने दक्षैः पुनीहि नः पुनंतु मा देवजनाः पुनंतु वस
वो धिया विश्वेदेवाः पुनीत मा जातवेदः पुनीहि मा प्यायस्व प्रस्यंदस्व सोम विश्वे
भिरंशुभिः देवेभ्य उत्तमं हविः उप प्रियं पनिप्नतं युवानमाहुतीवृधं अगन्म बिभ्रतो न
मः अलाय्यस्य परशुर्ननाश तमा पवस्व देव सोम आखुं चिदेव देव सोम यः पावमा
नीरध्येत्यृषिभिः संभृतं रसं सर्वं स पूतमश्नाति स्वदितं मातरिश्वना पावमानीर्यो अ
ध्येत्यृषिभिः संभृतं रसं तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकं त्र्यंबकेण वञ्चनेति ॥३२॥

मर्गीइन्द्रो वृद्हति अग्निः त्र्यंबकेण वञ्चन इन्द्रो अर्वागिदं वचः सत्राच्या मघवा सोमपी
तये धिया शविष्ठ आ गमत् स्वस्तिदा विशांपतिर् इन्द्रोनुष्टुप् अग्निः स्वस्तिदा विशस्पतिर्वृ
त्रहा विमृधो वशी वृषेन्द्रः पुर एतु नः सोमपा अभयंकरः त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप्
अग्निः त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मा
मृतात् जातवेदसे कश्यपो दुर्गा त्रिष्टुप् अग्निः जातवेदसे सुनवाम सोममरातीय
तो निदहाति वेदः स नः पर्षदति दुर्गाणि विश्वा नावेव सिंधुं दुरितात्यग्निः सलिलस्य मध्यात्पुर समुद्रज्येष्ठा
नाना यंत्यनिविशमानाः इन्द्रो या वज्री वृषभो रराद ता आपो देवीरिह मामवंतु याआ
पो दिव्या उत वा स्रवंति खनित्रिमा उत वा याः स्वयंजाः समुद्रार्था याः शुचयः पावका

Indira Gandhi National Centre for the Arts

स्ता॰ यासांराजावरुणोयातिमध्येसत्यानृते अवपश्यंजनानां मधुश्चुतःशुचयोयाःपा
वकास्ता॰ यासुराजावरुणोयासुसोमोविश्वेदेवायासूर्जंमदंति वैश्वानरोयास्वग्निः
प्रविष्टस्ता॰ त्रायंतामितितिसृणांसप्तर्षयआपोनुष्टुप्‌आभि॰ त्रायंतामिहदेवास्त्राय
तांमरुतांगणः त्रायंतांविश्वाभूतानियथायमरपाअसत् इमाआपइतितिसृणांस
प्तऋषयआपोनुष्टुप् आभि॰ इमाआपःशिवतमाइमाःसर्वस्यभेषजीः इमाराष्ट्रस्यव
र्धनीरिमाराष्ट्रभृतोमृताः याभिरिंद्रमभ्यषिंचत्प्रजापतिःसोमंराजानंवरुणंयमंमनुं ता
भिरद्भिरभिषिंचामित्वामहंराज्ञांत्वमधिराजोभवेह महांतंत्वामहीनांसम्राजंचर्षणीनां राम:
देवीजनित्र्यजीजनद्भद्राजनित्र्यजीजनत् देवस्यत्वा॰ हस्ताभ्यांसरस्वत्यैभैषज्येन ३३
वीर्यायान्नाद्यायाभिषिंचामि॰अग्नेर्भैषज्येन।१

तेजसेब्रह्मवर्चसायाभिषिंचामि तमीशानंगोतमइशानोजगती आभि॰ तमीशानंजग त
तस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहेवयं पूषानोयथावेदसामसद्वृधेरक्षितापायुर
व् दब्धःस्वस्तये त्वमग्नेरुद्रोअसुरोमहोदिवस्त्वंशर्धोमारुतंपृक्षईशिषे त्वंवातैररुणैर्या
सिशंगयस्त्वंपूषाविधतःपासिनुत्मनातमुष्टुत्यांगिरसस्तिरश्चिरुद्रस्त्रिष्टुप् आभि॰ तमु
ष्टुहियःस्विषुःसुधन्वायोविश्वस्यक्षयतिभेषजस्य यक्ष्वामहेसौमनसायरुद्रंनमोभि
र्देवमसुरंदुवस्य भुवनस्यपितरंऋजिश्वारुद्रस्त्रिष्टुप्आभि॰ भुवनस्यपितरंगीर्भिराभी
रुद्रंदिवावर्धयारुद्रमक्तौ बृहंतमृष्वमजरंसुषुम्नमृधग्घुवेमकविनेषितासः यातेरु
द्रइतिकश्यपोरुद्रस्यभेषजस्वराडनुष्टुप् आभि॰ यातेरुद्रशिवातनूःशिवाविश्वाहभेषजी

hi National Centre for the Arts

शिवाऽऽरुद्रस्यमेषजीतयानो मडजीवसे यज्जाग्रतइतिषण्णांप्रजापतिर्मनस्त्रिष्टुप् ऋषि॰ या
जाग्रतोदूरमुदैतुदैवंतदुसुप्तस्यतथैवैति दूरंगमंज्योतिषांज्योतिरेकंतन्मेमनःशिवसंक
ल्पमस्तु येनकर्माण्यपसोमनीषिणोयज्ञेकृण्वंतिविदथेषुधीराः यदपूर्वंयक्षमंतःप्रजा
नांतन्मे॰ यत्प्रज्ञानमुतचेतोधृतिश्चयज्ज्योतिरंतरमृतंप्रजासु यस्मान्नऋतेकिंचनकर्मक्रि
यतेतन्मे॰ येनेदंभूतंभुवनंभविष्यत्परिगृहीतममृतेनसर्वं येनयज्ञस्तायतेसप्तहोता
तन्मे॰ यस्मिन्नृचःसाम यजूंषियस्मिन्प्रतिष्ठितारथनाभाविवाराः यस्मिंश्चित्तंसर्व
र्वमोतंप्रजानांतन्मे॰ सुषारथिरश्वानिवयंमनुष्यान्नेनीयतेभीशुभिर्वाजिनइव हृत्प्र
तिष्ठंयदजिरंयविष्ठंतन्मे॰ इंद्रत्वावृषभमितिपंचानांविश्वामित्रइंद्रोगायत्री ऋषि॰इंद्रत्वावृ राम: ३४

षभं [illegible] वयंसुतेसोमेहवामहे सपाहिमध्वोअंधसः इंद्रक्रतुवि
दंसुतंसोमंहर्य पुरुष्टुत पिबावृषस्वतातृपिं इंद्रप्रणोधितावानंयज्ञंविश्वेभिर्देवेभिः ति
रस्तवानविश्पते इंद्रसोमाःसुताइमेतवप्रयंतिसत्पते क्षयंचंद्रासइंदवः दधिष्वाजठरेसुतंसो
ममिंद्रवरेण्यं तवद्युक्षासइंदवः सुरास्त्वाभिषिंचंत्वित्यादि पौराणमंत्राः तद्वंयोरावृणी
महे॰ ततःकलशोदकेनान्येनचजलेनतैलाभ्यंगसर्वौषध्यनुलेपनपूर्वकंसुस्नातौदंपतीश्च
वैककालिनवाससीपरित्यज्यअहतशुक्लवासांसिपरिधायश्वेतचंदनपुष्पमालधारणं
कुर्यात् कृत्वाआचार्यादीनांचरणक्षालनगंधाद्यैःपूजयित्वाचार्यायधेनुंदद्यात्
तदभावेतन्मूल्यनिष्क्रयंरुद्रजापिनेभ्योहंसदक्षिणांतन्मूल्यनिष्क्रयंवा ऋत्विग्भ्योयथाशक्ति

Indira Gandhi National Centre for the Arts

हेमंतन्निष्क्रयं वा दद्यात् ततो भुवनेश्वर्यादीनां आदित्यादीनां वरुणस्य चाचार्येणोत्तरपूज
नेकृते तद्धस्तेनैवोत्तिष्ठ ब्रह्मणस्पत इत्यादि विसर्जने जाते सोपस्कर प्रतिमास्तद्धस्ते प्रति
पाद्याग्निपूजां तेगाच्छगच्छेत्यग्निं विसृज्य कर्मांगदेवताप्रीत्यर्थं ब्राह्मणभोजनं संकल्प भूयसीं
दक्षिणां च संकल्प्य शांतिसूक्तपाठं कारयित्वा कर्मफलं मस्त्विति वाचयित्वा परमेश्वरार्पणं कु
र्यात् इति कौस्तुभे दुष्टरजोदर्शनशांतिः अयं च शौनकोक्तप्रकारो बह्वृचानां अन्येषां
प्रकारांतरं मदनरत्ने ऋषिपुत्रसंहितायां प्रथमार्त्तवदोषाणां शांतिं कुर्यादनंतरं तिथि
नक्षत्रवारादौ तीरे तडाके वाथ चत्वरे मंडलं कारयेत्तत्र गोमयेन द्विहस्तकं स्थंडिलं का राम:
रयेत्तत्र चतुर्द्रोणकशालिभिः आढकं तंदुलं चैव आढकौ तिलयावकौ उपर्युपरि संस्तीर्णे ३५

तन्मध्येन लिंगं लिखेत् दर्भैराच्छादयेत् मध्ये कर्णिकायां न्यसेद्घटं सस्त्रं सपिधानं च सक
ंचैवस्त्रवेष्टितं पुण्योदकेन संपूर्णं औषधादिसमन्वितं सहदेव्येकपत्री च विष्णुक्रांता
समभद्रिका बिल्वपत्रं सहितानि चूर्णयित्वा न्यसेद्घटं कुष्ठं मांसी हरिद्रे द्वे मुराशैलेयचंद
नं वचा कचोरमुस्ताख्याः सर्वौषध्यः प्रकीर्तिताः गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगो
कुलात् राजद्वारप्रदेशाच्च मृदमानीय निक्षिपेत् पंचगव्यं च कुमदं तत्र शुक्तिफलानि च
वज्रवैडूर्यमाणिक्यविद्रुमाणि विनिक्षिपेत् एवं कुंभं समासाद्य गंधपुष्पादिभिः शुभैः
अनुष्ठानपरो विप्रः प्राङ्मुखो वाप्युदङ्मुखः एवं प्रदोषकाले तु कारयेदपरेऽहनि उद
येऽसमनुप्राप्ते स्नातां गंधाद्यलंकृतां स्नापयेच्छांतिमन्विच्छन्स्वर्धिप्राङ्मुखीतां अधिवा

Indira Gandhi National Centre for the Arts

सितकुंभस्य तोयैश्चापि समंत्रकं पश्चाच्छेषोदकेनैव स्नात्वा देवप्रणम्य च स्वगृह्योक्तविधाने
न होमं कुर्यात्प्रयत्नतः दूर्वाज्येन तिलैर्हुत्वा सावित्र्या चैव मंत्रतः अष्टोत्तरसहस्रं वाष्टशतमष्टा
धिकं तथा तत्संख्यां त्रिविधीनां नारी सर्वदोषात्प्रमुच्यते इति कौस्तुभे मदनरत्नोक्ता शांतिः
बौधायनोक्ता शांतिः ऋतुशांतिं व्याख्यास्यामः तिथिवारनक्षत्रलग्नदोषशांत्यर्थं चतुर्थी
ह्नि पंचमे ह्निवा शांतिस्नानं प्रकुर्वीत तस्यादि सूत्रोक्ता द्रष्टव्या अथ गर्भाधानं कश्यपः षष्ठ्य
ष्टमी पंचदशी चतुर्थी चतुर्दशीमप्युभयत्र हित्वा शेषाः शुभाः स्युस्तिथयो निषेके वाराः
शशांकार्यसितेंदुजानामिति वसिष्ठः उपप्लवे वैधृतिपातयोश्च विष्ट्यां दिवा परिघस्य च रामः
पूर्वभागे संध्यासु पूर्वस्वपि मातृपित्रोर्मृतेह्नि पत्नीगमनं च वर्ज्यमिति पारिजाते विष्णुप्र ३६

श्रविमित्रसमीपौष्णमूलोत्तरावरुणभानि निषेककाले पूज्यानि पुष्यवसुशीतकरा
श्विचित्रादित्याश्च मध्यमफला विफलास्तुरन्य इति विष्णुपुराणे यस्मिन्नृक्षे भवेद्गर्भस्तस्मा
द्यद्दशमे भवेत् तत्रापत्यं प्रजायेत तस्मादेतत्त्रयं त्यजेदिति त्रयं मघा रेवती ज्येष्ठा षोडश
रात्रिमध्ये चंद्रताराऽनुकूल्ये सर्वथाऽकृतादेव सालाभे चतुर्थादिनिश्चये सति तच्चैव कार्यं शां
तिश्चेत्सापि तस्मिन्नेवाह्नि कार्या अथ पुनःसंधानं तत्र द्वादशरात्रात्पूर्वमग्निनाशे स्थं
डिलाद्यग्निप्रतिष्ठापनांतं कृत्वा अयाश्चेत्यादि हुत्वोत्पाद्याग्निः तत्र कार्यः तदूर्ध्वं प्रमादा
दग्नित्यागे प्रत्यब्दं प्राजापत्यं एतावत्कालपर्यंतं गत्वाग्निविच्छेदजनितदोषपरिहारस्या
राध्नीपरमेश्वरप्रीत्यर्थं एतावतः कृच्छ्रानेन तत्प्रत्याम्नायद्वाराचरिष्य इति संकल्प्य तथैवा

Indira Gandhi National Centre for the Arts

चरेत् ततएतावद्दिनेषुगमत्ताग्निविच्छेदवशेनलुप्तसायंप्रातरौपासनहोमादिनित्यकर्मप
र्याप्तंहोमद्रव्यंतन्निष्क्रयंवादातुमहमुत्सृज्ये इतिसंकल्प्यपूर्ववद्दत्वापुनःसंधानंकुर्यात्
तद्यथा देशकालौसंकीर्त्यपरमेश्वरप्रीत्यर्थंविच्छिन्नस्य॥ग्नेःपुनःसंधानंकरिष्यइतिसंक
ल्प्याग्निप्रतिष्ठापनांतंकृत्वाग्निध्यानान्तेन्वाधानंकुर्यात् अस्मिन्नन्वाहिताग्नावित्याद्या
धारदेवतेआज्येनेत्यंतमुक्त्वा॥त्रप्रधानंत्रिरग्निंपवमानंअग्निंप्रजापतिंचाज्येनअर्य
मणमग्निंवरुणमग्निंपूषणमग्निंप्रजापतिंचलाजद्रव्येणचतुर्वारंस्वर्पासाविन्नीमा
ज्येनशेषेणस्विष्टकृतमित्यादिपात्रासादनेप्रोक्षणपादिषणांपत्न्यंजलौन्यंस्तुमवेस्या रामः
सादनंशूर्पस्यचसर्वेषांप्रोक्षणांतेआज्यसंस्कारः तेनसहलाजानांत्रिःपर्यग्निकरणंआ ३२

ज्यस्योत्पवनं लाजानांत्रिःप्रोक्षणं स्रुवांजलिश्चूर्पसंमार्गोतिलाजानांआज्यस्यदक्षिणतोवर्हि
ष्यासादनं आघारांते अग्नआयूंषीतितिसृणांदातेवै॥खानसाऋषयः अग्निःपवमानोदेवा
ता गायत्रीछंदः पुनःसंधानप्रधानआज्यहोमेवि॰ अग्नयेपवमानायेदं त्वमर्यमावसुश्रु
तोग्निस्त्रिष्टुप् पुनःसंधानप्र॰ त्वमर्यमाभवसियत्कनीनांनामस्वधावन्गुह्यंबिभर्षि अंजंति
मित्रंसुधितंनगोभिर्यद्दंपतीसमनसाकृणोषिस्वाहा अग्नयइदं प्रजापतेहिर ण्यगर्भः प्र
जापतिस्त्रिष्टुप् पुनःसं॰ प्रजापतेनत्वदेतान्यन्यो विश्वाजातानिपरिताबभूव यत्कामास्तेजु
हुमस्तंनोअस्तुवयंस्यामपतयोरयीणांस्वाहा प्रजापतयइदं॰ प्रत्पालितेपत्न्यंजलौस्रुवे
णोपस्तीर्यस्वयमेवलाजानांद्विरवदायपंचावत्तीचेत्त्रिरवदायस्रुवेणशूर्पस्यानभिधार्य

Indira Gandhi National Centre for the Arts

अवताऽभिघार्य स्वपमुपविष्ट एव तिष्ठंत्या अंजलिं दक्षिणेन पाणिना धृत्वा स्वाहाकारांते ज

ल्पमग्ने एजुहु यात अर्यमणं वरुणं पूषणमिति तिसृणां हिरण्यगर्भोऽर्यमाग्निर्वरुणाग्निः

पूषाग्निरनुष्टुप् पुनः सं. लाजहो. अर्यमणं नु देवं कन्या अग्निमयक्षत स इमां देवोऽर्यमा प्रेतो

मुंचातु नामुतः स्वाहा अर्यम्णोऽग्नय इदं. वरुणं नु देवं कन्या अग्निमयक्षत स इमां देवो वरु

णः प्रेतो मुंचातु नामुतः स्वाहा वरुणायाग्नय इदं. पूषणं नु देवं कन्या अग्निमयक्षत स इमां

देवः पूषा प्रेतो मुंचातु नामुतः स्वाहा पूष्णेऽग्नय इदं. अन्वारब्धः शूर्पकोणेन शेषं लाजा

न्प्रजापतिं मनसा ध्यायन् स्वाहाकारेण जुहुयात् ततः आ नः प्रजापिति चतसृणां सूर्यासा राम:

वित्री ऋषिः सूर्यासावित्री देवता आद्या जगति द्वितीयानुष्टुप् अंत्ये द्वे अनुष्टुभौ पुनः सं० ३८

---

आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा अदुर्मंगलीः पतिलोकमाविश शंनो भव द्विप

२२ देशं चतुष्पदे स्वाहा सूर्यायै सावित्र्या इदं. अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः

वीरसूर्देवकामा स्योना शंनो भव द्विपदे शं चतुष्प

दे स्वाहा. सू. इमां त्वमिंद्र मीढ्वः सुपुत्रां सुभगां कृणु दशास्यां पुत्राने धेहि पतिमेकादशं कृधि स्वा

हा सूर्या. सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव ननांदरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु स्वा

हा सूर्या. स्रुवगताज्यशेषमनामिकया दांपत्य समंजंत्विति मंत्रस्य सूर्यासावित्री ऋषिः सूर्या

सावित्री दे० अनुष्टुप्छंदः आज्यशेषेण वा हृदयांजने. समंजंतु विश्वेदेवाः समापो हृद

यानि नौ सं मातरिश्वा सं धाता समु देष्ट्री दधातु नौ हृदयांजनं कृत्वा हस्तं प्रक्षाल्य स्विष्टकृदा

Indira Gandhi National Centre for the Arts

दिहोमशेषं समाप्य दशरात्रीन्वा ब्राह्मणान्भोजयेत् विच्छिन्नस्याग्नेः पुनःसंधानं अर्थं गर्भाधानहो
मः स च अनाहिताग्नेरर्धाधानिनश्चाहिताग्नेः सत्यौपासने तत्रैव कार्यः तन्नाशे एव मुत्पाद्य क
र्तव्यः सर्वाधानिनामपि एवमेव पुनःसंधाने नष्टौपासनमुत्पाद्य गर्भाधानपुंसवनादिहोमः
कार्यः तत्र कृच्छ्रसंकल्पोऽन्यसंकल्पश्च नं कार्यः गर्भाधानहोमं कर्तुं गृह्याग्निं पुनःसंधानं करि
ष्य इति संकल्पः गर्भाधानान्तेऽग्नित्यागः अर्धाधानिनपित्रौपासनहोमाद्यकरणे प्रत्ये
प्रायश्चित्तमात्रं न होमद्रव्यदानं द्विभार्यस्याग्निद्वयसंसर्गात्पूर्वमेकाग्न्यनुगमने प्रायश्चि
त्तं औपासनहोमपर्द्रव्यमात्रदानं च कार्यं न तु स्थालीपाकादिद्रव्यदानं अथ प्रयोगः राम:
सपत्नीको यजमानः कृताभ्यंगः पवित्रपाणिर्गोमयोपलिप्तरंगवल्लिकायुक्तभूतलस्था ३९

पत्न्या सहोपविश्य देशकालौ संकीर्त्य समास्यां भार्यायां संस्कारातिशयद्वाराऽस्यां जनि
ष्यमाणसर्वगर्भाणां बीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं गर्भाधानाख्यं
कर्म करिष्य इति संकल्प्य तदंगत्वेन गणेशपूजादिनांदीश्राद्धांतं कुर्यात् तत्र तावत्सर्वोपयो
गित्वेन स्वस्तिवाचनमुच्यते तद्विधिमाह शौनकः स्वस्तिवाचनमेतत्तु सर्वेषामप्यधिका
रणं आदावंते च कर्तव्यमिति यज्ञविदां मतमिति तत्र कलशस्थापनं हारीतेनोक्तं गो
मयेनोपलिप्योर्वीं रंगवल्लिकयार्चयेत् प्रस्थधान्योपरि स्थाप्य पूर्णौ हि कलशद्वयं दक्षि
णे चोत्तरे चैव तत्तरे तु निधापयेत् पात्रमक्षतपूर्णं तु फलपुष्पसमन्वितं तत्र निक्षिप्य रत्ना
नि पंचत्वक्पंचपल्लवाः पंचरत्नादीनां लक्षणं विष्णुधर्मोत्तरे सुवर्णं रजतं मुक्ता लाजावर्तः

National
Centre for the Arts

प्रवालकमिति न्यग्रोधपिप्पलप्लक्षजंबूचूतरुहवा इति पंचत्वचः अश्वत्थोदुंबरप्लक्षा
न्यग्रोधश्चूत एव च पंचपल्लवमाख्यातं सर्वकर्मसु शोभनमिति सहिरण्यानीति पंचरत्ना
नि रुवतिमीम इति पंचत्वचः अश्वत्थे व इति पंचपल्लवान् अथ स्वस्तिवाचनप्रयोगः सपा
त्नीको यजमानः कृतान्यंगः पवित्रपाणिर्गोमयेनोपलिप्तं वाह्निकायुक्तस्तलस्थप्रस्थ
परिमितधान्योपरि कलशद्वयं सुलक्षणं शुद्धजलपूरितं सपल्लवं निधाय तत्पश्चिमदेशे
पुमान्ब्राह्मणान्विश्वधान् प्राङ्मुखो दक्षिणतो वा उदङ्मुखो वानुपवेश्य सोत्तरच्छदे शुद्ध
पीठे स्वयमुपवेश्य दक्षिणे संस्कार्यमुपवेश्य प्राणानायम्य यथाचारमिष्टदेवतादिनम रा॰म॰ ध॰
स्कारपूर्वकं सुमुखश्चेत्यादि पठित्वा देशकालौ संकीर्त्य अमुककर्म करिष्ये तदंगत्वे ॥

न स्वस्तिपुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं च करिष्ये तदादौ निर्विघ्नतासिध्यर्थं गण
पतिपूजनं च करिष्य इति संकल्प्य गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमं
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनं ऋद्धिबुद्धिसहितं गणपति
मावाहयामीति षोडशोपचारैः संपूज्य वक्रतुंडेति संप्रार्थ्य स्वपुरतो मही द्यौः पृथिवीति मंत्रा
वृत्त्या दक्षिणेनोत्तरतश्च भूमिं स्पृशेत् एवमुत्तरक्रियाणां तत्तत्कालानुष्ठाने मंत्रावृत्तिः
पूर्वस्थापितकलशद्वयोस्तंत्रेण मंत्रप्रयोगः ओषधयः समिति तथैव तंडुलपुंजौ कृत्वा आका
लशेष्विति तंडुलोपरि कलशौ निधाय इमं मे गंगे इति तीर्थजलेन प्रत्येकं पूरयित्वा गंधद्वारा
मिति गंधं ओषधयः समिति सर्वौषधीः कांडात्कांडादिति दूर्वा अश्वत्थे व इति पंचपल्लवा

bi National
Centre for the Arts

न रूवतिभीमइतिपंचत्वचः स्योनापृथिवीतिसप्तमृदः याःफलिनीरितिफलं सतिपंचपल्ल
व हिरण्यानीतिपंचरत्नानि हिरण्यरूपमितिहिरंण्यं युवासुवाइतिवाससासंवेष्ट्यपूर्णोदर्वेर्
तिपूर्णपात्रंस्थाप्य तत्वायामिब्रह्मणः शेपोवरुणत्रिष्टुप् वरुणावाहने। तत्वायामीतिमंत्रेण
षोडशोपचारैः संपूज्य तत्र कलशे कलशस्यमुखेविष्णुरित्यादि। दुरितक्षयकारकाइत्यंते
मंत्रैः प्रार्थयित्वा ततः कलशेविष्णवादीन्संपूज्यग्रहतानाःस्थापेत् मातृदेवोभव पितृदेवो।
आचार्यदेवो। अतिथिदेवो। आशिषः प्रार्थयंते एताः सत्या आशिषः संतु अवनिकृतजानुमं
डलः कमलमुकलसदृशमंजलिं शिरस्याधाय दक्षिणेनपाणिनासुवर्णपूर्णकलशं धा राम:
रयित्वा दीर्घानागानद्योगिरयस्त्रीणि विष्णुपदानिचतेनायुःप्रमाणेनपुण्याहं दीर्घमायुरस्तु ४१

शिवा आपः संतु सौमनस्यमस्तु अक्षतंचारिष्टं चास्तु गंधाः पांतु सुमंगल्यं चास्तु अक्षताः
पांत्वायुष्यमस्तु पुष्पाणिपांतु सौश्रीयमस्तु तांबूलानिपांत्वैश्वर्यमस्तु दक्षिणाः पांतुब
हुदेयंचास्तु अत्र पांत्वित्यादिभिर्मंत्रैः सर्वौषधैः पुष्पान्वालमूलानांघ्रादिनापूजयेत् तेच
सुमंगल्यमित्यादिमंत्रोत्तरार्धानिप्रतिब्रूयुः पंक्त्वासर्ववेदैः क्रियाकरणकर्मारंभास्व ५३
भाःशोभनाःप्रवर्तंतेतमहमोंकारमादिंकृत्वाऋग्यजुःसामाशीर्वचनंबहुऋषिमतंसंवि
ज्ञातंभवद्भिरनुज्ञातःपुण्यंपुण्याहंवाचयिष्येइत्युक्ते वाच्यतामितिप्रतिब्रूयुः भद्रंक
र्णेभिःशृणुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राः स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेमदेव
हितंयदायुः द्रविणोद्रविणसस्तुरस्यद्रविणोदाः सनरस्यप्रयंसत् द्रविणोदावारवतीमि ष

Indira Gandhi National
Centre for the Arts

न्नोऽद्रविणो द्दारासतेदीर्घमायुः सविता पश्चातात्सविता पुरस्तात्सवितोत्तरात्तात्सविताधरा
त्र त्तात् सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः नवो नवो भवति जायमानोऽह्नां के ६
तुरुषसामेत्यग्रं भागं देवेभ्यो विदधात्यायन्प्रचंद्रमास्तिरते दीर्घमायुः आपंतंदंनु जीवसे दी
र्घायुत्वाय वर्चसे यस्त्वा हृदा कीरिणा मन्यमानोऽमर्त्यं मर्त्यो जोहवीमि जातवेदो यशो
अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्यां यस्मै त्वं सुकृते जातवेद उ लोकमग्ने कृणवः स्यो
नं अश्विनं सपुत्रिणं वीरवंतं गोमंतं रयिं नशते स्वस्ति सं त्वा सिंचामि यजुषा प्रजामायु
र्धनं च मनः समाधीयतां समाहितमनसस्मः प्रसीदंतु भवंतः प्रसन्नाः स्मः शांतिरस्तु पुष्टि रामः
तुष्टि वृद्धि अविघ्न आयुष्यम आरोग्यम स्वस्ति शिवं कर्म कर्मसमृद्धि वेदसमृद्धि धर

धर्मसं १

पुंसं १

शास्त्रसमृद्धि धनधान्यसमृद्धिं इष्टसंपदस्तु बहिः अरिष्टनिरसनम् यत्पापं तत्प्रतिहत
म् अतः यच्छ्रेयस्तदस्तु उत्तरे कर्मण्यविघ्नम् उत्तरोत्तरमहरभिवृद्धिर उत्तरोत्तराः क्रियाः शु
नक्षत्र भाः शोभनाः संपद्यंतां तिथिकरणमुहूर्तसंपदस्तु तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदे
वताः प्रीयंतां तिथिकरणे मुहूर्ते नक्षत्रे सग्रहे सदैवते प्रीयेतां दुर्गापांचाल्यौ प्रीयेतां अग्नि
पुरोगा विश्वेदेवाः प्रीयंतां इंद्रपुरोगा मरुद्गणाः प्री॰ ब्रह्मपुरोगाः सर्वे देवाः प्री॰ माहेश्वरीपु विष्णुपुरो
रोगा उमामातरः प्री॰ वसिष्ठपुरोगा ऋषिगणाः प्री॰ अरुंधतीपुरोगा एकपत्न्यः प्री॰ ऋषयश्छं गास देवदं प्रीयतां ५
ब्रह्म च श्री श्रीमदस्याचार्योपद्रष्टारश्च प्री॰ श्रीसरस्वत्यौ प्रीयेतां श्रद्धामेधे प्रीयें॰ भगवती कात्यायनी प्रीयतां भग॰
वात्स्य प्री २ माहेश्वरी प्रियेः भग॰ पुष्टिकरी प्री॰ भगवान्स्वामी महासेनः सपत्नीकः ससुतः सपार्षदः सर्वत्र
भग॰ तुष्टिकरी॰ भगो॰ ... भगो॰ ... भगवंतौ विघ्नविनायकौ प्री
येतां १

Indira Gandhi National Centre for the Arts

स्थानगताःप्रीयंतां हरिहरहिरण्यगर्भाः प्रीयंतां सर्वाग्रामदेवताः प्री॰ सर्वाः कुलदेवताः प्री॰
सर्वोऽष्टदेवताः प्री॰ वद्विः हताश्च लघिवः हताः परिपंथिनः हताअस्यकर्मणो विघ्नकर्त्ता
रः शत्रवः पराभवं यांतु शाम्यंतु घोराणि शाम्यंतु पापानि शाम्यंत्वीतयः अंतः शुभानि वर्ध
तां शिवा आपः संतु शिवाऋतवः शिवा अतिथयः शिवा ओषधयः शिवा वनस्पतयः
संतु शिवा अग्नयः शिवा आहुतयः अहोरात्रे शिवे स्या[illegible]तांनि कामे निकामे नः पर्ज
न्यो वर्षतु फलवत्यो न ओषधयः पच्यंतां योगक्षेमो नः कल्पंतां शुक्रांगारक बुधबृह राम:
स्पतिशनैश्चर राहुकेतु सोमसहिता आदित्यपुरोगाः सर्वेग्रहाः प्रीयंतां भगवान्नारायणः
भ॰ पर्जन्यः भगवान्स्वामी माहसेनः पुण्याहकालान्वाचयिष्ये वाच्यताम् उग्नातेवश। ४३

कुनेसाममागायसिब्रह्मपुत्र इव सवनेषु शंससि वृषेव वाजी शिशुमती रपीत्या सर्वतो नः शकुने भद्र
मावद विश्वतो नः शकुने पुण्यमावद याज्ययायजति प्रतिर्दैया ज्यापुंण्येव लक्ष्मीः पुण्यामेवत
लक्ष्मीसंभावयति पुण्यां लक्ष्मीं संस्कुरुते यत्पुण्यं नक्षत्रं तद्बकुर्वीतोपव्युषं यदा वै सूर्यउदे ६
ति अथ नक्षत्रं नैति यावति तत्र सूर्यो गच्छेत् यत्र जघन्यं पश्येत् ताव त कुर्वीत यत्कारी स्यात
पुण्याह एव कुरुते तानि वा एतानि यमनक्षत्राणि यान्येव देवनक्षत्राणि तेषु कुर्वीत यत्कारी
स्यात् पुण्याह एव कुरुते मह्यं सह कुटुंबिने महाजनान्नमंस्कुर्वाणा याशीर्वचनमपेक्षमाण
य अस्यामुककर्मणः पुण्याहं भवंतो ब्रुवंतु ॐ पुण्याहमिति त्रिः प्रतिवचनं स्वस्तये वायुमुपब्र
स्यय वामहे सोमं स्वस्ति भुवनस्पतिः बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्या सो भवंतु नः आदि

Indira Gandhi National
Centre for the Arts

स्त्युदयनीयः पथ्यायैवैतत्स्वस्त्या प्रयंति पथ्यां स्वस्ति मभ्युद्यंति स्वस्त्यैवेतः प्रयंति स्वस्त्युद्यंति स्व
स्त्युद्यंति स्वस्तिन इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो
बृहस्पतिर्दधातु अद्यो देवा वसवः सोम्यासः चतस्रो देवीरजराः शविष्ठाः ते यज्ञं पांतु रजसः परस्ता
त् संवत्सरीणममृतं स्वस्ति मल्लमित्यादि पूर्ववत् अस्याम कर्मणोः स्वस्तिमवंतोनुवंतु अस्व
त् संवत्सरीणममृतं स्वस्ति मल्लमित्यादि पूर्ववत् अस्याम कर्मणोः स्वस्तिमवंतोनुवंतु अस्व न ४
स्तीति त्रिः ऋध्यास्म स्तोमं सनुयाम वाजमानो मंत्रं सरथेहोपयातं यशो पश्च मधुगो घृतं राम्रतो
शो अश्विनोः कामं मस्नाः सर्वां मध्विमश्नुयामितिति वै तेजसे व पुरस्तात्यर्य मवरुद्धो भिर्मध्यतो द राम:
रैरूपिष्ठाभ्यश्च्या सर्वधाद शाद्दं परिभूयसर्वां मध्विमाद्योत्सर्वां मध्विमश्नोति य एवं वेद रू ४४
ध्यास्म हव्यैर्नमसोपसद्य मित्रं देवं मित्रधेयं नो अस्तु अनूराधान्हविषा वर्धयंतः शतं जीवेम

शरदः सवीराः त्रीणि त्रीणि वै देवानाम् ऋद्धानि त्रीणि छंदांसि त्रीणि सवनानि त्रय इमे लोकाः ऋध्या
मेवतद्वीर्य एषु लोकेषु प्रति ति इति मल्लमित्या अस्य कर्मणो ऋद्धिमवंतोनुवंतु ऋध्यता
मिति त्रिः ओं श्रिये जातः श्रिय आ निरियाय श्रियं वयो जरितृभ्यो दधाति श्रियं वसाना अमृतत्वमा
यन्भवंति सत्या समिथा मितद्रौ श्रिय एवैनं तच्छ्रियामादधाति संततमृचा वषट्कृत्यं संतत्यै सं
धीयते प्रजया पशुभिर्य एवं वेद यस्मिन्ब्रह्माभ्यजयत्सर्वमेतत् अमुं च लोकमिदमू च सर्वं त
न्नो नक्षत्रमभिजिद्विजित्य श्रियं दधात्वहृणीयमाने अहे बुध्नियमंत्रं मे गोपाय यमृषयस्त्र
यीविदा विदुः ऋचः सामानि यजूंषि सा हि श्रीरमृता सतां एतैर्मंत्रैर्नीराजनं कारयेत गोत्रा
भिर्वृद्धिरस्तु प्रजापतिः प्रीयतां शुक्रे भिरंगैरज आततन्वान्क्रतुं पुनानः कविभिः पवित्रैः शो

नू

Indira Gandhi National
Centre for the Arts

चिर्वसानः पर्या पुरयां श्रियो मिमीते बृहतीरमूनाः तदप्येष श्लोकोऽभिगीतो मरुतः परिवो
ष्टरो मरुत्तस्यावसनाहे आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति ततस्तस्वरकलशं।
दक्षिणहस्ते वामहस्ते दक्षिणकलशं गृहीत्वा तां धाराद्वयं संततं पात्रे निषिंचेदेतैर्मंत्रैः वास्तो
ष्पते प्रतिजानीह्यस्मान्स्वावेशो अनमीवो भवा नः यत्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं च
तुष्पदे वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिंदो अजरासस्ते सख्ये स्याम पितेव पु
त्रान्प्रति नो जुषस्व वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या पाहि क्षेम उत
योगे वरन्नो यूयं पात स्वस्तिभिः सदा नः अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन् सखा सु रामः
शेव एधि नः शिवं रूपत्नी वामत उपवेश्य तदुक्तं सर्वेषु धर्मकार्येषु पत्नी दक्षिणतः [illegible]स्थि ४५

---

ता विश्वपादस्त्वालंतेनुग्रं शिवे वे च वामत इति अभिषेकं कुर्युः समुद्रज्येष्ठा इति सूक्तं त्रायंतामि
त्यृचापद६· हस्ताभ्यां दशशाखाभ्यां· इमा आपः शिवतमा· याभिरिदं समपिंचत्· ताभिरद्भि
रसि· महोतत्वामहीनां· देवस्यत्वा सवितुः· चामि वलाय श्रिये यशसे नाद्याय भूर्भुवः स्वः तच्छं
योराबृणीमहे· अमृताभिषेकोस्तु इति वदेयुः इति स्वस्तिवाचनं अथ मातृपूजा अकृत्वा मा
तृयज्ञं तु यः श्राद्धं परिवेवयेत् तास्तस्य क्रोधसंपन्ना हिंसां कुर्वंति दारुणामिति भविष्योक्तेः क
र्मांगश्राद्धे प्येतत्कार्यं कर्मादिषु च सर्वेषु मातरः सगणाधिपाः पूजनीयाः प्रयत्नेन पूजिताः
पूजयंति ता इति षड्विंशन्मतेश्च वृषोषिगर्भागत्वस्यापि मातृपूजनप्रतीतेः अत्र विशेषो हेमा
द्रौ चतुर्विंशमते तिस्रः पूज्याः पितुः पक्षे तिस्रः पूज्याश्च मातृके इत्येता मातरः प्रोक्ताः पितृमातृ

Indira Gandhi National Centre for the Arts

स्वसाष्टमी ब्रह्माण्याद्याः स्मृताः सप्तदुर्गा चैत्रगणाधिपाः वृद्धौ वृद्धौ सदा पूज्याः पश्चान्नांदीमुखान्वि
तन् गौरी पद्मा शची मेधा सावित्री विजया जया देवसेना स्वधा स्वाहा मातरो लोकमातरः धृ
ल तिं पुष्टिं तुष्टिं कुलदेवतां ब्राह्मी माहेश्वरी वैष्णवी इंद्राणी चामुंडा चैतास्त्वभ्युदये पूज्या आत्म
देवतया सहेति मातृपितामही प्रपितामही माता मम मातुः पितामही मातुः प्रपितामही पितृ
स्वसा मातृस्वसा अष्टमी त्वष्टौ मातरः प्रत्यब्दाः कुंकुमवस्त्राभरणपुष्पादिभिः पूज्याः परोक्षा
स्तु गौर्याद्याः देवताः मातृवट् स्वतपुंजेष्वावाह्य पूजनीया इति हेमाद्रिः अथ प्रयोगः
गौरी पद्मा शची मेधा सावित्री विजया जया देवसेना स्वधा स्वाहा मातरो लोकमातरः धृतिः पुष्टि रामः
स्तथा तुष्टिरात्मनः कुलदेवता ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा वाराही च तथेंद्राणी ४६

---

चामुंडाः सप्तमातरः गौर्यादिषोडशमातृब्राह्म्यादिसप्तमातॄश्चाक्षतपुंजेष्वावाहयामि स्रं
वस्वः मातृभ्यो नम इति नाममंत्रेण ध्यानादि दक्षिणां समर्पयेत् ततः कृत्वा गौरीर्मिमाय सलिलानि
तक्षत्येकपदी द्विपदी सा चतुष्पदी अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योम
न् इति मंत्रेण मंत्रपुष्पांजलिं समर्पयामि इति मातृकापूजनं अथ वृद्धिश्राद्धं तत्र जीव
त्पितृकस्य संस्कारेषु नांदीश्राद्धनिर्णयः कात्यायनः वृद्धौ तीर्थे च संन्यस्ते ताते च पतिते सति येभ्य
एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुत इति गृह्यपरिशिष्टे तु नांदीश्राद्धं प्रकृत्योक्तं महत्सुप
र्वेषु सदहरत्येषु तदीदमेके मातॄणां पृथक् कुर्वंति अथ पितॄणां अथ मातामहानामिति
त्रितयमिच्छंति तस्मात् जीवत्पितासुतसंस्कारे मातृमातामहयोः कुर्यात् तस्यां जीवंत्यां मातामह

...dhi National
Centre for the Arts

स्यैव कुर्यात् इति उपनयनादिषु अल्पेषु पुंसवनादिषु पृथक् दिनभेदेन पूर्वाह्णादिकाल
भेदेन वा त्रितयं श्राद्धत्रयं भिन्नमित्याशयः शातातपः पूर्वाह्णे मातृकं श्राद्धं मध्याह्ने पैतृकं
तथा ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतमिति कालाशक्तौ तु अलाभे भिन्नकाला
नां नांदीश्राद्धत्रयं बुधः पूर्वेद्युर्वै प्रकुर्वीत पूर्वाह्णे मातृपूर्वकमिति एवं जीवत्पितृकं
प्रत्यपि तीर्थ एव श्राद्धप्राप्तौ विषयविशेषपवादार्थमुच्यते तस्मादिति तत्र पार्वणद्वयेनै
व नांदीश्राद्धफलसिद्धिरित्याशयः एवं जीवन्मातृकस्यापि मातामहश्राद्धेनैव तत्सिद्धिरित्य
पि बोध्यं एवं जीवत्मृतपितृकजीवन्मातृमातामहस्य पितृपार्वणमात्रेण नांदीश्राद्धसिद्धिः प राम:
रं तु येष्वेव पितादयस्तद्यादित्यनेन परिशिष्टबलेन न च स्वमात्रादिपार्वणं समुच्चयेन कार्यः नि ४७

- विधवायास्तु विशेषः स्मृतिसंग्रहे भर्तुः पार्वणं नीत्वा विधवायाः सदैव हि स्वभर्तृ सु
रादीनां मातापित्रोस्तथैव च ततो मातामहानां च श्राद्धं दानमुपक्रमेदिति

मित्तानि तत्र वृद्धिनिमित्तकं श्राद्धं वृद्धिश्राद्धं पुत्रजननमित्तं स्वतंत्रं श्राद्धं कर्तव्यं गर्भाधानादि
गर्भसंस्कारेषु जातकर्मादिष्वपत्यसंस्कारेषु अग्न्याधानादिषु श्रौतकर्मसु श्रवणाकर्मादि
षु वापीकूपतडागारामाद्युद्यापनादिषु देवप्रतिष्ठायां वानप्रस्थसन्न्यासस्वीकारे तुला
पुरुषमहादानादौ नवगृहप्रवेशे महानाम्न्यादिवेदव्रते राज्याभिषेके शांतिकपौष्टिके
षु उपाकर्मोत्सर्जनयोः एकेऽन्यत्रापि एवंविधौ कार्ये इदमाभ्युदयिकं श्राद्धं कर्तव्यं ए
कस्यानेकसंस्कारेष्वेककर्तृकेषु युगपदुपस्थितेषु सर्वादौ सकृदेव कार्यं न तु प्रतिसं
स्कारमावृत्तिः तदुक्तं ब्रह्मपुराणे गणशः क्रियमाणानां मातॄणां पूजनं सकृत् सकृदेव
वैश्वदेवमादौ न पृथगादिषु अपि नांदीश्राद्धप्रयोगः सत्यवसुसंज्ञका विश्वेदेवाः नांदीमुखे

Indira Gandhi National
Centre for the Arts

भूर्भुवस्वरिदं वः पाद्यं स्वाहा दानमक्षय्यं च वृद्धिः मातृपितामही प्रपितामह्यः नांदीमुखाः भूर्भुव
स्वरिदं वः॰ पितृपितामह प्रपितामहाः नांदी॰ भू॰ वृद्धिः मातामह मातुः पितामह मातुः प्रपि
तामहाः सपत्नीसहिताः नां॰ भू॰ वृद्धिः सत्यवसुसंज्ञका इत्यादि॰ वः आसनगंधाद्युपचार
कल्पनं स्वाहा दानमक्षय्यं च वृद्धिः एवं मातृपितामही प्रपितामह्यः नां॰ भू॰ आसनगंधा॰ वृद्धिः पि
तृपितामह प्रपितामहाः नांदी॰ इदं आसनगं॰ वृद्धिः एवं मातामह मातुः पितामह मातुः
प्रपितामहाः पत्नीसहिः नां॰ इदं आ॰ पुनः सत्यवसुसंज्ञका विश्वेदेवाः नांदीमुखाः भू
र्भुवस्वः इदं दास्यमानं युग्मब्राह्मण भोजनपर्याप्तमन्नमामं वा यथाशक्ति सोपस्करं रामः
हिरण्यं वा स्वाहा दानमक्षय्यं च वृद्धिः मातृपितामही प्रपितामह्यः नां॰ भूर्भु॰ दास्यमानं युग्म ५८

ब्रा॰ वृद्धिः पितृपितामहाः पूर्वैः पितामहाः नां॰ भू॰ दास्यमानं॰ वृद्धिः गौर्यादिषोडशमातृरु माता
महमातुः प्रपितामहाः पत्नीसहिताः नां॰ भू॰ वः दास्यमानं॰ वृद्धिः गौर्यादिषोडशमातरः ब्रह्मादि
सप्तमातरः वः दास्यमानं यु॰ वृद्धिः उपास्मै गायता नरः पवमानायेंदवे अभिदेवां इयक्षते अभि
ते मधुना पयो थर्वाणो अशिश्रयुः देवं देवाय देवयु सनः पवस्व शंगवे शं जनाय शमर्वते
शं राजं नोषधीभ्यः बभ्रवे नु स्वतवसे रुणाय दिविस्पृशे सोमाय गाथमर्चत हस्तच्युतेभिर
द्रिभिः सुतं सोमं पुनीतन मधावाधावता मधु अभ्रूंनमी मदेत स्य वद्रिया अजूषत अस्तो
षतस्व मानवो विप्रान विष्णामतीयोजा न्विंद्र ते हरी कृतस्य नांदीश्राद्धस्य प्रतिष्ठा सिध्य
र्थं द्राक्षामलक निष्क्रय भूतं द्रव्यं स्वाहा दानमक्षय्यं च वृद्धिः प्रजापते न त्वदेतान्यन्यो विश्वा जाता

Indira Gandhi National
Centre for the Arts

निवरितावमस्व यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां अनेन नांदीश्राद्धेन नांदी
मुखदेवताः प्रियंतां इति मातापितामहीचैव तथैव प्रपितामही पितापितामहश्चैव तथै
व प्रपितामहः मातामहस्तत्पिता च प्रमातामहकादयः एते भवंतु मे प्रीताः प्रयच्छंतु च मे
गले इलामग्ने पुरुदंसं सनिंगोः शश्वत्तमं हवमानाय साध स्यान्नः सूनुस्तनयो विजावा
ग्ने सा ते सुमतिर्भूत्वस्मे इति यथाचारं मुद्रापात्रसंघट्टनेन शांतं कुर्यात् ततः उत्तिष्ठब्रह्म
णस्पते देवयंतस्त्वेमहे उपप्रयंतु मरुतः सुदानव इंद्र प्राशूर्भवासचा अस्मात् रमिंदयो
निषिक्तं पुष्करे मधु अवतस्य विसर्जने यांतु देवगणाः सर्वे पूजामादाय पार्थिवीं। राम;
इष्टकाम प्रसिद्ध्यर्थं पुनरागमनाय च इति पौराणैर्वैदिकैर्मंत्रैरावाहितदेवता आवा धए

हयेत विश्वेदेवा गर्भाधाने दक्षक्रतु संज्ञकाः एवं पुण्याहवाचन नांदीश्राद्धांते कृत्वा हो
मतंत्रं कुर्यात् ततो अग्निध्यानादि चक्षुषी आज्येनेत्यंतमुक्त्वा प्रजापतिं चरुणा विष्णुं
षड्वारं प्रजापतिं चाज्येन शेषेण स्विष्टकृतमित्यादि प्रणीतानिधानांते प्रजापतये त्वा
जुष्टं निर्वपामि प्रोक्षामि इति निर्वाप प्रोक्षण घर्म्मर्चनांते कृते पत्न्यन्वारब्ध इध्मा
धानाद्याज्यभागांतं कृत्वा चरुक्षमवदाय स्यौ यान्वारब्ध सव्यपाणि मध्यांगुलिं हृ
दये निधाय प्रजापतये स्वाहेत्याहुतिं हुत्वा प्रजापतय इदं विष्णुर्योनिमिति तिसृणां
त्वष्टा विष्णुरनुष्टुप् गर्भाधान प्रधानम्। विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु
आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते स्वाहा विष्णव इदं। गर्भं धेहि सि नीवालि गर्भं

Indira Gandhi National
Centre for the Arts

धेहि सरस्वति गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजा स्वाहा विष्णव इदं। हिरण्ययी अरणी
यं निर्मथतो अश्विना तं ते गर्भं हवामहे दशमे मासि सूतवे स्वाहा विष्णव इदं। नेजमेषेति ति
सृणां त्वष्टा विष्णुरनुष्टुप् गर्भाधा॰ नेजमेष परापत सुपुत्रः पुनरापत अस्यै मे पुत्रकामा
मा ४ यै गर्भमाधेहि यः पुमान् स्वाहा विष्णव इदं यथेयं पृथिवी मह्युत्ताना गर्भमादधे एवं तं
गर्भमाधेहि दशमे मासि सूतवे स्वाहा विष्णव इदं। विष्णोः श्रेष्ठेन रूपेणास्यां नार्यां गवी
न्यां पुमांसं पुत्रमाधेहि दशमे मासि सूतवे स्वाहा विष्णव इदं प्रजापते हिरण्यगर्भः प्र
जापतिस्त्रिष्टुप् गर्भाधाने॰ प्रजापते॰ इकप्रजापतय इदं। एवं हुत्वा पत्न्या मूर्धानं। रामः
दक्षिणपाणिनास्पृशेत् अपनः शोशुचदघमिति सूक्तस्य कुत्सोगिर्गायत्री मूर्धाभि ५०

मर्शने वि॰ अपनः शोशुचदघमग्ने शुशुग्ध्यारयिं अपनः शोशुचदघं सुक्षेत्रिया सुगातु
या वसूया च यजामहे अपनः। प्रयद्भंदिष्ठ एषां प्रास्माकासश्च सूरयः अपनः। प्रयत्ते अ
ग्ने सूरयो जायेमहि प्रते वयं अपनः। प्रयदग्नेः सहस्वतो विश्वतो यंति भानवः अपनः।
त्वं हि विश्वतो मुख विश्वतः परिभूरसि अपनः। द्विषो नो विश्वतो मुखा
ति नावेव पारय अपनः। स नः सिंधुमिव नावयाति पर्षा स्वस्तये अपनः। इति सू
क्तेन मूर्ध्नि हस्तं निधाय ततस्तमपसार्य याः फलिनीरिति जपेत् याः फलिनि
रिजाथर्वणस्य भिषग्गोमधयोनुष्टुप् जपे वि॰ याः फलिनीर्या अफला अपुष्पा या
श्च पुष्पिणीः बृहस्पति प्रसूतास्ता नो मुंचंत्वंहसः ततो वायव्यां दिशि तिष्ठन् पति

Indira Gandhi National Centre for the Arts

ष्टते वधेन दस्युमिति षणां वसुश्रुतोग्निस्त्रिष्टुप् अग्न्युपस्थाने विः वधेन दस्युंप्र
दिचातय स्ववयः कृण्वान स्तन्वे स्वायै पिपर्षि यत्सहसस्पुत्र देवान्सो अग्ने पा
हि नृतम वाजे अस्मान् वयं ते अग्न उक्थैर्विधेम वयं हव्यैः पावक भद्रशोचे अस्मे
रयिं विश्ववारं समिन्वास्मे विश्वानि द्रविणानि धेहि अस्माकमग्ने अध्वरं जुषस्व
सहसः सूनो त्रिषधस्थ हव्यं वयं देवेषु सुकृतः स्याम शर्मणा नस्त्रिवरूथेन पाहि
विश्वानि नो दुर्गहा जातवेदः सिन्धुं न नावा दुरितातिपर्षि अग्ने अत्रिवन्नमसा गृणा
नो ३ स्माकं बोध्यविता तनूनां यस्त्वा हृदा कीरिणा मन्यमानो मर्त्यं मर्त्यो जोहवीमि रामः
जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्यां यस्मै त्वं सुकृते जातवेद उ ५१

लोकमग्ने कृणवः स्योनं अश्विनं स पुत्रिणं वीरवन्तं गोमन्तं रयिं नशते स्वस्ति अग्निस्त
विश्ववस्तममिति द्वयोर्वसूयवोग्निरनुष्टुप् अग्न्युप॰ अग्निस्तु विश्रवस्तमं तु विब्रह्माण
मुत्तमं अतूर्तं श्रावयत्पतिं पुत्रं ददाति दाशुषे अग्निर्ददाति सत्पतिं सासाह यो युधा
२४ नृभिः अग्निरत्यं रघुष्यदं जेतारमपराजितं ततः सूर्योपस्थानं कृत्वा स्विष्टकृदादिहो
मशेषं समापयेत् परिशिष्टस्वारसिकप्रतीतेः परिशिष्टान्सर्वोलिंगमनात्पूर्वं वा सूर्यो
पस्थाने होमशेषं समाप्य सूर्योपस्थाने॰ सूर्यो नो दिवस्पातु वातो अन्तरिक्षात् अग्नि
र्नः पार्थिवेभ्यः जोषा सवितर्यस्य ते हरः शतं सवां अर्हति पाहि नो दिद्युतः पतन्त्याः चक्षु
र्नो देवः सविता चक्षुर्न उत पर्वतः चक्षुर्धाता दधातु नः चक्षुर्नो धेहि चक्षुषे चक्षुर्वि

National Centre for the Arts

ख्येत नूस्यः संचेदं विच्छपश्येम सुसंदृशं त्वा वयं प्रतिपश्येम सूर्य विपश्येम नृचक्षसः स्व
ली कः सूर्यमुपस्थाय त्रातं दशत्रीन्वा ब्राह्मणान्भोजयित्वा तदाशिषो गृहीत्वा भुक्त्वा नुक
लनिशायां कृतनित्यक्रियः स्वलंकृतपत्न्या सह स्वलंकृतं गृहं प्रवेशयेत् तत्र पर्यंका
रूढस्तां स्वमेमुहूर्ते पर्यंकरोमाच्छसूक्ष्मवस्त्रेणाच्छगांकल्कं संवेष्ट्य उदीर्ष्वेति द्वयोः
सूर्या सावित्री ऋषिः सूर्या सावित्री देवता आद्या त्रिष्टुप् अंत्यानुष्टुप्॰ भार्यायाः द
क्षिणनासापुटे श्वगंधारससेचने वि॰ पक्षे दूर्वारससेचने वि॰ इति विशेषः उदीर्ष्वातः प
तिवती ह्येषा विश्वावसुं नमसा गीर्भिरीळे अन्यामिच्छ पितृषदं व्यक्तां स ते भागो जनु राम:
षा तस्य विद्धि उदीर्ष्वातो विश्वावसो नमसेळामहे त्वा अन्यामिच्छ प्रफर्व्यं सं जायां ५२

पत्या सृज स्वाहेति स्वाहाकारांताभ्यां मंत्राभ्यां प्राक्स्थाः प्राङ्मुखः पृष्ठतस्तिष्ठन्नासापुटयोः
सिंचेत् यथा रस उदरपर्यंतमायाति उभयोर्नासाबिलयोर्निषिंच्येति परिशिष्टात् दक्षि
णनासापुटे एव वा सिंचेत् नस्तो दक्षिणतो निः सिंचेदिति परिशिष्टांतरात् ततस्तां माच
स्व ॐ गांधर्वस्य विश्वावसो मुखमसीति मंत्रेण पूर्वोक्तस्त्र्यादिभिः विष्णुर्योनिमि
तितिसृभिः नेजमेषेति तिसृभिः अंगुलीभिर्योनिमभिमृश्यतां स्पृषं नित्यस्य सूर्या सा
वित्री ऋषिः सूर्या॰ त्रिष्टु॰ जपे॰ तां पूषंछिवतमामेरयस्व यस्यां बीजं मनुष्या वपंति।
यान ऊरू उशती विश्रयाते यस्यामुशंतः प्रहराम शेपं योगर्भमित्यस्य वसिष्ठः पर्जन्यो।
गायत्री जपे॰ योगर्भमोषधीनां गवां कृणोत्यर्वतां पर्जन्यः पुरुषीणां अहं गर्भमित्यस्य

National Centre for the Arts

प्रजावान्मनेद्रिनोनुष्टुप् जपेत् । अहं गर्भमदधामोषधीष्वहं विश्वेषु भुवनेष्वंतः अहं प्र
जा अजनयं पृथिव्यामहं जनिभ्यो अपरीषु पुत्रान् इति जपित्वा सकृदुपगच्छेत् रेतःसेक
कालेप्राणेरेतो दधाम्यसावित्यनुप्राण्य यथाभूमिरग्निगर्भा यथा द्यौरिंद्रेण गर्भिणी ।
वायुर्यथा दिशां गर्भ एवं ते गर्भं दधाम्यसावित्यस्यस्थाने प्रथमैकवचनांतेस्वेनामवा
च्यं संप्रदायानुसारेणोत्क्रमेतत् परिशिष्टेतु गंधर्वस्येति मंत्रेणोपस्थमभिमृश्यवि
ष्णुर्योनिं मितिवाम्यां विहत्य योगर्भमोषधीनां अहं गर्भमदधामोषधीष्विति जपित्वो
पगच्छेत् प्राणेते रेतो दधाम्यसावित्यनुप्राण्य यथाभूमिरिति हृदिमभिमृशेत् नैके रा.म.
गमने मंत्रविधिरिष्यते नत्वन्येन किंचित्संस्क्रियत इति तत्रौषधीनेषेकं कृत्वोपग । ५३

ब्रुंतित्यर्थः इति गर्भाधानं अथ पुंसवनानवलोभनसीमंतोन्नयनानि मदनरत्ने कल्प
विधानं कुर्यात्पुंसवनं प्रसिद्धिविषये गर्भे तृतीये वा मासि स्फीततनौ तुषारकिरणे
पुष्ये वा वैष्णवे हित्वा कर्कटकं च युग्ममेव लाभगेष्वेषु केंद्रेति धाम्न शुद्धे नैधनधाम्नि ।
शुक्रशशाङ्कबुधैर्मंत्रिणो वासर इति प्रसिद्धिविषयोऽव्यक्त इत्यर्थः गर्गः कुर्यात्पुंसवना
द्यंतु पुंनामधेये शुभेदिने पुन्नामश्रवणेति च स्वातीहस्तपुनर्वसु मूलं प्रोष्ठपदस्वा
नुराधामृगशिरोश्विनीति मासप्रयुक्तकार्येषु मूढत्वं गुरुशुक्रयोः न दोषकृदिति
याज्ञवल्क्यः चतुर्थषष्ठेष्टमे वा सीमंत इति बैजवाप सीमंतोन्नयनं चतुर्थपंचमेष
ष्ठेवापीति अत्रिः आधानादष्टमेमासि सीमंतोन्नयनं भवेत् नवमेमासि वा कुर्याद्या ।

Indira Gandhi National Centre for the Arts

वद्गर्भविमोचनमिति बृहस्पतिः पूर्वपक्षाश्रुभः प्रोक्तः कृष्णे चांत्यत्रिकं विनेति पक्षच्छिद्रं
चरिक्तां च विना पंचदशी शुभा : चतुर्थी च कदाचित्स्फलति यस्य यस्य शुभप्रदा इति शास्त्रांत
रे पुंसवनानवलोभने पतिः कर्त्ता दैवे मावेदे वरादिः सीमंते तु स्वयमेव कर्त्ता । तथैव वृ
त्तिकाराद्युक्तेः अथ प्रयोगः तत्र अकृतगर्भाधानो द्विजाय गां दत्वा पुंसवनादि कुर्या
त् गर्भाधानस्याकरणे तस्यां जातस्तु दुष्यति अकृत्वा गां द्विजे दत्वा कुर्यात् पुंसवनेप
तिरिति पारिजाते आश्वलायनवचनात् तत्र पूर्वेद्युः समानरूपवत्साया गोरन्यस्या
वा क्षीरेण दधि संपाद्य माषद्वयं यवत्रयं मंडलाकारं स्थापयेत् गारं आनडुहं चर्म अजी रामः
र्ण दूर्वापुंजं कुमार्या दृषदुपलाभ्यां पिष्टीकृतं शुद्धवसनं चलेवस्त्रं च संपाद्य सामं ५४

तैपि कर्तव्ये औदुंबरापक्वयुग्मफलवत्सलवकौ तत्दलाभे जयंतो रूपा तादृशा प्रस्था
न्यस्तबकौ वा त्रिश्वेतशलीं त्रीणि कुशलपिंजूलानि च सगोधूमा मौदुंबरफलमालां
च संपाद्य । हविष्येण कृतैकलघुभोजनया पर्यायाद्यरेद्यः कृतमंगलस्नानया परिहि
ताहतवस्त्रया कृतैलैतया दक्षिणत उपविश्य आचम्य देशकालसंकीर्तनांते मम अस्यां
भार्यायां अस्य मम गर्भस्य बैजिकगार्भिकदोषपरिहारपुंरूपताज्ञानोदयप्रति
रोधपरिहारद्वारा पुंसवनानवलोभनं च न तंत्रेण करिष्ये इति संकल्प्य पृथक्प्रयो
गे संकल्पः सीमंतोन्नयनस्य चहस्ये मम अस्यां भार्यायां गर्भाभिवृद्धिपरिपंथिपिशितरु
धिरप्रियालक्ष्मीसमावेशनद्वाराप्रतिगर्भं बीजगर्भसमुद्भवएनोनिवर्हणद्वारा च स्त्री

भूतराक्षसीजगण्डुरनिरसनपापसकसौभाग्यानिदानभूतमहालक्ष्मी १

Indira Gandhi National Centre for the Arts

संस्कारहूपं सीमंतोनयनाख्यं कर्म करिष्य इति संकल्प गणेशपूजनादीनांदीश्रा
द्धांतं कुर्यात् नांदीश्राद्धे दक्षक्रतुसंज्ञका विश्वेदेवाः पृथक्त्वे पुंसवनार्थमौपा
सनं पवमानसंज्ञकं प्रतिष्ठाप्य केवले सीमंते तत्र पाणौ सहत्वे वा मंगलनामानम॥
ग्निं प्रतिष्ठापयेत् ध्यानादि अस्मिन्पुंसवनानवलोभने करिष्य इति पृथक्त्वे ए
षु पुंसवनानवलोभनसीमंतोन्नयनहोमेषु देवं करिष्य इति संकल्पः इति त्रयाणां स
हत्वे चरुषी आज्येनेत्यंते प्रजापतिं चरुणा शेषेणेति पृथक्त्वे सहत्वे तु चरुणेत्यं
ते सीमंते चरुषी आज्येनेत्यं धातारं धातारं राकां राकां विष्णुं प्रजापतिं चरुचाज्ये राम:
न शेषेणेत्यादि पात्रासादनात्पूर्वं स्वस्य दक्षिणतः आनडुहस्य चर्मणः प्राग्रीवास्तर ५५

णं प्रणयनांते प्रजापतये त्वा जुष्टं निर्वपामीति चतुरो मुष्टीन्निरुप्य हविरासादनांते स्वस्य दक्षि
णादेशे प्राग्रीवा आनडुहे चर्मणि उत्तरलोमास्तीर्णे बहिराचांतसलिलां पत्नीं तीर्थेन प्रविश्या
त्मानमग्निं चांतरेणानीयोपवेश्य तयान्वारब्ध आज्यभागांतं कृत्वा प्राग्रीवे उपविष्टायास्त
स्याः क्षालितप्रसृतहस्तदक्षिणपाणौ वंतजौ नु स्थिते प्रसृतिमिति तद्धि निःक्षिप्य तत्र प्रा
गग्रं यवं तत्पार्श्वे द्वये माषद्वयं निधाय तत्पत्नीं किं पिबसि किं पिबसीति त्रिः पृच्छेत् सा च पुं
सवनमिति त्रिरुक्त्वा स यवमाषं तं तं निःशेषं पीत्वा बहिराचामेत पुनरेवं त्रिः कार्यमाचमनांतं।
एतत्पुंसवनं अथ पश्चे कल्पित दूर्वापिंडमादाय मंडलागारच्छायायामुपविष्टायाः प्राङ्मु
ख्याः पत्न्याः पश्चिमतस्तिष्ठन्वदेत् आते गर्भो योनिमेतु पुमान्बाण इवेषुधिं आवीरोजाय

...dhi National Centre for the Arts

तांपुत्रस्तेदशमास्यः करोमितेप्राजापत्यमातेगर्भोयोनिमेतुते अन्तुनःपूर्णोजायतामश्लो
णोपिशाचधीतः पुमांस्तेपुत्रोनारितंपुमाननुजायतां तानिभद्राणिबीजान्यृषभाजनयंतु
नौ यानिभद्राणिबीजान्यृषभाजनयंतिनः तैस्त्वंपुत्रान्विंदस्वसाप्रसूर्धेनुकाभव कामःस
मृध्यतांमह्यमपराजितमेव मे यंकामंकामयेदेवतन्मेवायोसमर्धय। इतिप्रजीवत्सूक्तं।
अग्निरैतुप्रथमोदेवतानांसोस्यैप्रजांमुंचतुमृत्युपाशात् तदयंराजावरुणोनुमन्यतांय
थेयंस्त्री पौत्रमघंनरोदात् इमामग्निस्त्रायतांगार्हपत्यः प्रजामस्यैनयतुदीर्घमायुः
अशून्योपस्थाजीवतामस्तुमातापौत्रमानंदमभिप्रबुध्यतामियं मातेगृहेनिशिघो रामः
षउत्थादन्यत्रत्वद्रुदत्यःसंविशंतु मात्वंविकेश्युरआवधिष्ठाजीवपत्नीपतिलोके ५६

विराजपश्यंतिप्रजांसुमनस्यमाना अप्रजस्तांपौत्रमृत्युंपाप्मानमुतवाघं शीर्ष्णःस्रजमिवो
न्मुच्यद्विषद्भ्यःप्रतिमुंचामिपाशं देवकृतंब्रह्मणाकल्पमानंतेनहन्मियोनिषदःपिशा
चात् क्रव्यादोमृत्यूनधरान्पातयामिदीर्घमायुस्तवजीवंतुपुत्राः इतिबीजवपुत्र
सूक्तं वामहस्तेनतदाननमुन्नमैय्यपत्न्यादक्षिणेनासपुटेस्वांगुष्ठाग्रेणमंत्रांतेदूर्वा
रसंसेचयेत् यथारसनुदरपर्यंतंगच्छति ततोदेशांतरेआचांतयाप्रत्यङ्मुखस्थमवद्
नविधिनावद्धाय वामहस्तेहृदिधारयन् ॐप्रजापतयेस्वाहेतिजुहुयात् प्रजापतये
इदं यत्तेसुशीमइतिमंत्रस्यहिरण्यगर्भःप्रजापतिरनुष्टुप् भार्याया हृदयालंभः यत्ते
सुशीमेहृदयेहितमंतःप्रजापतौमन्येहंमांतद्विद्वांसमाहंपौत्रमघंनियामिति मा

Indira Gandhi National Centre for the Arts

योहृदयंपाणितलेनस्पृशेत् अथप्राग्ग्रीवेउपविष्टयान्वारब्धोजुहोति स्रुवेण धा।
तेतिमंत्रद्वयस्य हिरण्यगर्भऋषिः धातादेवता आद्यानुष्टुप् द्वितीयात्रिष्टुप् सीमंतोन
यनहोमे ॐधाताददातुदाशुषेप्राचीजीवातुमक्षितां वयंदेवस्यसुमतीवाजीनीवतः धीमहि२
स्वाहा धात्रइदं धाताप्रजानामुतरायईशेधातेदंविश्वंभुवनंजजान धाताकृष्टीरनि
मिषाभिचष्टेधात्रइद्धव्यंघृतवज्जुहोतस्वाहा धात्रइदं राकामहमितिमंत्रद्वयस्यग
त्समदोराकाजगति सीमंतोन्नयनप्रधानत्वा ॐराकामहंसुहवांसुष्टुतीहुवेशृणो
तुनःसुभगाबोधतुत्मना सीव्यत्वपःसूच्याच्छिद्यमानयाददातुवीरंशतदायमुक्थ्यं रामः
स्वाहा राकायइदं यास्तेसदृक्सपोषंसुभगेरराणास्वाहा राकायइदं नेजमेषेतितिसृ ५७
राकेसुमतयःसुपेशसोयाभिर्ददासिदाशुषेवसूनि।ताभिर्नोअद्यसुमनाउपागहि

णांत्वष्टाविष्णुरनुष्टुप् सीमंतोन्नयनप्रधानत्वा ॐनेजमेषपरापतसुपुत्रःपुनरापत।
अस्यैमेपुत्रकामायैगर्भमाधेहि यःपुमान्स्वाहा विष्णवइ
दं यथेयंपृथिवीमह्यउत्तानागर्भमादधे एवंतेगर्भमाधेहिदशमेमासिसूतवेस्वाहा।
विष्णवइदं विष्णोश्रेष्ठेनरूपेणास्यांनार्यांगवीन्यां पुमांसंपुत्रानाधेहिदशमेमासि
सूतवेस्वाहा विष्णवइदं प्रजापतेहिरण्यगर्भःप्रजापतिस्त्रिष्टुप् सी॰प्र॰त्वाविनि॰
प्रजापते नत्व॰प्रजापतयइदं शौनकजयंतमतेराकादेवत्याहुतिद्वयांतेउक्थ्यं
स्वाहेत्याहुतिरेका तदनुसार्यन्वाधानंचकार्यं एवंस्रुवाहुतीर्हुत्वापत्न्याःपश्चिम
तःप्राङ्मुखस्तिष्ठन् पूर्वकल्पितस्तबकद्वयत्र्यलत्तीपिंजूलत्रयसहितेपाणिनादा

Indira Gandhi National Centre for the Arts

पल्याः केशाल्ललाटसंधिमारभ्य मूर्धमध्यपर्यंतं ॐ भूर्भुवस्वरोमिति मंत्रत्कल्पयनमावर्त्ते
यनत्रिश्चतुर्वा सीमंतमुन्नयेत् प्रजापतिरृ॰ प्र॰ जापतिर्दे॰ बृहती छंदः सीमंतकर्म॰ सगोधूमा
मोदुंबरफलमालां तत्कंठे निधाय सामगानकुशलौ वीणागाथिनौ अन्यौ वा संशास्ति सोमं
राजानं संगायेतां तदभावे अन्यौ संबुध्यं तं नामयुक्तं वा वयमेव पठेतां त्रिः सोमेनो राजा
वतुमानुषीः प्रजा निविष्टचक्रासाविति असावित्यस्य स्थाने समीपनामसंबुध्यंतं पठे
तां त्रिः ततउपस्तीर्य चरो राज्यस्य चावदाय द्विरभिघार्य स्विष्टकृदादि होमशेषं समापये
त् ब्राह्मणेभ्यः यथाशक्तिमल्पं वा दद्यात् तदभावे संनिहितेभ्यो दद्यादिति वृषषट्कं घोप रामः
णकाम् इति मूल्यं पुंसवनसीमंतोन्नयनयोः शतं शतं अनवलोभनस्य दश प्रत्येकं दश ५८
दशवा त्रीन्ब्राह्मणान्भोजयेत् इति पुंसवनानवलोभनसीमंतोन्नयनानि। अथ जातक
र्मप्रयोगः पुत्रे जातमात्रे मूलज्येष्ठादौ अनुत्पन्नस्य तस्य मुखं कुलदेवताद्यं प्रणमय
र्वेक्षव लोकयन् घाटावुदङ्मुख स्नायात् तदसंभवे गृहे वाहृताभिः शीताभिः स्वर्णयुता
भिरद्भिः स्नायात् रात्रावनल संनिधौ ततो द्विराचम्य प्राक्कृतसंध्यश्चेत्पूर्णसंध्योपास
नं कुर्यात् अथ श्वेतवस्त्रमाल्यादिभिरलंकृतः पवित्रपाणिः अकृतनालछेदं अपि
तस्तन्यं अन्यैरस्पृष्टं क्षालितमलं कुमारं मातुरुत्संगे प्राङ्मुखं कारयित्वा स्वयं प्राङ्मुखो
देशादिकीर्तनांते हिरण्येन जातकर्म गर्भतं पुत्रजन्मनिमित्तकं च नांदीश्राद्धं च तंत्रे रामः
णकरिष्य इति संकल्प्य अस्य कुमारस्य गर्भांबुपानजनितनितसकलदोषनिवर्हण

Indira Gandhi National
Centre for the Arts

आयुर्मेधाभिवृद्धिबीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं जातकर्म करि
ष्ये तदादौ स्वस्तिपुण्याहवाचनमातृकापूजनं च करिष्ये तदादौ निर्विघ्नतासिद्ध्यर्थं गण
पतिपूजनं करिष्य इति गणपतिपूजनं च करिष्ये तदिह वृद्धिश्राद्धांतं कुर्यात् श्राद्धे च युग्म
ब्राह्मणपर्याप्तं हिरण्यं स्वाहा नम इति प्रयोगः ततो मधुसर्पिषी विषमानेन मिश्रिते शि
लायां निक्षिप्य यथा तयोः सुवर्णरजः संसर्गो भवति तथा सुवर्णं संघृष्य पात्रे तत्संप्रभा
त्य प्र ते ददामिति मंत्रस्य हिरण्यगर्भः सविता त्रिष्टुप् कुमारेण मधुसर्पिःप्राशने वि॰ ॐ
प्र ते ददामि मधुनो घृतस्य वेदं सवित्रा प्रसूतं मघोनां आयुष्मान् गुप्तो देवताभिः शतं जी रामः
व शरदो लोके अस्मिन् इति मंत्रांते तेनैव हिरण्येन कुमारं पाययित्वा तद्धिरण्यं प्रक्षाल्य स्व ५९

यमाचम्य तद्धिरण्यं कुमारदक्षिणकर्णे निधाय मेधां त इत्यस्य हिरण्यगर्भः सविता सरस्व
त्यश्विनावनुष्टुप् कुमारदक्षिणकर्णे जपे वि॰ कर्णसमीपे मुखं नीत्वा जपेत् मेधां ते देवः
सविता मेधां देवी सरस्वती मेधां ते अश्विनौ देवावाधत्तां पुष्करस्रजौ तद्धिरण्यं सव्यकर्णे नि
धाय तथैव तामृचं जपित्वा शिशोरंसौ दक्षिणेन पाणिना युगपदभिमृशेत् ॐ अश्मा भव
परशुर्भव हिरण्यमस्तृतं भव वेदो वै पुत्रनामासि स जीव शरदः शतं इंद्र श्रेष्ठानि इत्यस्य गृत्समद
इंद्रस्त्रिष्टुप् कुमारांसाभिमर्शने वि॰ इंद्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्व
मस्मे पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नां अस्मे प्रयंधीत्यांगिरसो
घोर इंद्रस्त्रिष्टुप् कुमारांसाभि॰ अस्मे प्रयंधि मघवन् जीषिनिंद्र रायो विश्ववारस्य भूरेः

Indira Gandhi National
Centre for the Arts

अश्मेरातं शरदो जीवसेधा अश्मेवीरां भव तदृशिश्रिर ततोऽस्नामिहैध्यर्थं अंगादंगात्संभ
वसि हृदयादधिजायसे आत्मा वै पुत्रनामासि स जीव शरदः शतं अमाइति मूर्धानं त्रिराजि
घ्रेति इति वहृचः पारिजातोदाहृतं स्वायुषोविवृद्ध्यर्थं माजिघ्रति पिता सुतं तावन्नामस्म
रेतस्यतं मात्या तां पश्यपापयेदिति अस्यार्थं वचोनुसरंतः वृत्तिकृज्जयंतादयस्तु प्रबा
सादागतस्यैव सूत्रानुसारेणैतत्त्रिराघ्राणमित्याहुः ततोऽरूपसीसंकल्पः ततो नालच्छेदं
कारयित्वा हिरण्योदकेन मार्दिक्षिणतस्तनं प्रक्षाल्य माता कुमारं पाययेत् इमं कुमा
रो धयतु दीर्घमायुः प्रजीवसे अस्येस्तनो प्रयुंजाना आयुर्वर्चो यशो बलमिति केनापि रामः ६०
ब्राह्मणेन पठितमंत्रेण तमवेतमिति ब्राह्मणा आशीर्मंत्रं वदेयुः होमपक्षे अग्निरि

ऽः प्रजापतिर्विश्वेदेवाश्च लेत्यनादेशाद्देवता हुत्वा प्राक्स्विष्टकृतः सर्पिर्मधुप्राशनादिकु
र्यादिति कुमार्या अपि जातकर्मामंत्रकं कार्यं आवृतैव कुमार्या अपि सूत्रात् तूष्णीमेताः।
क्रियास्त्रीणां विवाहस्तु समंत्रक इति स्मृतेश्च इति जातकर्म अथ जन्मदेवतानां पूजना।
दि ब्यासः सूतिकावाससनिलया जन्मदानाम देवता तासां यागनिमित्तासुश्रुषिर्जे
न्मनि कीर्तितेति जन्मनिमित्ताशौचे सत्यपीत्यर्थः प्रथमे हनि षष्ठे वा दशमे चैव सर्वदा
त्रिष्वाशौचं न कुर्वीत सूतके पुत्रजन्मनीति चकारात्पंचमाष्टमयोरपि तत्र प्रथमे नै
मित्तिकैश्राद्धादौ दशमे बलिदानान्नदानयोः इतरत्र तु जन्मदेवतापूजादौ बलिदा
नेतु दशमे त्वत्र दाने प्रशस्यत इति अन्नदानं सगोत्रेभ्यः अथ षष्ठीपूजाप्रयोगः पंचा

Indira Gandhi National
Centre for the Arts

मादिदिनरात्रेः प्रथमयामे कुमारस्य पित्रादिराचम्य देशकालकीर्त्तनांते स्य बालकस्य स
मातृकस्यायुरारोग्यसकलारिष्टशांतिद्वारा श्रीपरमेश्वरप्रीत्यर्थं स्कंदस्य शाकादीनां तु जन्म
दानां जीवंतिकायाश्च पूजनं करिष्ये तदादौ विघ्नेशपूजनं करिष्ये गणेशं षोडशोपचा
रैः पूजयित्वा प्रार्थयेत् लंबोदर महाकाय भाग सर्वोपद्रवनाशन त्वत्प्रसादात् विघ्नेशा
चिरंजीवतु बालकं इति ततः कुड्यादिलिखितप्रतिमासु तंदुलपुंजेषु वा जन्मदां जी
वंत्यपरं नाममंत्रेण जन्मदानामावाहनादि आयादि वरदे देवि महाषष्ठीति विश्रु
ते शक्तिभिः सह बालं मे रक्ष जागरवासरे इति षष्ठ्या आवाहनं शक्तिस्त्वं सर्वदेवानां लो रामः
कानां हितकारिणी दिनेषु पूजितदेवताप्रीत्यर्थं ब्राह्मणेभ्यो यथाचारं पंच खा ६२

णि मानवीं लभिमं रक्ष महाषष्ठि नमोऽस्तु ते इति षोडशोपचारेण तस्यै समर्पणं क्षेत्रपाल
नमस्तुभ्यं सर्वशांतिफलप्रद बालस्य विघ्ननाशार्थं गृहाणेमं बलिं शुभं इति क्षेत्रपालब
लिं दद्यात् जीवंतिकाप्रीत्यर्थं बलिदाने भूतप्रेतपिशाचाद्या गंधर्वा रक्षसां गणाः शुभं कु
र्वंतु ते सर्वे गृह्णंतु इमं बलिमिति नवग्रहबलिं दद्यात् अष्टलोकपालबलिं दद्यात् ज
ननी सर्वभूतानां बालानां च विशेषतः नारायणीस्वरूपेण बालं मे रक्ष सर्वदा भूतप्रेत
पिशाचेभ्यो डाकिनीशाकिनीषु च मातेव बालरक्षां मे श्वापदे पन्नगेषु च गौरीपुत्रो
यथा स्कंदः शिशुत्वे रक्षितः पुरा तथा ममाप्ययं बालः षष्ठिके रक्षतां नम इति उक्तदि
नेषु पूजितदेवताप्रीत्यर्थं ब्राह्मणेभ्यो यथाचारं पंच खाद्यादि तांबूलदक्षिणा दिद्या

Indira Gandhi National Centre for the Arts

द्यात् पक्वान्नमिन्नदानप्रतिग्रहयोर्नदोषः इतिजन्मदेवतादिपूजनं अथाशौचेकर्त्तौ।
व्यनिर्णयः भरद्वाजः सूतकेमृतकेकुर्यात्प्राणायाममंत्रकं तथामार्जनमंत्रांस्तुमा
नोच्चार्यमार्जयेत् गायत्रींसम्यगुच्चार्यसूर्यायार्घ्यंनिवेदयेत् मार्जनंतुनवाकार्यमुपस्था
नेनचैववहीति इतिसंक्षेपतोज्ञेयं अथजननशांतयः तत्रादौगोप्रसवउच्यते गर्गः पि
त्रारिष्टेसुतारिष्टेमात्रारिष्टेतथैवच प्रायश्चित्तंततःकुर्यात्तद्दोषस्यशांतये एषाश्वि
न्योगुरोसार्पमघाचित्रेइमूलभे एष्वृक्षेषुजातस्यकुर्याज्जननंतथा जन्मर्क्षेवात्रि
जन्मर्क्षेशुभेवारेशुभेदिने कृत्वाभ्यंगादिकंसर्वंगृहालंकारपूर्वकं गोमयेनोपलि रामः
प्यायगृहस्येशानभागके पंकजंकर्णिकायुक्तंरजोभिःश्वेतवर्णकैः व्रीहींस्तत्रवि ६२

निक्षिप्ययथावित्तानुसारतः नववस्त्रंतुतन्मध्येनववस्त्रंप्रसारयेत् स्थापयित्वाशि
शुंतत्रपुनःसूत्रेणवेष्टयेत् प्राङ्मुखंतमवाक्यादंत्तिलगर्भगतंशिशुं गोमुखंदर्शयि
त्वातुपुनर्जातंतुगोमुखात् विष्णुर्योनिमितिसूक्तेनगव्येनस्नापयेच्छिशुं गवामंगे
षुमंत्रेणगवामंगेषुसंस्पृशेत् विष्णोश्रेष्ठेनेतिमंत्रेणगोप्रसूतंतुबालकं आचा
र्यस्तुसमादायपश्चान्मात्रेददेत्तथा मातजघन्यभागस्थाशिशुमानीयतंमुखा
त् ततःपित्रेतदाद्द्यात्ततोमात्रेप्रदापयेत् वस्त्रेणवेचसंस्थाप्यपुत्रस्यमुखमी
क्षयेत् गोमूत्रंगोमयंक्षीरंदधिसर्पिश्चसंयुतं आपोहिष्ठादिभिर्मंत्रैरभिषिंचेत्त
तःशिशुं मूर्ध्निचाघ्रायतत्पुत्रंतन्मंत्रेणतदापिता अंगादंगात्संभवसिहृदयादधि

Indira Gandhi National Centre for the Arts

जायसे आत्मा वै पुत्रनामासि स जीव शरदः शतमिति मूर्धानं जिघ्रायतं शिशुं स्थाप
येत्ततः पुण्याहं वाचयेत्स्वस्वाद्ब्राह्मणैर्वेदपारगैः रिष्टाया च विप्राय तां गामभ्यर्च्य दाप
येत् गोवस्त्रस्वर्णधान्यादि दद्याद्दर्कादितः क्रमात् यथाशक्ति धनं दद्याद्ब्राह्मणे।
भ्यस्तदा पिता ततो होमं प्रकुर्वीत स्वशाखोक्तमार्गतः उक्तेरेव न तदा कुर्यादाज्यभा
गांतमेव च होमस्येशानदिग्भागे धान्योपरि हेमटं घटं पंचगव्यं घटे स्थाप्य तिलांस्त
त्र विनिक्षिपेत् क्षीरद्रुमकषायांश्च पंचरत्नानि निक्षिपेत् वस्त्रयुग्मेन संछाद्य गं
धादिभिरथार्चयेत् विष्णुं वरुणमभ्यर्च्य प्रतिमां चाथ विनतः प्रतिमायद्महणः आगे राम: ६३
तं दैवत्य विधानत्वात् चकाराच्चेति केचित् तन्न विष्ण्वादिपूजायां प्रतिमानियम

संभवे पूर्वपूजांतरकल्पनस्यान्याय्यत्वात् चकारस्य विधानस्य होक्तत तद्दुचितेति
कर्त्तव्यतानिरूपितसमुच्चयार्थत्वात् यत इंद्रादिभिर्मंत्रैः कुंभं स्पृष्ट्वाभिमंत्रयेत् द
धिमध्वाज्ययुक्तेन रूपितसमुच्चयार्थत्वात् यत इंद्रादिभिर्मंत्रैः कुंभं स्पृष्ट्वाभिमंत्र
येत् दधिमध्वाज्ययुक्तेन होमं कुर्याद्विधानतः आपो हि ष्ठेति तिसृभिरष्टकमेसोमदत्य
थ तद्विष्णोः परमं पदमन्तीम्यांतेति सूक्ततः ऋग्भिरासिः प्रत्यचं चाष्टाविंशतिसंख्यया
अशक्तश्चाष्टसंख्यं दधिमध्वाज्यसंयुतं आदित्यादिग्रहाणां च होमं कुर्यात्समंत्रकं
इति गोप्रसवविधिः अथ प्रयोगः बालस्य जन्मनक्षत्रादारभ्य गणनेन दशमैकोनविं
शयोर्वा नक्षत्रयोस्तदसंभवे देवनक्षत्रयुक्ते शुभे दिने वा कृतान्यां गम्नानो गल्युपलेपा।

Indira Gandhi National
Centre for the Arts

नादिनालंकृतस्य मार्यायाःस्य वालस्यामुकदुष्टकालोकालो स्यातिसूचितारिष्टनिवृत्तिद्वा
रा श्रीपरमेश्वरप्रीत्यर्थं गोमुखप्रसवाख्यां शांतिं करिष्य इति संकल्प्य तदंगत्वेन गणेशपू
जां कृत्वाचार्यवरणं तत्पूजनं च कुर्यात् आचार्यो यदत्र संस्थितमिति सर्षपविकरणं
कृत्वा स्वस्तिवाचनं तार्क्ष्यमिति प्रार्थ
शुचिव इति पंचगव्येनाप्यायो हि ष्ठेति चा विश्वदेशं प्रोक्ष्य स्वस्त्ययनं तार्क्ष्यमिति प्रार्थ
नं च विधाय गृहस्यैशानभागे गोमयेनोपलिप्य श्वेतरजोभिः कर्णिकासुकंपंकजं कृ
त्वा तत्र प्राङ्मुखं शिशुं निधाय सशिशु शूर्पं सूत्रेण संवेष्ट्य तस्मिन् गोविमुखसोनिध्यं
कृत्वा विष्णुर्योनिमिति सूक्तस्य त्वष्टा विष्णुरनुष्टुप् इति सूक्तेन जन्मचिंतनं कृत्वा तेन राम: ६४
वा वृत्या पंचगव्येन शिशुं स्नापयित्वा गवामंगेषु तिष्ठंति भुवनानि चतुर्दश यस्मात्त

स्माच्छिवं मे स्यादिह लोके परत्र चेति गो: सर्वांगेषु भ्रामो गेषु वास्य त्रीन् ततश्चाचार्यो वा
लमादाय गोमुखसमीपे बालं नीत्वा पुनराद्वाय पित्रे दद्यात् ततश्चाचार्यः पितृहस्तेन मा
त्रे दद्यात् नवे वस्त्रे शिशुं स्थाप्य ब्राह्मणमपसार्य मुत्रमुखेक्षणं कुर्यात् ततः पंचगव्येनाचा
र्यः शिशुं प्रोक्षेत् आपो हि ष्ठेति तृचस्यां वरीषः सिंधुद्वीप आपो गायत्री अभिषेके वि•
आपो हि ष्ठेति ~~तृचस्यां वरीः सिंधुद्वी[illegible]~~ इति मंत्रैः ततः पिता मद्हस्तद्वयेन
परिग्रहपूर्वकं अंगादंगादिति मंत्रेण शिरो मूर्ध्न्यवघ्राय स्यान्ते शिशुस्याप
नं कृत्वा स्वशाखाध्यायिभिः स्वशाखोक्तविधिना पुण्याहवाचनं कुर्यात् ततश्चाचार्यो
गोर्दक्षिणाद्व्रालणस्य च पूजनपूर्वकं तस्मै तद्दानं विधिना कारयेत् ततो यजमानो व

Indira Gandhi National
Centre for the Arts

स्त्रस्वर्णधान्यादीनि यथाशक्त्यार्कादिप्रीत्यर्थं आचार्याय दत्वान्येभ्यो ब्राह्मणेभ्यो
ऽप्यसौ दत्वा ततः आचार्यो गोमुखप्रसवशांतिहोमं करिष्य इति संकल्प्य स्थंडिलाद्यग्नि
स्थापनांते ऽर्कादिग्रहाणामावाहनं कृत्वान्वाधानं कुर्यात् चक्षुषी आज्येनेत्यन्ते ऽत्र
४ अप: प्रधानं द्वादशोत्तरशतसंख्याकाभिः दधिमध्वाज्याहुतिभिर्द्वात्रिंशत्संख्याभिर्वा वि
ष्णुं अष्टाविंशतिसंख्याभिर्दधिमध्वाज्याहुतिभिरष्टभिर्वा ग्रहहोमं अष्टषष्ठ्याधिक
शतसंख्याभिर्दधि॰ तिभिः प्रत्येकमष्टाभिर्वा शेषेणेत्यादि । आज्यभागांते स्थंडिलस्य
ईशानभागे द्विशिग्रहवीजोत्तरतो महीद्यौरित्यादिविधिना धान्योपरि घटस्थापनं कृ राम: ६५
त्वा तस्मिन् पंचगव्यं तैलान् क्षीरद्रुमकषायान् पंचरत्नानि क्रमेण निःक्षिप्य वस्त्रयुग्मेन

संवेष्ट्य गंधाद्यैरभिः कलशमभ्यर्च्य कृताग्न्युत्तारणप्रतिमयोर्विष्णुवरुणयोः पूजये
त् तद्विष्णोरिति मेधातिथिर्विष्णुर्गायत्री गोप्रसवप्रधाने ऋतद्विष्णोः परमं पदं सदाप
श्यंति सूरयः दिवीव चक्षुराततं तत्वायामि शुनःशेपो वरुणस्त्रिष्टुप् तत्वायामि ब्रह्म
णा वंदमानस्तदाशास्ते यजमानो हविर्भिः अहेलमानो वरुणेह बोध्युरुशंसमान आ
युः प्रमोषीः पूजांते कुंभं स्पृष्ट्वाभिमंत्रयेत् यतइंद्रेति षण्णां भर्गइन्द्रो बृहती कुंभाभि
मंत्रणे वि॰ यत इन्द्र भयामहे ततो नो अभयं कृधि मघवं छग्धि तव तन्न ऊतिभिर्विद्वि
षो वि मृधो जहि त्वं हि राधस्पते राधसो महः क्षयस्यासि विधतः तं त्वा वयं मघवन्नि
न्द्र गिर्वणः सुतावंतो हवामहे इंद्रस्पलुत वृत्रहा परस्पानो वरेण्यः सनोरक्षिषच्चर

Gandhi National Centre for the Arts

मं समध्यमं सपश्चात्पातु नः पुरः त्वं नः पश्चादधरादुत्तरात्पुर इन्द्र नि पाहि विश्वतः आरे
अस्मत्कृणुहि दैव्यं भयमारे हेतिरदेवीः अघा घाश्वश्व इन्द्रास्व परेचनः विश्वाचा
नो जरीत्सुन्सत्पते अहा दिवा नक्तं च रक्षिषः प्रभंगी शूरो मघवा तुवीमघः संमिश्लो
वीर्याय कं उभाते बाहू वृषणा शतक्रतो नि या वज्रं मिमिक्षतुः ततः स्रुवेण दधिमध्वा
ज्य होमं कुर्यात् आपो हि ष्ठेति त्र्यृच्यादि पूर्ववत् गोमुखप्रसव प्रधान होमे सत्यपिहो
मस्य वारुणत्वे अप्सु इत्येसैव त्यागः पार्वण होमे पूर्णमासायेदमितिवत् अस्य मे
त्र्यृच्यादि पूर्ववत् अत एवानुष्टुप्तो ग्रहणं तद्विष्णुः गायत्री गोमुखप्रसव त्र्य विष्णु राम
वइदं अक्षीभ्यां त इति षण्णां विवृहा यक्ष्महानुष्टुप् गो. आज्य. अक्षीभ्यां ते नासि। ६६

काभ्यां कर्णाभ्यां छुबुकादधि यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया विवृहामि ते ग्रीवा
भ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात् यक्ष्मं दोषण्यमंसाभ्यां बाहुभ्यां विवृहा
मि ते आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोर्हृदयादधि यक्ष्मं मतस्नाभ्यां यक्नः प्लाशिभ्यो वि
वृहामि ते ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्यां यक्ष्मं श्रोणिभ्यां भासदाद्भंस
सो विवृहामि ते मेहनाद्वनंकरणाल्लोमभ्यस्ते नखेभ्यः यक्ष्मं सर्वस्मादात्मनस्तमिदं
विवृहामि ते अंगादंगाल्लोम्नो जातं पर्वणि पर्वणि यक्ष्मं सर्वस्मादात्मनस्तमिदं वि
वृहामि ते ततः आकृष्णेनेत्यादि त्र्यृच्यादि होमः सवित्रे सोमायेति त्यागः सर्वत्र प्रत्य
चं अष्टाविंशत्यष्टो वा आहुतयः प्रणीतानिनयन संस्थाजपान्ते परिस्तरणविसर्जं

...hi National
Centre for the Arts

नादि आचार्याय यथाशक्तिदक्षिणां दत्वा स्थापितदेवतानामुत्तरपूजनादि विस
र्जनं ते प्रतिमा आचार्याय हस्ते प्रतिपाद्याग्निं संपूज्य विसृति धारणं ते गच्छ गच्छेति तं वि
सृज्य दश त्रीन्वा ब्राह्मणान्भोजयेत् कर्मणः पूर्णतां वाचयित्वेश्वरार्पणं कुर्यात् इ
ति गोप्रसवशांतिः अथ कृष्णचतुर्दशीजननशांतिः गर्गः कृष्णपक्षे चतुर्दश्यां प्रसू
तांश्च षड्विधं फलं चतुर्दशीं च षड्भागां कुर्यादादौ शुभं स्मृतं द्वितीये पितरं हंति तृ
तीये मातरं तथा चतुर्थे मातुलं हंति पंचमे वंशनाशनं षष्टे तु धननाशः स्यादात्मनो
वंशनाशनं तस्मात्सर्वप्रयत्नेन शांतिं कुर्याद्विधानतः आचार्यं वरयेद्धीमान्सु ग॰शां॰
त्रदारसमन्वितं ब्राह्मणान्वृत्विजश्चैव स्वस्तिवाचनपूर्वकं रुद्राधिदेवतां तस्यां ६७

कर्षमात्रसुवर्णेन तु तदर्धार्धेन वा पुनः वित्तशाठ्यविवर्जितः प्रतिमां कारयेद्धीमान् सर्व
लक्षणसंयुतां वृषभे च समासीनां वरदां शूलपाणिनीं शुद्धस्फटिकसंकाशां श्वे
तमाल्यांबरान्वितां त्र्यंबकेन मंत्रेण पूजां कुर्याद्विधानतः स्थापयेच्चतुरः कुंभां
श्चतुर्दिक्षु यथाक्रमं पुण्यतीर्थजलोपेतान्धान्यस्योपरि विन्यसेत् तन्मध्ये स्थापये
त्कुंभं शतच्छिद्रसमन्वितं पंचगव्यं च रत्नानि पंचत्वक्पंचपल्लवान् पंचधान्यं सुवर्णं
च तत्र मंत्रैर्विनिक्षिपेत् शतौषधानि निक्षिप्य श्वेतवस्त्रैश्च वेष्टयेत् सर्वे समुद्राः आ
यांतु यज॰ रक्षाः आवाह्य वारुणैर्मंत्रैरनेन च विधानतः इमं मे वरुण तत्त्वा यामीत्य
चा तथा त्वं नो अग्न इत्यनया स त्वं न इति मंत्रतः आग्नेयकुंभमारभ्य पूजां कुर्याद्यथाक्रमं

Indira Gandhi National
Centre for the Arts

ईश्वरस्य रुद्रस्य पूजाकर्म सुनिर्वर्त्य होमं कुर्याद्विधानतः गेहस्येशानदिग्भागे कुंडं कुर्या
द्विधानतः विस्तरायामखातं च अरत्निद्वयसंमितं कुंडकंठं परित्यज्य समंतादंगुलं क्र
मात् पश्चिमे मध्यभागे तु योनिं कुर्याद्विधानतः समिदाज्यचरूंश्चैव तिलमाषांश्च सर्ष
पैः अश्वत्थप्लक्षपालाशन्यग्रोधसमिद्भिः खादिरैः शुभैः अष्टोत्तरसहस्रं वा अष्टोत्तरश
तं तु वा अष्टाविंशतिमेतैश्च होमं कुर्यात्पृथक्पृथक् त्र्यंबकेन मंत्रेण तिलाज्या
हुतिभिः क्रमात् ग्रहाणां चैव होतव्या अस्मद्गुरुविधानतः एवं क्रमेण होतव्यं हो
मशेषं समापयेत् सर्वालंकारयुक्तानां त्रयाणामभिषेचनं त्रयाणां मातृपितृबाल राम:
कानां चतुर्भिः कलशैरद्भिर्हेमकुंभसमन्वितं धौतांबराणि धृत्वाथ कुर्यादाज्यावा ९८

लोकनं पूर्णाहुतिं च जुहुयाद्यजमानः समाहितः तत्सर्वं परया भक्त्या ईश्वराय निवेदये
त् सर्वालंकारसंयुक्तां सवत्सां गां पयस्विनीं प्रतिमां वस्त्रयुग्मं च आचार्याय निवेदयेत्
ईश्वरप्रीतये भक्त्या कुर्याद्ब्राह्मणभोजनं अन्येषां चैव सर्वेषां कुर्याद्ब्राह्मणभोजनं त
स्मादनेन विधिना विघ्नशाठ्यविवर्जितः एवं यः कुरुते शांतिं सर्वपापैः प्रमुच्यते सा
र्वान्कामानवाप्नोति चिरंजीवी सुखी भवेत् इति विधिः अथ प्रयोगः देशका
लौ संकीर्त्य अस्य शिशोः कृष्णचतुर्दश्याममुकांशजननसूचितसर्वारिष्टनिरसन
द्वारा श्रीपरमेश्वरप्रीत्यर्थं सग्रहमखां कृष्णचतुर्दशीजननशांतिं करिष्ये तदंगत्वेन
गणपतिपूजनं स्वस्तिपुण्याहवाचनं आचार्यर्त्विग्वरणं च करिष्ये वृतानां पूजनं

National.
Centre for the Arts

अमुक्तारणं आचार्यादिमंत्रा वृत्यापदार्थानुसमयेन मध्ये शतछिद्रं तस्य चतुरः कल
शांश्चस्थाप्यत्रातछिद्रेस्यो नाशयि विमवेतिपंचमरः अश्वत्थेव इतिपंचपल्लवान्
सहिरत्नानितिपंचरत्नानि रुवतिभीमइतिपंचत्वचः ॐषधयः समितिपंचधान्यानि
हिरण्यरूपइतिहिरंण्यं याॐषधीरितिसर्वौषधीः शतावरीनिन्हिण्ययुवासुवासाइ
तिवस्त्रैः संवेष्ट्य पूर्णा दर्वीतिपूर्णपात्रनिधानांते रुद्रप्रतिमां कर्षतदर्धतदर्धान्यत
रपरिछिन्नहेमनिर्मितांवराभयांकितहस्तद्वयांवृषभारूढां स्थापयित्वा त्र्यंबकंव
सिष्टोरुद्रोनुष्टुप् रुद्रपूजने। त्र्यंबकंयजामहे सुगंधिंपुष्टिवर्धनं उर्वारुकमिवबं रामः
धनान्मृत्योर्मुक्षीयमामृतात् इतिपूजांकृत्वा शुद्धस्फटिकसंकाशं श्वेतमाल्यांबरा ६०

वृतंध्यात्वा एकादशिन्यभिषेकघटितोपचारैरुद्रंसंपूज्य आग्नेय्यादिचतुर्षुकल
शेषुगंधद्वारामितिगंधं ॐषधयः समितियवान् अश्वत्थेवइतिपंचपल्लवान् कां
डात्कांडादितिदूर्वां सहिरत्नानितिपंचरत्नानि हिरंण्यरूपइतिहिरण्यं याःफलिनी
रितिफलं युवासुवासाइतिच समुद्रादिसहितं वरुणमावाहयेत् इमंमेवरुणश्रुनः
शेपोवरुणोगायत्री वरुणावाहने। समुद्रसहितंवरुणंसंपूज्य उत्तरकलशेपि
समुद्रसहितवरुणपूजनक्रमेण तत्वायामिब्रह्मणा वंदमानं स्तदाशास्ते यजमा
नोहविर्भिः अहेलमानोवरुणेहवोध्युरुशंसमानआयुः प्रमोषीः त्वन्नोअग्नेवरुण
स्यविद्वांदेवस्यहेलोवयासिसीष्टाः यजिष्टोवह्नितमः शोशुचानो विश्वाद्वेषांसिप्रमु

Indira Gandhi National
Centre for the Arts

ग्घ्यस्मत् सत्वनोग्ग्रमेवमोभवोतीनेदीष्टोग्ग्रस्यात्तषसोप्स्कष्टौ ग्रवयक्ष्वनोवरुणं।
रराणोवीहिमृःलीकंसुहवोनएधि सर्वप्रजांतेदेवद्यानवइतिप्रतिकलशार्थेनातत्र
क्रमेणचतुर्षुकलशेषुसूक्तजपः ग्रानोभद्राइसस्यदशर्चस्यसूक्तस्यराहूगणो।
गौतमोविश्वेदेवादेवता ग्राद्याःपंचसप्तमीचजगत्यःषष्ठीविराट्स्थानशेषास्त्रि
ष्टुभःजपेवि॰ ग्रानोभद्राःक्रतवोयंतुविश्वतोदब्धासोग्रपरीतासउद्भिदः देवानोयथा
सदमिद्वृधेग्रसंनप्रायुवोरक्षितारोदिवेदिवे देवानांभद्रासुमतिरृजूयतांदे
वानांरातिरभिनोनिवर्त्ततांदेवानांसख्यमुपसेदिमावयंदेवानग्रायुःप्रतिरंतुजी रामः ७०
वसे तान्पूर्वयानिविदाहूमहेवयंभगंमित्रमदितिंदक्षमस्त्रिधं ग्रर्यमणंवरुणंसोम

मश्विनासरस्वतीनःसुभगामयस्करत् तंनोवातोमयोभुवातुभेषजंतन्मातापृथि
वीतत्पिताद्यौः तद्ग्रावाणःसोमसुतोमयोभुवस्तदश्विनाशृणुतंधिष्ण्यायुवं तमीशा
नंजगतस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहेवयं पूषानोयथावेदसामसद्वृधेरक्षितापा
युरदब्धःस्वस्तये स्वस्तिनइंद्रोवृद्धश्रवास्वस्तिनःपूषाविश्ववेदाः स्वस्तिनस्तार्क्ष्योग्र
रिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु पृषदश्वामरुतःपृश्निमातरःशुभंयावनोविदथे
षुजग्मयेः ग्रग्निजिह्वामनवःसूरचक्षसोविश्वेनोदेवाग्रवसागमन्निह भद्रंकर्णेभिः
शृणुयामदेवहितंयदायुः शतमिन्नुशरदोग्रंतिदेवायत्रानश्चक्राजरसंतनूनांपुत्रा
सोयत्रपितरोभवंतिमानोमध्यारीरिषतायुर्गंतोः ग्रदितिर्द्यौरदितिरंतरिक्षमदितिर्माता

National Centre for the Arts

सपितासपुत्रः विश्वेदेवा अदितिः पंचजना अदितिर्जातमदितिर्जनित्वं भद्रा अग्नेरिति
वाध्र्यश्वः सुमित्रोग्निर्देवता अंत्ये द्वे जगत्यौ अन्यास्त्रिष्टुभः जपे वि॰ भद्रा अग्नेर्वध्र्यश्वस्य
संदृशो वामी प्रणीतिः सुरणा उपेतयः यदी सुमित्रा विशो अग्र इंधते घृतेनाहुतो जरते द
विद्युतत् घृतमग्नेर्वध्र्यश्वस्य वर्धनं घृतमन्नं घृतम्वस्य मेदनं घृतेनाहुत उर्विया वि
पप्रथे सूर्य इव रोचते सर्पिरासुतिः यत्ते मनुर्यदनीकं सुमित्रः समीधे अग्ने तदिदं नवीय
रेवद्वोचसा गिरो जुषस्व स वाजं दर्षि स इह श्रवो धाः यं त्वा पूर्वमीलितो वध्र्यश्वः समीधे
अग्ने स इदं जुषस्व स न स्तिपा उत भवा तनूपा दात्रं रक्षस्व यदिदं ते अस्मे भवा सुमीवा रामः
तगोपा मा त्वा तारीदभिमातिर्जनानां शूर इव धृष्णुश्च्यवनः सुमित्रः प्र नु वोचं वाध्र्यश्वस्य ७१

नाम त्वा पर्वेस्पा उ वस्तनिंदासा वृत्राण्यार्या जिगेथ शूर इव धृष्णुश्च्यवनो जनानां त्व
मग्ने पृतनायूंरभिष्याः सहस्रशीर्षेति पुरुषो नारायणो देवता अनुष्टुप् जपे॰ सहस्रशी
र्षा पुरुषः सहस्राक्षः सहस्रपात् स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलं पुरुष एवेदं
सर्वं यद्भूतं यच्च भव्यं उतामृतत्वस्येशानो यदन्नेनातिरोहति एतावानस्य महिमातो॥
ज्यायांश्च पूरुषः पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि त्रिपादूर्ध्व उदैत्पुरुषः
पादोस्येहाभवत्पुनः ततो विष्वङ्व्यक्रामत्साशनानशने अभि तस्माद्विराड
जायत विराजो अधि पूरुषः स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः यत्पुरु
षेण हविषा देवा यज्ञमतन्वत वसंतो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः तं यज्ञं बर्हि

Indira Gandhi National Centre for the Arts

षिप्रौक्षन्पुरुषंजातमग्रतः तेनदेवाअयजंतसाध्याऋषयश्चये तस्माद्यज्ञात्सर्वहुत
ऋचःसामानिजज्ञिरे छंदांसिजज्ञिरेतस्माद्यजुस्तस्मादजायत तस्मादश्वाअजायंतये
केचोभयादतः गावोहजज्ञिरेतस्मात्तस्माज्जाताअजावयः यत्पुरुषंव्यदधुःकतिधाव्यक
ल्पयंत् मुखंकिमस्यकौबाहूकाऊरूपादाउच्येते ब्राह्मणोस्यमुखमासीद्बाहूराजन्यःकृ
तः ऊरूतदस्ययद्वैश्यःपद्भ्यांशूद्रोअजायत चंद्रमामनसोजातश्चक्षोःसूर्योअजायत
खोद्वैश्यःपद्भ्यांशूद्रोअजायत चंद्रमामनसोजतश्चक्षोःसूर्योअजायत मुखादिंद्रश्चा
ग्निश्चप्राणाद्वायुरजायत नाभ्याआसीदंतरिक्षंशीर्ष्णोद्यौःसमवर्तत पद्भ्यांभूमिर्दिशः रामः
श्रोत्रात्तथालोकांअकल्पयंन सप्तास्यासन्परिधयस्त्रिःसप्तसमिधःकृताःदेवायद्य ७२

ज्ञंतन्वानाअबध्नन्पुरुषंपशुं यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन्
तेहनाकंमहिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः कद्रुद्रायेत्यस्यघोरःकण्वोरु
द्रोगायत्री।जपे। कद्रुद्रायेतिसूक्तं ततोग्निर्विधायग्रहांश्चप्रतिष्ठाप्यान्वाधानंकुर्यात्
समिद्द्वयमादाय। आज्येनेत्यंतेत्रप्रधानं आदित्यादिग्रहानष्टसंख्याकाभिःअर्का
दिजातीयसमिदाहुतिभिश्चर्वाहुतिभिराज्याहुतिभिः अधिदेवताप्रत्यधिदेवताद्याग्र
हपीठदेवताएकैकसंख्याकाभिःसमिच्चर्वाज्याहुतिभिः रुद्रंप्रत्येकंअष्टोत्तरसंख्या
काभिःअश्वत्थपलाशंखादिरजातीयसमिदाहुतिभिश्चर्वाहुतिभिस्तिलमाषस
र्षपाहुतिभिः अग्निंवायुंसूर्यंप्रजापतींस्तिलाहुतिभिःशेषेणस्विष्टकृतमित्यादिग्र

Indira Gandhi National
Centre for the Arts

ज्य भागांते यजमानो यथा दैवतं त्यागं कुर्यात् तदनंतरं होमांते स्विष्टकृदादि नवाहु
त्यं बलिदानं पूर्णाहुतिः प्रणीतानिनयनं संस्रावजपः दंपत्योरभिषेकः धौतवस्त्रं च।
चंदनादिधारणं। आज्यं रूपं रूपमित्यवलोक्य सदक्षिणं दत्वा पूर्णाहुतिं हुत्वा कृतं कर्म
समर्पणं कृत्वा। आचार्याय वस्त्रयुग्मसहितसोपस्करगोनिष्क्रयदानं ऋत्विग्भ्यो हि
रण्यनिष्क्रयदानं स्थापितदेवतानां च पूजनविसर्जने आचार्यहस्ते प्रतिपादनं च
अग्नेः पूजनविसर्जने यथाशक्ति ब्राह्मणभोजनस्य संकल्पः भूयसीदानस्य च विष्णु
स्मरणं तदर्पणं च कुर्यात् इति कृष्णचतुर्दशीशांतिः अथ सिनिवालीकुहूशांतिः। राम:
प्रयोगपारिजाते गार्ग्यः सिनिवाल्यां प्रसूतास्याद्यस्य भार्या पशुस्तथा गजाश्वमहिषी ७३

चैव शक्रस्यापि श्रियं हरेत् ये संति सकलाश्चान्ये स्वप्रसादोपजीविनः वर्जयेत्तान शेषांस्त
पश्चपक्षिमृगादिकान् कुहूप्रसूतिरत्यर्थं सर्वदोषकरा स्मृता यस्य प्रसूतिस्तेषां तस्यायुर्ध ३२
ननाशनं सर्वांगं सममस्तत्र दोषस्तु प्रबलो भवेत् शांतिं विना विशेषेण परित्यागो विधीय
ते परित्यागान्तत्र शांतिं कुर्यादिमां विचक्षणः तत्फलं तत्क्षणार्धेन पुनरेवानुपालनेन।
त्यजेत्संदिग्धमोहाद्यो न ज्ञानतोपि वा तद्योगं नाश्नुयेत्किंचित्स्वयं वा नाशमश्नुते कल्यो
क्तशांतिः कर्तव्या शीघ्रं दोषानुपत्तये रुद्रः शक्रश्च पितरः पूजास्यर्द्देवताः क्रमात् कर्षमा
त्रसुवर्णेन तदर्धार्द्धेन वा पुनः अथवा शक्तितः कुर्याद्वित्तशाठ्यविवर्जितः प्रतिमां कारये
द्धीमान् चतुर्भुजसमन्वितां त्रिशूलवज्रवरदाभयहस्तान्यथाक्रमात् श्वेतवर्णांश्वेतपुष्पां

Indira Gandhi National Centre for the Arts

श्वेतांवरो वृषस्थितो त्र्यंबकेन मंत्रेण पूजां कुर्याद्यथाविधि इन्द्रश्चतुर्भुजो वज्रांकुशधा।
पसतायकाः रक्तवर्णो गजारूढो यत इंद्रेति मंत्रतः पितरः कृष्णवर्णाश्च वर्हितुल्या विमानगाः
षष्ठ्रस्वस्त्रकमंडलुमयस्येव धारिणः येचेहेति मंत्रेण पूजां कुर्यादनंतरं आग्नेयं दिश
मारभ्य कुंभान् कोणेषु विन्यसेत् तन्मध्ये स्थापयेत्कुंभं शताच्छिद्रसमन्वितं तेष्वेव पंचगव्या
दीन्तत्तन्मंत्रैश्च निक्षिपेत् कल्पोणेशपूजनादिवरणांतं कुर्यात् कुहूजनने कुहूजनने स्व
हः कुहूजनने गोमुखप्रसवोपीति केचित् चतुर्दशीविद्धामावास्या सिनीवाली प्रतिका
शांतिः कर्त्तव्या कुर्याद्भूरिघंस्व शक्तितः गोदानं वस्त्रदानं च सुवर्णं चोर्वरां शुभां दशदाना राम:
निचोक्तानि क्षीरमाज्यं गुडस्तथा आज्यावेक्षणमेतानि तत्तन्मंत्रैश्च कारयेत् समिदा ७४

ज्यचरो होमस्तिलमाषैश्च सर्षपैः अश्वत्थप्लक्षपालाशसमिद्भिः खदिरैः शुभैः अष्टोत्तरश
तं मुख्यं प्रत्येकं जुहुयात्ततः त्र्यंबकेन मंत्रेण तिलान्व्याहृतिभिस्ततः चतुर्भिः कलशैर्युक्तं
वृहत्कुंभसमन्वितं शांतिवत्कलशं कार्यमभिषेकं च कारयेत् पितृमातृशिशूनां च अभि
षेकं तु वारुणैः शंकरस्याभिषेकं च कुर्याद्ब्राह्मणभोजनं अन्येषां चैव सर्वेषां ब्राह्मणानां
च तर्पणं यथाशक्त्यानुसारेण द्विजवाचनपूर्वकमिति अथ प्रयोगः कर्त्ता अस्य कुमार
स्य सिनीवालीजननसूचितसर्वारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं सिनीवालीजन
नशांतिं करिष्ये इति संकल्प्य गणेशपूजनादिवरणांतं कुर्यात् कुहूजनने कुहूजनने
स्वहः कुहूजनने गोमुखप्रसवोपीति केचित् चतुर्दशीविद्धामावास्या सिनीवाली।

Indira Gandhi National Centre for the Arts

प्रतिपद्यिवाः कुहूः वेधव्यरहितोदर्शः ततश्चाचार्यः सर्षपविकरणादिप्रार्थनांतं कृत्वो
क्तप्रतिमानामग्न्युत्तारणं कृत्वा स्थंडिलपूर्वभागे विदिक्षु आग्नेयीमारभ्य महीद्यौ
रित्यादिमंत्रैः पदार्थानुसमयेकुंभानास्थाप्य मध्ये शतछिद्रंसंस्थाप्य चतुर्षुजलसेचनं
धद्देषांतेतत्सवितुरित्यादिभिः पंचगव्यानि स्योनापृथिविभवेति पंचमृदः सहिरत्ना
नितिपंचरत्नानि रुवतिभीर्मे इति पंचत्वचः अश्वत्थेव इति पंचपल्लवान् ओषधयः संव
दंत इति पंचधान्यानि हिरंण्यरूप इति हिरंण्यं पंचस्वपि पूर्णादर्वीति पूर्णपात्रनिधानं
तेमध्यमेशक्तिनिर्मितां रुद्रप्रतिमां निधाय त्र्यंबकंमिति मंत्रेण वामरुद्रंश्वेतवस्त्रगंधा रा.म.
दिभिरभ्यर्च्य. दक्षिणेतो यत इंद्रेति भर्ग इंद्रस्त्रिष्टुप् यतइंद्रभयामहे अनेनमंत्रेण इंद्रंसंपू ७५

ज्य. येचेहेति शंखः पितरास्त्रिष्टुप् पितृपूजने वि. येचेहपितरो ये च नेह यांश्च विद्म यां
उचनप्रविद्म त्वंवेत्थयतितेजातवेदः स्वधाभिर्यज्ञं सुकृतंजुषस्व उत्तरतः पितृंत्संपूज्य
चतुर्षुकुंभेषु वरुणंसंपूज्य आपोनोमत्रा इति पठेद्ऋग्वेदी यजुर्वेदी नमो वाच इति शांतिः
ततोगवामंगेषुइतिगां दद्यात् शरण्यं सर्वलोकानां लज्जायारक्षणं परं सुवेषधारिव
स्त्रत्वमतः शांतिं प्रयच्छ मे इति वस्त्रं हिरण्यगर्भगर्भस्थमिति हिरण्यं सर्वभूताश्रया।
भूमिर्वराहेण समुद्धृता अनंतसस्यफलदा अतः शांतिं प्रयच्छ मे इति उर्वरां ततो दश
दानानि गोभूतिलहिरण्याज्यं वासो धान्यं गुडानि च रौप्यं लवणमित्याहुर्दशदानानि
पंडिताः गांभुवंचोक्तमंत्राभ्यां पुनर्दत्वा तिलान्दद्यात् महर्षेर्गोत्रसंभूताः कश्यपस्य ति।

Indira Gandhi National
Centre for the Arts

लास्मृताः तस्माद्दीपप्रदानेनममपापंव्यपोहतेति उक्तमंत्रेणहिरण्यंपुनर्दत्वाज्यंद
द्यात् कामधेनुषुसंभूतंसर्वत्रतुषुसंस्थितं देवानामाज्यमाहारमतःशांतिंप्रयच्छतु
उक्तमंत्रेणवासःपुनर्दत्वाधान्यंदद्यात् सर्वदेवमयंधान्यंसर्वोत्पत्तिकरंमहत् प्रा॥
णिनांजीवनोपायमतः यथादेवेषुविश्वात्माप्रवरश्चजनार्दनः सामवेदस्तुवेदानां
महादेवस्तुयोगिनां प्रणवः सर्वमंत्राणांनारीणांनारीणांपार्वतीयथा तथारसा
नांप्रवरः सदैवेक्षुरसोमतः ममतस्मात्परांशांतिंददस्वगुडसर्वदेतिगुडं प्रीतिर्ये
तःपितृणांचविष्णुशंकरयोःसदा शिवनेत्रोद्भवंरूप्यमतःशांतिं॰ रूप्यं यस्माद्दत्त रामः
रसाः सर्वेनोत्कृष्टालवणंविना शंभोःप्रीतिकरंनित्यमतःशांतिं॰ इतिलवणं इतिद ७६

शदानानि ततःक्षीरंदद्यात् क्षीरजातास्ततःशंखाःक्षीरादमृतसंभवः क्षीरात्क्षीरोदवत्की
र्तिःक्षीरेप्राणस्यसंभवः तस्मात्क्षीरप्रदानेनअतःशांतिं॰ इतिक्षीरं आज्यगुडाद्युक्तमंत्रा
भ्यांपुनर्दत्वाज्यपूर्णेकांस्यपात्रे रूपंरूपमितिसकुटुंबःप्रतिरूपंवीक्ष्यदद्यात् आज्यं
तेजःसमुद्भूतंआज्यंपापहरंस्मृतं आज्यंदेवानामाहारआज्येदेवाःप्रतिष्ठिताइति।
सुवर्णमानेगोचर्म तिलानांद्रोणः सुवर्णरजतयोःसुवर्णतदर्द्धतदर्धान्यतरत् आज्य
स्यपलानिचत्वारिंशत् वाससिद्वित्वं धान्यस्यपंचद्रोणाः एवंगुडलवणयोः दश
हस्तेनदंडेनत्रिंशद्दंडानिवर्तनं दशतान्येवगोचर्म अत्रगवादीनांदक्षिणात्वात्स
दक्षिणमनड्वाहमितितद्वचनाभावाद्द्वितीयदक्षिणात्मकगोधान्यादीविनदक्षिणां

तरायेद्वानचैवेदक्षिणादानकालोदानापत्तिः अग्निगतदीक्षणीपादिगोचरन्यायेनप्र
त्यक्षपाठस्यवलीयस्त्वात् अस्मिन्नवसरेऋत्विगानतिरूपप्रयोनसंभवाच्च आकरेद
शदानोत्तरमुक्तंक्षीरादीदानस्यहोमोत्तरकर्त्तव्यंतात्किंस्तुकिंमूलेनेतिनविद्मः आ
चार्योग्निंप्रतिष्ठाप्यग्रहानाबाह्यसंपूज्यान्वाधानंकुर्यात् चक्षुषीआज्येनेत्यंतेत्रप्र
धानंग्रहान्अर्कादिसमिदाद्याहुतिभिर्विवक्षितसंख्याभिः अंवकं अश्वस्यलक्षपा
शखदिरसमिदाहुतिभिः प्रत्येकमष्टोत्तरशतसंख्याकाभिः आज्याहुतिभिश्चर्वाहुति
भिः सर्षपतिलमाषाहुतिभिश्च प्रत्येकंतावतीभिः इंद्रंपित्रंश्चैवअष्टाविंशतिसंख्याभिः। रामः
अष्टसंख्याभिर्वीक्तरुद्याहुतिभिः प्रजापतिंतिलैः शेषेणेत्यादिप्रथमान्वाधानंत्यागेक्त ७७

प्रमेयकं २

तेप्रयश्चित्तहोमांते। वलिदानंमूर्धानमितिपूर्णाहुतिश्चततोग्रहकुंभसहितचतुः।
कुंभजलयुतशताच्छिद्रेणमातृपितृशिशूनामभिषेकः तत्वायामितित्रिभिः एषांश्च।
नः शेपोवरुणत्रिष्टुप् ततोविभूतिधारणांतेषोडशोपचारैरुद्रस्यइतरेषांचंचोपचारैः
पूजनं विसृज्यताः प्रतिमाआचार्यहस्तेप्रतिपाद्यअग्निंसंपूज्यविसृज्ययथाशक्ति
द्विजानुत्तयाब्राह्मणानन्यांश्चांधपंग्वादीन्भोजयेदिति इतिसिनिवालिकुहूशांतिः
अथदर्शशांतिः नारदः अथातोदर्शजातानांमातापित्रोर्दरिद्रता तद्दोषपरिहारा
र्थंशांतिंवक्ष्यामितेसदापुण्याहंवाचयित्वादौक्रतुसंकल्पपूर्वकं कुंडंवामंडलंकुर्या।
त्तदेशेस्थापयेद्बधः मंडलंसर्वतोभद्रं तत्कुंभेनिक्षिपेद्बद्धंदधिक्षीरघृतादिकं आदिस

Indira Gandhi National
Centre for the Arts

दाक्षोमस्तगोमये न्यग्रोधोदुंबरोश्वत्थत्कृतानिंवकास्तथा एतेषांत्वत्तमस्तानित्वगादी
नंत्वतवांस्तथा एवं रत्नानि निक्षिप्य वस्त्रयुग्मेन वेष्टयेत् सर्वेसमुद्राः कारकाः आपो
हिष्टात्वचेनाथकयानश्चित्र इत्यृचा यत्किंचेदमित्यृचा चैव समुद्रज्येष्ठा इत्यृचा अभिमं
त्र्योदकं पश्चादग्नेः पूर्वप्रदेशके उदकमभिमंत्र पश्चाद्दर्शदेवतास्थापयेदित्याश
यः मंडलं कुर्यादिति यदुक्तं तदाह हारिद्रं रक्तकं चैव कृष्णं श्वेतं च नीलकं एतेषां तंडुलै
श्चैव सर्वतोभद्रमुद्धरेत् दर्शस्य देवता पश्चात्सोमरूपेस्वरूपकां प्रतिमां सुवर्णजानि
त्यं राजती ताम्रजास्तथा दर्शदेवताः पितरः तद्रूपां प्रतिमां स्थापयेद्वैदित्यनेदेनान्व रामः
पः कुर्यात्पितृत्वामग्रापीदं सर्वतोभद्रमध्येच स्थापयेद्दर्शदेवताः ग्रहवर्णवस्त्रयु ७८

गंतवर्णगंधपुष्पकं आप्यायस्वेति मंत्रेण सविता पश्चात्तथैव च उपचारैः समाराध्यता।
तो होमं समारभेत् कृत्वा वह्निं प्रतिष्ठाप्य तु संकल्पमीदृशं आयुरारोग्यसिध्यर्थं सर्वा।
रिष्टप्रशांतये पुत्रस्य दर्शजननदोषनिर्हरणाय च मातापित्रोः कुमारस्य सर्वारिष्टप्र
शांतये तेषामायुः श्रियै चैव शांतिहोमं धेनुं च मंत्रतः एतैर्मंत्रैश्च प्रत्येकं कुर्नेदष्टोत्त
रंशतं एतैरितिवचनं प्रणवस्वाहाकारसाहित्याभिप्रायेणानुवादः अत एवाह दर्श
स्य देवताहोमस्त्वष्टाविंशतिसंख्यया होममेवं तु कृत्वाथ विदध्यादभिषेचनं श्री
सूक्तमायुष्यसूक्तं समुद्रज्येष्ठा इत्यृचा एतैर्मंत्रैरभिषेकं मातापित्रोः शिशोस्तथा
ततः स्विष्टकृदादिः स्याद्धोमशेषं समापयेत् हिरण्यं रजतं चैव कृष्णां धेनुं सदक्षिणां आ

Indira Gandhi National
Centre for the Arts

न्योन्योपि यथाशक्त्या दातव्या दक्षिणा तथा ब्राह्मणान्भोजयेत्तत्र कारयेत्स्वस्तिवाच
नमिति अथप्रयोगः कर्त्ता कृतनित्यक्रियः पवित्रपाणिः सपत्नीकः स्वासने उपविश्य देश
कालसंकीर्त्तनांते अस्य बालस्य दर्शजननसूचितसर्वारिष्टपरिहारद्वारा श्रीपरमेश्वर
प्रीत्यर्थं दर्शजननशांतिं करिष्ये अखंडामाजनने इत्थं संकल्पः अमायाः खंडतिथित्वेन
तरविद्धामाजनने कुहूजननशांतिं करिष्ये इति संकल्पे विशेषः ततो गणेशपूजन
पुण्याहवाचनाचार्यऋत्विग्वरणादिपूजनादि कुर्यात् तत आचार्यो यदत्र संस्थितं रामः
मित्यादिस्वस्त्ययनं तार्क्ष्यमिति प्रार्थनांतं कुर्यादिति तत आचार्यः कुंडस्थंडिलाद्या ७९
पूर्वे सर्वतोभद्रपर्याप्तं स्थलमतिक्रम्य महिद्यौरित्यादिकुंभस्थापनादिजलचसेनांतं॥

कृत्वा तत आप्यायस्वेति क्षीरं दधि घृतानि प्रक्षिप्य गायत्र्या गोमूत्रं गंधद्वारामिति च गोमयं
ये प्रक्षिप्य न्यग्रोधोदुंबराश्वत्थप्लक्षनिंबमूलानि रुवतिभीम इति पंचत्वचः अश्वत्थे
व इति पंचपल्लवान् सहिरण्यानीमिच पंचरत्नानि निक्षिप्य युवासुवासा इति वस्त्रयुग्मे
नावेष्ट्य सर्वे समुद्राः कारका इति मंत्रेण समुद्रादिदेवतासहितं वरुणमावाह्य संपू
ज्य कलशोदकं आपो हि ष्ठेति तच्चेन रूपान्श्चित्र इत्यृचा यत्किंचेदं वरुणदैव्ये जा
ने मित्रो मनुष्या इश्चरामसि अचित्ती यत्तव धर्मा युयोपिम मानस्तस्मादेनसो देवरीरि
षः समुद्रज्येष्ठा इति ऋक्त्र्यां चाभिमंत्र्य ततो ऽग्नेः पूर्वभागे कृष्णनीलरक्तादि
वर्णतंदुलैर्यथोचितं परिस्तरे खलावल्लीमध्यादिगर्भं कृत्वा तत्र तलादिप्रसिद्धदेव

ताः पूजां तेमध्ये सुवर्णप्रतिमायां पितॄनावाहयेत् ये चेह इति मंत्रेण शंखः पितरः त्रिष्टुप् पि
तृपू° दक्षिणतो रजतप्रतिमायां सोमं उत्तरतस्ताम्रप्रतिमायां सूर्यं वा आवाहयेत् आप्या
यस्व गोतमः सोमो गायत्री आप्यायस्व गोतमः सोमो गायत्री आप्यायस्व समेतु ते विश्व
तः सोम वृष्ण्यं भवा वाजस्य संगथे सविता पश्चात्तादित्ता नामाकः सविता त्रिष्टुप् सवि
ता पश्चातात्सविता पुरस्तात्सवितोत्तरात्तात्सविताधरात्तात् सविता नः सुवतु सर्वता।
तिं सविता नो रासतां दीर्घमायुः ततो देवतात्रयं संपूज्याग्निं प्रतिष्ठाप्य सर्वतोभद्रस्थे राम:
शान्यां ग्रहप्रतिष्ठापनादि वरुणपूजनांतेन्वादध्यात् चक्षुषी आज्येनेत्यंते आदि। ८०
त्यादि ग्रहान् चिकीर्षितसंख्याकाभिः समिच्चर्वाज्याहुतिभिः पुनरत्र प्रधानं सवितारं

सोमं च अष्टोत्तरशतसंख्याभिः समिच्चर्वाहुतिभिः पितॄन् प्रत्येकं अष्टाविंशतिसंख्या
भिः समिच्चर्वाहुतिभिः शेषेण स्विष्टकृतमित्यादि पर्यग्निकरणकाले आज्येन सर्वाः
पर्यग्निकरणादि आज्यभागांते आयुरारोग्य इति मंत्राभ्यां यजमानेन होमसंकल्पपूर्वा
कं त्यागे कृते सर्द्धिगाचार्यः यथान्वाधानं प्रधानहोमं कुर्यात् तदंते स्विष्टतं पूर्वे हिरण्य
वर्णामिति आयुष्यं वर्चस्यमिति सूक्ताभ्यां समुद्रज्येष्ठा इत्यृचा च सवालौ पितराव भिषि
च्य स्विष्टकृदादि कुर्यात् ततो बलिदानपूर्णाहुति कृत्वा होमशेषं समापयेत् ततो
यजमानो हिरण्यरजतसदक्षिणां कृष्णां धेनुं च आचार्याय दत्वा ऋत्विग्भ्यश्च यथा
शक्ति दक्षिणां दत्वास्याः पितृदेवताक्रमेणोत्तरपूजाक्रमेणोत्तरपूजा विसर्जने

Indira Gandhi National Centre for the Arts

कृत्वाप्रतिमामाचार्यायप्रतिपाद्यआंविसंप्रगच्छगच्छेतिविसृज्यशांतिः पठित्वाब्राह्मणा
भोजयित्वातेभ्योदक्षिणांदानांतेस्वस्तिभवंतोब्रुवंत्विनिवाचयेत् चेतस्वस्तीतिवदेयुः
इतिदर्शशांतिप्रयोगः इतितिथिशांतयः अथनक्षत्रशांतयः अथमूलशांतिविधिः
शौनकः अथातः संप्रवक्ष्यामिमूलजाताहितायच मातापित्रोर्धनस्यापिकुलशांति
हितायच त्यागेवामूलजातस्यस्यादष्टाष्टास्यदर्शकं एवंक्रमुक्तमूलजातानोपरि
।त्यागोविधीयते अदर्शनाद्यापिपितुः सतुतिष्ठेत्समाष्टकं एवंचदुहितुर्ज्ञेयंमू
।लजातफलंबुधैः अन्यत्रतु नवालाहंतिमूलक्षेपितरंमातरंतथा मूलजाश्वश्रु राम:
रंहंतिव्यालजाचतदंगना माहेंद्रजाग्रजंहंतिदेवरंतुद्विदैवजा। शांतिर्वापुष्क ८२

---

लास्याछेदर्हिदोषोनविद्यतइति व्यालआश्लेषा माहेंद्रंज्येष्ठाद्विदैवंविशाखा मुख्यकालं।
प्रवक्ष्यामिशांतिहोमस्ययत्नतः जातस्यद्वादशाहेतुजन्मर्क्षेवाशुभेदिने समाष्टकेद्वाद।
शाकुर्याद्वाशांतिमादरात् अन्यराद्धेसमाष्टकेद्वादशाहेइतिमदनरत्नेपाठः सुसमेपुंण्यदे
शेतुमंडपंकारयेद्बुधः पुण्याभिर्मंत्रितेस्तोयैःप्रोक्षितायांक्षितौततः तत्रोदकुंभंसुलक्षणं
स्फुंव्रणविजितं अच्छन्नमूलंनिर्णिक्तंपूरयेन्निर्मलांभसा वस्त्रावगुंठितंकुर्यात्पूरयेत्त्री
र्थवारिणा कार्यंहेमसमायुक्तंचूतपल्लवशोभितं स्वस्तिकोपरिविन्यस्यव्रीहिराशिसपल्ल
वैः द्रोणव्रीहीश्चनिःक्षिप्यईशान्यांचनिधापयेत् पंचरत्नानिजपस्यपंचकुंभांश्चदर्पवा।
दत्तामतः श्रीरुद्रस्यैककुंभश्चसर्वस्वत्त्वानितत्रतु तथान्यंचशुभंकुंभंपूर्वोक्तैर्लक्षणैर्युतं

Indira Gandhi National Centre for the Arts

चतुःप्रस्रवणं कुर्यात्पंचवक्त्रं तथैव च वस्त्रावगुंठितं कुर्यात्स्नपयेत्तीर्थवारिणा पंचरत्नसमा
युक्तमाम्रपल्लवसंयुतं गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात् राजद्वारप्रदेशाच्च मृद
मानीय निःक्षिपेत् कुंभस्य नैरृते देशे होमस्थानं प्रकल्पयेत् गोमयालेपिते देशे कुर्यात्स्थं
डिलमुन्नतं कृत्वाग्निमुखपर्यंतमुल्लेखादिक्रमतः प्रणीतापात्रनिधानांतं कृत्वा पूजां स
मारभेत् नक्षत्रदेवतारूपं सुवर्णेन प्रयत्नतः निष्कमानेन चार्धेन पादेनाथ स्वशक्तितः
प्रमाणलक्षणेनैकां कारयित्वा विचक्षणः पंचामृतं सुवर्णस्य स्थापयित्वा प्रपूजयेत् ।
सुवर्णदेवत्यं सर्वदेवात्मकोनलः सर्वदेवात्मको विप्रः सर्वदेवमयो हरिः संस्मरेन्निरृतिं राम:
शामं सुमुखं नरवाहनं रक्षोधिपं खड्गहस्तं दिव्याभरणभूषितं प्रतिमापूजनार्थाय वल्ल ८२

युग्मं प्रकल्पयेत् पंकजं कारयेद्धीमान् रक्तामलैर्व्रीहितंडुलैः चतुर्विंशद्दलोपेतं स्वकेचर्चाकर्णि
कान्वितं तस्योपरि न्यसेत्पात्रं स्वर्णवारौप्यमन्मये शुद्धवस्त्रेण संछाद्य तत्र मूलानि नि
क्षिपेत् मूलानि शतमूलानि तदभावे विष्णुक्रांता सहदेवी तुलसी तु शतावरी मूलनामा
निगृह्णीयात्तदभावे विशेषतः स्थापयेत्कर्णिकामध्ये व्रणगंधाद्यलंकृतं कूर्चहोमज
लोपेतं कुंकुमौषधिसंयुतं कुंभोपरि न्यसेद्विद्वान्मूलनक्षत्रदेवतां अधिप्रत्यधिदेवौ च
दक्षिणोत्तरदेवयोः अधिदेवं यजेदादौ ज्येष्ठानक्षत्रदेवतां तथा प्रत्यधिषाढां च पूज
येद्देवतां शुभां उत्तराषाढनक्षत्राद्या अनुराधांतमर्चयेत् इन्द्रादिशानपर्यंतं पूजमास्व
स्वनामतः स्वस्वलिंगोक्तमंत्रैश्च प्रधानादि प्रपूजयेत् पंचामृतेन संस्थाप्य आवाह्य

[...]ndhi National Centre for the Arts

समर्चयेत् आवाह्येति लघ्वोपेतं पंचमी अर्घ्येति पूर्णपात्रनिधानांते कृत्वेत्यस्या आनंतर्या
नुवादः अतएवाह उपचारैः षोडशभिरिति आवाहनमारभ्यार्चनविवरणं उपचारैः षोड
शभिर्यद्वा पंचोपचारकैः रक्तचंदनगंधाद्यैः पुष्पैः कृष्णसितादिभिः मेषशृंगादिधूपैश्च
घृतदीपैस्तथैवच सुरापोलिकमांसाद्यैर्नैवेद्यैर्भोजनादिभिः मत्स्यमांससुरादीनी ब्रा
ह्मणानां विवर्जयेत् सुरास्थाने प्रदातव्यं क्षीरं सैंधवमिश्रितं पायसं लवणोपेतं मांस
स्थाने प्रकल्पयेत् कुंकुमाद्यापलाभे तु यथालाभं समर्चयेत् पुष्पांतं तु समभ्यर्च्य होमं कु
र्याद्यथोदितं निर्वापप्रोक्षणादीनि चरोः कुर्याद्यथाविधि हविर्गृहीत्वा विधिवन्निरू  रामः
प्येच हुत्वा हुनेत् पायसं घृतसंमिश्रं हुनेदष्टोत्तरं शतं विधिवदिति पायसचर्वोः प्रतिप्र  ८३

अन्यथानर्थक्यात् समिदाज्यचरून्पश्चाच्छक्तितः संख्यया हुनेत् पश्चात्पायसहोमो
त्तरं अधिदैवतयोश्चैव जुहुयात्स्वसमंत्रतः चतुर्थ्यंतैर्नमोंतैश्च स्वाहांतैः स्वस्वमंत्रकैः
नक्षत्रदेवताभ्यश्च पायसेन तु होमयेत् कृणुष्वेति पंचदशभिर्जुहुयात्क्रमशः ततः गयस्फा
जातवेदसे त्र्यंबकमिति क्रमात् सीरायुंजंतिताममित्रिवास्तोष्पतिमेवच क्षेत्रस्यपतिगणाना
त्वं दूतं तथैवच श्रीसूक्तेन तथा विद्वान्समिदाज्यचरून् अष्टोत्तरशतैर्वा पंचविंशतिभिः
क्रमात् अष्टासंख्यया वापि जुहुयाच्छक्तितो बुधः त्वं न सोमेन पायसं जुहुयात्तु त्रयोदश च
तुर्गृहीतमाज्यं च यातेरुद्रेति मंत्रतः स्रुवेण जुहुयादाज्यं महाव्याहृतिभिः क्रमात् हु
त्वा स्विष्टकृतं पश्चात्प्रायश्चित्ताहुतिर्हुनेत् आचार्यो यजमानो वा अग्नौ मंत्रैः पूर्णाहुतिं

Indira Gandhi National Centre for the Arts

हुनेत् होमशेषं समाप्याथ वह्निमारोपयेद्बुधः कुंभाभिमंत्रणं कुर्याद्दक्षिणेनाभिमर्शयेत् म
त्स्यूपशमनार्थाय जप्तव्यं च केशतं रुद्रं कुंभो क्रमार्गेण हस्तं क्षं स्यशं जपेत् धूपं दीपं च
नैवेद्यं कुंभयुग्मे निवेदयेत् प्रासादयेत्ततो देवमभिषेकार्थमादरात् तस्मिन्काले
ग्रहातीच्यं कर्त्तव्यं भूतिमिच्छता पृथक्प्रसस्तं तेनैव नक्षत्रे व्यासचैव वा अभिषे
कविधिर्वक्ष्ये सर्वान्वार्यैरुदीरितं भद्रासनोपरि विष्टस्य यजमानस्य ऋत्विजः दारपु
त्रसमेतस्य कुर्युः सर्वेभिषेचनं अद्विभ्यामिति सूक्तेन यावमानीभिरेव च आपोहि
ष्टेति नवभिरापद्द्वादयेन च सहस्राक्षत्र्चेनाभिदेवस्य त्वेति मंत्रकैः शिवसंकल्प रामः ८४
मंत्रेणावक्ष्यमाणैश्च मंत्रकैः योसौ वज्रधरो देवो महेन्द्रो गजवाहनः मूलजातशि

श्वेशोदोषं मातापित्रोर्व्यपोहतु १ योसौ शक्तिधरो देवो हुतभुङ्मेषवाहनः सप्तजि
देवोग्निर ह्वः ~~[illegible]~~ मूलदोषं व्यपोहतु २ योसौ शक्तिधरो देवो हुतभुग्दंडधरो देवो धर्मो म
हिषवाहनः मूलजातशिशोर्दोषं व्यपोहतु यमो मम ३ योसौ खड्गधरो देवो निर्ऋतिरा
क्षससाधिपः प्रशामयतु मूलोत्थं दोषं गंडांतसंभवं ४ योसौ पाशधरो देवो ~~[illegible]~~ वरुणश्च
श्च जलेश्वरः नक्रवाहः प्रचेता नो मूलदोषं व्यपोहतु ५ योसौ देवो जगत्प्राणो मारुतो
मृगवाहनः प्रशामयतु मूलोत्थं दोषं बालस्य शांतिदः ६ योसौ निधिपतिर्देवः खड्गधृ
ग्वाजिवाहनः मातापित्रोः शिशोश्चैव मूलदोषं व्य० ७ योसौ पशुपतिर्देवः पिनाकी वृ
षवाहनः अश्लेषामूलगंडांतदोषमाशु व्य० ८ विघ्नेशाद्यैत्रयोदुर्गालोकपालानव

...i National
Centre for the Arts

ग्रहाः सर्वदोषप्रशमनं सर्वे कुर्वंतु शांतिदाः एतत्कुंभोदभिषेकं तु सर्वदोषोपशांतये सर्वका
मप्रदं दिव्यं मंगलानां च मंगलं वस्त्रांतरितकुमार्यां पश्चात्तु स्नापयेद्बुधः ततः शुक्लांबरधरः क
ल्कमाल्यानुलेपनः यजमानो दक्षिणाभिस्तोषयेदृत्विक्कादिकान् धेनुं पयस्विनीं दद्यादा
चार्याय सवत्सकां निर्ऋतिप्रतिमा वस्त्रं कुंभं देहं मंचदापयेत् ग्रहार्थवस्त्रप्रतिमास्तत्तद्
ग्रहाश्च दक्षिणाः श्रीरुद्रजापिनो देयः कृष्णोनड्वान्प्रयत्नतः तत्कुंभवस्त्रप्रतिमा तस्मै देया
प्रयत्नतः इतरेभ्योपि विप्रेभ्यो यथाशक्त्या च दक्षिणा ग्रहलाभे ततो दद्यादाचार्यो लक्ष
ऋत्विजां तन्मूल्यं प्रदातव्यं यथाशक्त्या प्रदापयेत् आचार्याय च यद्दत्तं तदर्धं च लक्षणे राम:
भवेत् दद्यादन्नं पायसादि ब्राह्मणान्भोजयेच्छतं अभावे सति पंचाशद्दशकं तदभावतः ५५

सर्वशांते श्वपठनं ब्राह्मणैराशिषस्तथा गृहीत्वा समापयेद्विप्रान्निर्ऋतिः प्रीयतामिति विधानेदरित
स्मिंस्कृते ततः शांतिर्भविष्यत्येव गंडांतेप्येवं कर्तव्यं पुण्यार्थं तद्वदेव हि समाष्टके द्वादशाहे कुर्या
द्वृणोतिमादरात् इत्युक्तं मनुना सम्यक् मूलजातहिताय च मातापित्रोर्धनस्यापि बंधु
शोकानुपपत्तये इति विधिः अथैतदनुसारी प्रयोगः अमुकमूलोत्पन्नो वर्षाष्टक सहि
तद्वादशाहांते द्वादशाहांते वा तदन्यमूलोत्पन्नो तु द्वादशाहे अव्यवहितागामिमूलनक्षत्रयु
ते अमुके दिने वा गोप्रसवशांतियुक्तं विधिना कृत्वा देशकालकीर्तनांते अस्य कुमारस्य मूल
प्रथमचरणजन्मसूचितसर्वारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं सग्रहमखां शांतिं क
रिष्य इति संकल्प्य गणपतिपूजनादि ऋत्विग्वरणांतं कुर्यात् द्वितीयादिचरणोत्पन्ने तु

National Centre for the Arts

संकल्पो होवो ध्याः ब्रह्म सदस्यौ कृताकृतौ ऋत्विजश्चाष्टौ द्वादश षोडश वा ब्राह्मणाः श्रोत्रि
याश्चाष्टौ द्वादश वा षोडशेति कश्यपोक्तेः अत्यंताशक्तौ चत्वारोपि यथाशक्ति वस्त्रालं
कारमधुपर्केणान्यथा वा तेषां पूजनं ततआचार्यः पवित्रपाणिः प्राणानायम्य यथाचारं सं
कल्प्य भूमीकृत पुण्यदेशे यदत्र संस्थितमिति सर्षपान्विकीर्य एतोन्विंद्रं स्तवामेति तिसृ
भिर्ऋग्भिः जलमभिमंत्र्य तेन आपो हि ष्ठेति तृचेन तां भूमिं प्रोक्ष्य मंडपपक्षे मंडपदेवताप्र
नं माघकृत्वोक्तविधिना कुर्यात् ततः प्रतिमाग्न्युत्तारणं कुर्यात् मंडपस्यद्रतदभावेशो।
ह्नित भूमे वा ऐशान्यां स्वस्तिकं विरच्य मही द्यौरिति भुवं स्पृष्ट्वा ओषधयः समिति व्रीहिणा व्री राम:
हीन्क्षिपेत् अथोक्तलक्षणं कलशं प्रक्षालितं वस्त्रावगुंठितं युवा सुवासा इति कृत्वा तीर्थे ८६

---

वारिणे मे मंगंगे त्याद्यर्थर्चाः इति हिरण्यरूप इति कूर्चं हेमसमायुक्तं विधाय कृतपक्वे वा।
संयुक्तं स्वस्तिके व्रीहिषु विन्यस्य सपल्लवः क्षीरद्रुमशाखा अश्वत्थे व इति निःक्षिप्य सहि
रत्नानिति या ओषधीरिति सर्वौषधीः गंधद्वारामिति गंधं याः फलिनीरिति पुष्पफले ओ
षधयः समिति यवान् कांडात्कांडादिति दूर्वाः स्योनेति मृदः आपो हि ष्ठेति तृचेन पंचगवा।
व्यं निःक्षिप्य पूर्णा दर्वीति पूर्णपात्रं निधाय तस्मात्कलशाच्चतुर्दिक्षु मही द्यौरित्या
मंत्रावृत्त्या चतुर्णां कलशानां पूर्णपात्र निधानं तं कृत्वा मध्यम कलशस्य साष्टदलं वा
सस्तिहेमप्रतिमायां याते रुद्रेति मंत्रस्य कश्यप ऋषिः रुद्रः स्वरानुष्टुप् तेना मंत्रेण रुद्रमावाह्य
तेनैव संपूज्य यजुर्वेदी यजमानश्चेद्रुद्रसूक्तजपे कंचिद्विप्रं जपेत् छंदोगश्चेद्रुद्रसामज

Indira Gandhi National Centre for the Arts

येसाम गाल्यीन्यो जपेत् तेपि कल्पशंस्य शंतो जपेयुः सूक्तसाम जपयोः रेकादशाष्टवित्रे
कसंख्यानो विकल्पः कद्रुद्रायेति नवर्चस्य घोरः कण्वो रुद्रो गायत्री इमारुद्रायेत्येकादशर्च
स्य सूक्तस्य कुत्सो रुद्रो नवजगत्यो ते त्रिष्टुभौ आ ते पितरिति पंचदशर्चस्य रुद्रस्त्रिष्टुप् सर्वेषां
जपे· सूक्तांतरसत्वेन जापः बहुवचनस्य त्रित्वपपत्तेः आ वो राजानमिति त्र्याणां साम्नां
वामदेवो रुद्रस्त्रा द्यात्रिष्टुप् द्वयोर्गायत्री जपेवि· चतुर्णामप्येषामपि तत्रैव जपः तत्रब्रा
संदेशपाठात् आशुः शिशान इति सूक्तस्येंद्रो प्रतिरथ इंद्रश्चतुर्थ्या बृहस्पतिस्त्रिष्टुप् आं
त्यानुष्टुप् त्वमग्ने रुद्र इत्यनुवाकस्य हव्यवाड् ऋषिः अग्न्यात्मा रुद्रो देवता जगती छंदः राम:
जपे· त्वमग्ने रुद्रो असुरो महो दिवस्त्वं शर्धो मारुतं पृक्ष ईशिषे त्वं वातैररुणैर्यासि शंगय ८७

---

त्वं पूषा विधतः पासि नु त्मना त्वमग्न इत्यस्य वामदेवोग्निस्त्रिष्टुप् जपे· त्वमग्ने अदिति
र्देव दाशुषे त्वं होत्रा भारती वर्धसे गिरा त्वमिळा शतहिमासि दक्षसे त्वं वृत्रहा वसु
।पते सरस्वती रक्षोहणमिति पंचविंशर्चस्याङ्गिरसः पायुरग्निस्त्रिष्टुप् चतस्रोंत्या अ
नुष्टुभः सर्वे जपे· रक्षोहणं वाजिनमाजिघर्मि मित्रं प्रथिष्ठमुपयामि शर्म शिशानो अग्निः
क्रतुभिः समिद्धः स नो दिवा स रिषः पातु नक्तं अयोदंष्ट्रो अर्चिषा यातुधानानुपस्पृश
जातवेदः समिद्धः आ जिह्वया मूरदेवान् रभस्व क्रव्यादो वृक्त्व्यपि धत्स्वासन् उभो
भयाविन्नुप धेहि दंष्ट्रा हिंस्रः शिशानो वरं परं च उतांतरिक्षे परि याहि राजन्जंभैः संधेहि
अभि यातुधानान् यज्ञैरिषूः संनममानो अग्ने वाचा शल्यां अशनिभिर्दिहानः ताभिर्विध्य

Centre for the Arts

हृदयेयातुधानान्प्रतीचोबाहून्प्रतिभंध्येषां। अग्नेत्वचंयातुधानस्यभिंधिहिंस्राशनिर्हरसा
हंत्वेनंप्रपर्वाणिजातवेदःशृणीहिक्रव्यात्क्रविष्णुर्विचिनोतुवृक्णं।यत्रेदानींपश्यसिजात
वेदस्तिष्ठंतमग्नउतवाचरंतं।यद्वांतरिक्षेपथिभिःपतंतंतमस्ताविध्यशर्वाशिशानः।उताल
ब्धंस्पृणुहिजातवेदआलेभानादृष्टिभिर्यातुधानात्। अग्नेपूर्वोनिजहिशोशुचानआमा
दःक्ष्विंकास्तमदंत्वेनीः। इहप्रब्रूहियतमःसोअग्नेयोयातुधानोयइदंकृणोति। तमारभस्व
समिधायविष्ठनृचक्षसश्चक्षुषेरंधयैनं। तीक्ष्णेनाग्नेचक्षुषारक्षयज्ञंप्रांचंवसुभ्यःप्रण
यप्रचेतः। हिंस्रंरक्षांस्यभिशोशुचानंमात्वादभन्यातुधानानृचक्षः। नृचक्षारक्षःपरिपा। रामः
श्यविक्षुतस्यत्रीणिप्रतिशृणीह्यग्रा। तस्याग्नेपृष्टीर्हरसाशृणीहित्रेधामूलंयातुधानस्य ८८

वृश्च। त्रिर्यातुधानःप्रसितिंतएत्वृतंयोअग्नेअनृतेनहंति। तमर्चिषास्फूर्जयंजातवेदःस
मक्षमेनंगृणतेनिवृंग्धि। तदग्नेचक्षुःप्रतिधेहिरेभेशफारुजंयेनपश्यसियातुधानं। अ
थर्ववज्ज्योतिषादैव्येनसत्यंधूर्वंतमचितंन्योष। यदग्नेअद्यमिथुनाशपातोयद्वाचस्तृ
ष्टंजनयंतरेभाः। मन्योर्मनसःशरव्याजायतेयातयाविध्यहृदयेयातुधानान्। परा
शृणीहितपसायातुधानान्पराग्नेरक्षोहरसाशृणीहि। परार्चिषामूरदेवांछृणीहि
परासुतृपोअभिशोशुचानः। पराद्यदेवावृजिनंशृणंतुप्रत्यगेनंशपथायंतुतृष्टाः।
वाचास्तेनंशरवऋछंतुमर्मन्विश्वस्यैतुप्रसितिंयातुधानः। यःपौरुषेयेणक्रविषास
मंक्तेयोअश्व्येनपशुनायातुधानः। योअघ्न्यायाभरतिक्षीरमग्नेतेषांशीर्षाणिहरसापिवृ

hi National Centre for the Arts

य संवत्सरीणं पय उस्रियायास्तस्य माशीद्यातुधानो नृचक्षः पीयूषमग्ने यतमस्तितृप्सात्तं प्र
त्यंचमर्चिषा विध्य मर्मन विषं गवां यातुधानाः पिबंत्वावृश्च्यंतामदितये दुरेवाः परैनान्देवः
सविता ददातु परा भागमोषधीनां जयंतां सनादग्ने मृणसि यातुधानान्न त्वा रक्षांसि पृतना॥
नाजिग्युः अनुदह सहमूरान्क्रव्यादो मा ते हेत्या मुक्षत दैव्यायाः त्वन्नो अग्ने अधरादुदक्ता
त्वं पश्चादुत रक्षा पुरस्तात् प्रति ते ते अजरासस्तपिष्ठा अघशंसं शोशुचतो दहंतु पश्चात्पु
रस्तादधरादुदक्तात्कविः काव्येन परि पाहि राजन् सखे सखायमजरो जरिम्णेग्ने मर्त्तां॥
अमर्त्यस्त्वं नः परि त्वाग्ने पुरं वयं विप्रं सहस्य धीमहि धृषद्वर्णं दिवे दिवे हंतारं भंगुरावतां रामः
विषेण भंगुरावतः प्रति ष्म रक्षसो दह अग्ने तिग्मेन शोचिषा तपुरग्राभिर्ऋष्टिभिः प्रत्यग्ने ८९

हरसा हरः शृणीहि विश्वतः प्रति यातुधानस्य रक्षसो बलं विरुज वीर्यं अत्रापि शक्त्या
पूर्वोक्तसंख्यास्वीकारः ततस्त्र्यंबकमंत्रस्याष्टोत्तरसहस्रजपं तत्रैव कश्चित्कुर्यात्
पावमानीनां तिसृणां मधुमंछंदाः पवमानः सोमो गायत्री अन्यकलशेषु शांतिजपमृ
त्विजः कुर्युः यद्वा कुंभपंचकस्थाने कुंभपंचकं स्थाप्य तत्रैव रुद्रादिजपः अन्यकुंभे तदुत्त
रस्य वरुणमावात्वशांतिजपः यद्वा चतुःप्रस्रवण एकवक्त्रकुंभः पंचकुंभचतुष्टयस्यैक
स्थाने स्थापनीयः तत्र मुख्यमध्यमकुंभकार्यं चतुर्षु प्रस्रवणेषु कुंभचतुष्टयं कार्यं क
र्तव्यमिति व्यवस्था ततः स्थापितकुंभोत्तरतो रक्तवर्णैः शुक्लैर्वा व्रीहितंदुलैश्चतु
र्विंशद्दलोपेतं सकर्णिकं पंकजं विधाय तत्कर्णिकायां मही द्यौरिति भुवं स्पृष्ट्वा ३७

dhi National
Centre for the Arts

घघपः समितित्वाहं।नि: क्षिप्यशिखादीनिशतंमूलानि तदभावे विष्णुक्रांतासदेदेवीतुल
शीशतावरीनिक्षिप्योक्तमंत्रैर्गंधाघलंकृतंकूर्चहोमोपेतंकुंकुमसर्वौषधीसंयुतंवि
धायाकलशेक्षितिकर्णिकायांस्थापयेत्ततः पर्वेयाओषधीरित्यादिभिर्मंत्रैर्यवादिप्रक्षे
पंतंकृत्वापूर्णादर्वीतिनिहितपूर्णपूर्णपात्रेसाद्दष्टदलंवस्त्रंनिधानिष्कंतदर्धार्धान्य
तरमानेनहेमनिर्मितांनिर्ऋतिप्रतिमांतराणिपंचामृतेनप्रक्षाल्यतत्रवस्त्रेनिर्ऋतिप्रतिमां
तद्दक्षिणतउत्तरत्तरतश्चेंद्रीपप्रतिमांपूर्वादिक्लेविश्वेदेवप्रतिमास्तदभावेतंदुलपुंजा
न्वानिधायप्राच्यादिस्थानेषुलोकपालप्रतिफलादिवानिधायप्रतिमासुदेवताआवा राम:
हयेत् तद्यथा मोषुणोघोरःकण्वोनिर्ऋतिर्गायत्री इदंवोमधुच्छंदाइन्द्रोगायत्री अस्कमेमे ९०

धातिथिरापोनुष्टुप् पूर्वादिविश्वान्देवानावाहयामि विष्णुं वसून् वरुणं अजैकपादः
अहिर्बुध्न्यं पूषा अश्विनौ यमं अग्निं प्रजापतिं सोमं रुद्रं अदितिं बृहस्पतिं सर्पान् पितृन्।
अर्यमणंसवितारं त्वष्टारं वायुं इंद्राग्नी मित्रं इत्यावाहनांतेषडमरवरीत्यालोकपालानावा
ह्य नैर्ऋतप्रदेशेस्थंडिलाग्निप्रतिष्ठापनांतंकृत्वाततोन्वाधानंकुर्यात् आज्येनेतेआ
दित्यादिग्रहान्प्रत्येकमर्कादिजातीयसमिच्चर्वाज्याहुतिभिरेतत्संख्याकाभिः अधिदेवताः
प्रत्यधिदेवताः विनायकादींत्रपालांतांलोकपालांश्च पूर्वोक्ताहुतिभिरेतत्संख्याभिः
निर्ऋतिंप्रत्येकंअष्टोत्तरशतसंख्याभिर्घृतसंमिश्रपायससमिदाज्य चर्वाहुतिभिः समि
दाद्याहुतीनांशक्तितोन्यूनसंख्याकरणेतथैवनिर्देशः इदंद्रपश्चप्रतिद्रव्यमष्टावि
...dhi National
Centre for the Arts

विंशतिसंख्याभिरुक्ताहुतिभि विश्वेदेवाद्याश्चतुर्विंशतिदेवता अष्टाष्टसंख्याभिः पाय
साहुतिभिः रक्षोहणमपि विंशत्यधिकसंख्याभिः कृसराहुतिभिः सवितारं दुर्गा त्र्यंबकं
कविन दुर्गांवा सोष्यतिं अग्निं क्षेत्राधिपतिं मित्रावरुणौ अग्निं च एता देवताः प्रत्येकमष्टा
ष्टसंख्याकाभिः कृसराहुतिभिः श्रियं प्रतिद्रव्यं विंशत्यधिकशतसंख्याभिः समिच्चर्वाज्या
हुतिभिः सोमं त्रयोदशपायसाहुतिभिः हुतं स्वराज्यं चतुर्गृहीतेनाज्येन अग्निं पृथिवीं महां
तं वायुमंतरिक्षं महांतं आदित्यं दिवं महांतं चंद्रमसं नक्षत्राणि दिशो महांतं वाज्येन प्रोक्ष
णेत्यादियात्रासादने पायसचरुकृसरार्थस्थालीनां स्रुवाणामाज्यस्थालीनां शूर्पा रामः
णां चासादनादि प्रणीतास्थापनांतं कृत्वा निर्ऋत्यादीनां वक्ष्यमाणतत्तन्मंत्रैः पूजां कु ६२

यात् निर्ऋतये वस्त्रयुग्मं रक्तचंदनं कृष्णसितादिपुष्पाणि मेषशृंगोद्भवधूप आज्यदीपः पोलिको
दनमुरामांसात्मकं पुरुषाहारपर्याप्तं नैवेद्यं तत्र ब्राह्मणेन सुरास्थाने सैंधवमिश्रं क्षीरं मांस
स्थाने लवणमिश्रं पायसं देयं अन्यैः सर्वेमुख्यमेवोक्तं पुष्पांजल्यंते पूजनेकृते निर्ऋ
तिमिंद्रपश्चाद्दिग्भागस्थापितयोः पायसार्थे चर्वर्थं च द्वादशमुष्टिं तूष्णीं निरुप्य पायसार्थे नि
रुप्तेषु एव तिमुष्टीं तूष्णीं निरुप्य स्थपतितरे कृसरार्थं च तुश्चत्वारिंशत्संख्यान्मुष्टिं निरुप्य
चर्वर्थं पुनश्चतुरः पुनः पायसार्थे द्विपंचाशन्मुष्टीं निरुप्य तत्तत्संख्यया प्रोक्षणं अवह
त्य पात्रत्रये हविस्त्रयं श्रपेत् ततो यथान्वाधानं त्यागः तद्यथा एतत्संख्याहुतिपर्याप्तं स
मिद्द्रव्यं चरुराज्यं च आदित्याय सोमाय एवमधिदेवतादिभ्यस्त्यागः ततो होत्रा शतसंख्या

Indira Gandhi National Centre for the Arts

हुतीपर्याप्तंघृतसंमिश्रपायसंनिर्ऋतयेसमिदादिषुसैवसंख्यान्यूनसंख्यावापूर्वसंक।
ल्पितातदनुसारीत्यागः इयदाहुतिपर्याप्तंसमिदाज्यचर्वात्मकंद्रव्यत्रयंनिर्ऋतयेअष्टा
विंशत्याहुतिपर्याप्तंक्रूरद्रव्यंचतुष्टयमिन्द्रायएवमग्न्याः अष्टाष्टसंख्याहुतिपर्याप्तंपाय
संविश्वेभ्योदेवेभ्योविष्णवेवसुभ्योवरुणायअजैकपादे॰ अहयेबुध्न्याय॰ पूष्णे॰ अ
श्विभ्यां॰यमाय॰ अग्नये॰ प्रजापतये॰ सोमाय॰ रुद्राय॰ अदितये॰ बृहस्पतये॰ सर्पेभ्यः पितृभ्यः
भगाय॰ अर्यम्णे॰ सवित्रे॰ त्वष्ट्रे॰ वायवे॰ इंद्राग्निभ्यां मित्राय विंशत्यधिकशताहुति
परिमितंक्रूसरंदद्यात् रक्षोघ्नेग्नये अष्टाष्टसंख्याहुतितिपर्याप्तंक्रूसरद्रव्यंसवित्रेदुर्गा
यैः अंधकाय॰ कृत्तिभ्यो॰ दुर्गायै॰ वास्तोष्पतये॰ अग्नये॰ मित्रावरुणाभ्यां॰ अग्नयेचविं॰ रामः ५२

क्षेत्राधिपतये॰१

शत्यधिकशताहुतिपर्याप्ताःसमिधः तावदाज्यंतावांश्चरुःश्रियै॰ त्रयोदशाहुतिपर्याप्तंपा
यसंसोमायाचतुर्गृहीताज्यंरुद्रायस्वराजे एकैकाहुतिपर्याप्तंमाज्यंअग्नयेपृथिव्यैमहते
वायवेंतरिक्षायमहते आदित्यायदिवेमहते चंद्रमसेनक्षत्रेभ्योदिग्भ्योमहतेच एवंत्या
गेकृते साचार्यऋत्विजस्तथैवजुहुयुः तत्रादित्यादिभ्यो रजोदर्शनशांत्यंकरीत्याहोमः
मोषुणोघोरःकंद्वेनिर्ऋतिर्गायत्री होमेवि॰ मोषुणःपरापरानिर्ऋतिर्दुर्हणावधीत्
पदीष्टतृष्णयासह इंद्रसोमधुकंदाइंद्रोगायत्री होमे॰ अपक्रमेमेधातिथिर्यमोनुष्टुप् हो
मेवि॰ एतैर्मंत्रैःप्रणवादिस्वाहांतैर्यथाचैपिततत्समिधःसंकल्पानुसारिसंख्यादधिमधुघृ
ताक्ताःहोसव्याःपायसञ्चतूचतुरवत्ताघवदानविधिनागृहीत्वाजुहुयात् विधिवदित्वा

Indira Gandhi National Centre for the Arts

करोक्तेः पायसहोमेसमाज्ञेसमिदादिहोमारंभः ततः ॐ विश्वेभ्यो देवेभ्यः स्वाहेत्येवं उक्तं
चतुर्विंशतिनाममंत्रैः प्रत्येकमष्टाष्टसंख्यपायसौ होमः कृणुष्वेति पंचदर्शस्य गौतमो वाम
देवो रक्षोहा त्रिष्टुप् रक्षसद्दोमे॰ कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवां इभेन ॥
तीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः स्वा॰ १ तव भ्रमास आशुया पतंत्यनुस्पृ
श धृषता शोशुचानः तपूंष्यग्ने जुह्वा पतंगानसंदितो विसृज विष्वगुल्काः स्वा॰ २ प्रतिस्पशो
विसृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः यो नो दूरे अघशंसो यो अंत्यग्ने माकिष्टे
व्यथिरादधर्षीत् स्वा॰ ३ उदग्ने तिष्ठ प्रत्यातनुष्व न्यमित्राँ ओषतात्तिग्महेते यो नो अरा रामः
तिं समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कं स्वा॰ ४ ऊर्ध्वो भव प्रतिविध्याध्यस्मदाविष्कृणु ष्व

दैव्यान्यग्ने अवस्थिरा तनुहि यातुजूनां जामिमजामिं प्रमृणीहि शत्रून् स्वा॰ ५ स ते जाना
ति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत् विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो वि
दुरो अभि द्यौत् स्वा॰ ६ सेदग्ने अस्तु सुभगः सुदानुर्यस्त्वा नित्येन हविषा य उक्थैः पिप्रीषति
स्व आयुषि दुरोणे विश्वेदस्मै सुदिना सासदिष्टिः स्वा॰ ७ अर्चामि ते सुमतिं घोष्यर्वाक् सं ते
वावाता जरतामियं गीः स्वश्वास्त्वा सुरथा मर्जयेमास्मे क्षत्राणि धारयेरनु द्यून् स्वा॰ ८ इह त्वा
भूर्या चरेदुप त्मन्दोषावस्तर्दीदिवांसमनु द्यून् क्रीलंतस्त्वा सुमनसः सपेमाभि द्युम्ना तस्थि
वांसो जनानां स्वा॰ ९ यस्त्वा स्वश्वः सुहिरण्यो अग्न उपयाति वसुमता रथेन तस्य त्राता
भवसि तस्य सखा यस्त आतिथ्यमानुषग्जुजोषत् स्वा॰ १० महो रुजामि बंधुता वचोभि

National
Centre for the Arts

स्तन्मा पितुर्गोतमादन्विपाय त्वंनो अस्य वचसश्चिकिद्धि होतर्यविष्ठ सुक्रतो दमूना स्वाहा ११।
अस्वप्नजस्तरणयः सुशेवा अतन्द्रासो वृका अश्रमिष्ठाः ते पायवः सध्र्यंचो निषद्याग्ने तव नः
पांत्वमूर स्वाहा १२ ये पायवो मामतेयं ते अग्ने पश्यंतो अंधं दुरितादरक्षन् ररक्ष तान्सुकृतो विश्ववे
दा दिप्संत इद्रिपवो नाह देभुः स्वाहा १३ त्वया वयं सधन्यस्त्वोतास्तव प्रणीत्यश्याम वाजा
न् उभा शंसा सूदय सत्यतातेनुष्ठुया कृणुह्यह्रयाण स्वाहा १४ अया ते अग्ने समिधा विधेम प्रति।
स्तोमं शस्यमानं गृभाय दहाशसो रक्षसः पाह्यस्मान्द्रुहो निदो मित्रमहो अवद्यात्स्वाहा॰ १५ अस्य
च मन्त्राष्ट संख्यया होमः गयत्र्याष्टोत्तराहुतयः जातवेदसे कश्यपो दुर्गा त्रिष्टुप् छंदः सीरा रामः
युंजंतीत्यस्य बुधः सौम्यः कवयो गायत्री छंदः॰ सीरा युंजंति कवयो युगा वितन्वते पृथक् एध

धीरा देवेषु सुम्नया स्वाहा॰ तामग्निवर्णामिति भरिर्दुर्गा त्रिष्टुप् छं॰ तामग्निवर्णां तपसा ज्वलंतीं वै
रोचनीं कर्मफलेषु जुष्टां दुर्गां देवीं शरणमहं प्रपद्ये सुतरसि तरसे नमः स्वाहा॰ वास्तोष्पतेवसि।
ष्ठो वास्तोष्पतिस्त्रिष्टुप् छं॰ अग्निकाण्वो मेधातिथिरग्निर्गायत्री छं॰ क्षेत्रस्य पतिना
वामदेवः क्षेत्राधिपतिस्त्रिष्टुप् छं॰ गणानां जमदग्निर्मित्रावरुणौ गायत्री छं॰ गणाना
जमदग्निनायोनावृतस्य सीदतं पातं सोममृतावृधा स्वाहा॰ अग्निं दूतं पुरो दध इत्यस्या
गिरसो विरूपोग्निर्गायत्री छं॰ अग्निं दूतं पुरो दधे हव्यवाहमुपब्रुवे देवाँ आसादयादि
ह स्वाहा॰ हिरण्यवर्णामिति पंचदशर्चस्य सूक्तस्यानंदकर्दमचिक्लीतेंदिरासुता ऋषयः
श्रीर्देवता आद्यास्तिस्रोनुष्टुभः चतुर्थी प्रस्तारपंक्तिः पंचमी षष्ठी च त्रिष्टुभौ ततोष्टाव

Indira Gandhi National Centre for the Arts

नुष्टुप्‌: अंत्या प्रस्तारपंक्तिः होमे वि० प्रत्यचं समिदाज्यचरून्‌ अष्टाष्टसंख्यया जुहु
त्‌ त्वन्नः सोम विश्वतो वयोधा इत्यस्य प्रगाथः सोमस्त्रिष्टुप्‌ पायसहोमे० यातेरुद्र इत्य
स्य रुद्रः स्वरानुष्टुप्‌ आज्यहोमे० यातेरुद्रशिवातनूः शिवाविश्वाहभेषजी शिवा
रुद्रस्य भेषजी तया नो मृड जीवसे स्वा० अनेन चतुर्गृहीतं हुत्वा स्रुवेण च तत्र आज्याहु
ती जुहुयात्‌ भूरग्नये च पृथिव्यै च महते च स्वाहा भुवो वायवे चांतरिक्षाय च महते च स्वाहा
सुवरादित्याय च दिवे च महते च स्वाहा भूर्भुवः सुवश्चंद्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वा
हेति ततः स्विष्टकृत्यापसचरुकृसरांणां कृसरस्कृद्वदायाज्यं गृहीत्वा यदस्येति। ततः प्राय रामः
श्चित्तहोमांते कृते दिक्पालग्रहविनायकादिभ्यो रुद्राय निर्ऋतये इंद्रायाग्न्यस्वसदीपमाष। ९५

भक्तबलिदानं कार्यं। अथाचार्यो यजमानो वा पूर्णाहुतिं जुहुयात्‌। समुद्रादूर्मिरित्येकादश
र्चस्य सूक्तस्य गोतमो वामदेवोग्निस्त्रिष्टुप्‌ अंत्या जगती पूर्णाहुति होमे०। प्रजापते हिरण्यगर्भः
प्रजापतिस्त्रिष्टुप्‌ पूर्णादर्वि विश्वेदेवाः शतक्रतुरनुष्टुप्‌ सप्त मे ते अग्ने सप्तवानग्निर्जगती। पू
र्णाहुतिहोमे० अग्नये प्रजापतये शतक्रतवे० सप्तवतेग्नये०। ततः प्रणीतानिनयनसंस्थाज
पपरिस्तरणविसर्जनं परिसमूहनपर्युक्षणानि कृत्वा गृह्याग्नौ एतत्ते शांतिकरणपद्धेतत्समारो
पः ततो रुद्रकलशं दक्षिणतः स्पृशन्‌ त्र्यंबकमिति मंत्रं शतकृत्वो जपेत्‌ यजमानस्यायु
रारोग्यत्वादिनिर्त्यं मित्तं पूर्वं रुद्रैकादशिन्यादिजपमपि अत्रापि संख्याविकल्पः पूर्ववत्‌ अथ
रुद्रकुंभनिर्ऋतिकुंभातं देवताः पंचोपचारैः संपूज्य भवस्य सादेन यजमानाभिषेकं करिष्य

...hi National Centre for the Arts

यंतिता: प्रार्थयेत् अस्मिन्समये मूलतिमि खतात्र्यदयजनं कार्यं सर्वकलसोदकंकचित्पात्रेप्रा
द्याय विनायकशांतिवत्स्वस्तिकचर्मपीठनिर्मितेभद्रासनेउपविष्टं नववस्त्रं धृत्वा सर्वौषध्या
नुलिप्तांगं यजमानं तथा भार्गोपविष्टां ताहशीं सीपत्यां पत्नीं च सर्त्विके गाचार्योभिषिंचेत् कश्य
पोक्तं शतच्छिद्रं तद्धारणं कृताकृतं। अभिषेकमंत्राः। अक्षीभ्यामिति मंत्रं कश्यपो विवृहा यक्ष्मना
नोनुष्टुप् अभि॰ अक्षीभ्यां तेनासिकाभ्यामिति सूक्तं त्रिभिश्छंदे देवेति सप्तानां वसिष्ठ ऋ॰ आद्यानां
त्रयाणामग्निश्चतुर्णां विश्वेदेवाः आद्यागायत्री द्वितीयानुष्टुप् तिस्रो गायत्र्यां त्येष्टानु॰ राम:
अभिषेके॰ भिभिश्छंद॰ सर्पिर्मधूदकं आपोहिष्ठेति नवर्चस्यां वरिषः सिंधुद्वीप आपो गायत्रा ५६
त्री षष्ठ्यनुष्टुभौ पंचमी वर्द्धमाना सप्तमी प्रतिष्ठा अभि॰ आपोहिष्ठेति सूक्तं आपइद्वेति

दूयो: सप्तर्षयो विश्वेदेवा अनुष्टुप्॰ आपइद्वा॰ भेषजं इत्यास्यां दश॰ सहस्राक्षमसि सहस्राद्धे
ति द्वेतृचस्य प्राजापत्यो यक्ष्मनाशनस्त्रिष्टुप् अभि॰ सहस्राक्षेण: देवस्यत्वेति त्रिभिर्याजुषैः।
प्रजाग्रतइति मंत्रं प्रजापतिमनस्त्रिष्टुप् अभिषेके॰। यज्जाग्रतो॰। योसौवज्रधरो देवो महेंद्रो
गजवाहनः मूलजातशिशोर्दोषं मातापित्रोर्व्यपोहतु।१। योसौ शक्तिधरो देवो हुतभुङ्मेष
वाहनः मूलजातशिशोर्दोषं मातापित्रोर्व्यपोहतु सप्तजिह्वश्च देवोग्निर्मूलदोषं व्यपो२ मूलो४
यो सौ दंडधरो देवो धर्मो महिषवाहनः प्रशामयतु मूलोत्थं दोषं गंडांत संभवं ४ योसौपाश
धरो देवो वरुणश्च जलेश्वरः नक्रवाहः प्रचेता नो मूलोत्थाघं व्यपोहतु ५ योसौ देवो जगत्प्रा
णो मारुतो मृगवाहनः प्रशामयतु मूलोत्थं दोषं बालस्य शांतिदः ६ योसौ पशुपतिर्देवः लिखि

Indira Gandhi National Centre for the Arts

वेद्गस्वधाजिवाहनः मातापित्रोःशिशोश्चैवमूलदोषंव्य० ७ योसौपशुपतिर्देवःपिनाकीवृ
षवाहनःआश्लेषामूलगंडांतदोषमाशुव्य० ८ विघ्नेशःक्षेत्रपोदुर्गालोकपालान्वग्रहाःस
र्वेदोषप्रशमनंसर्वेकुर्वंतुशांतिदाः ९ इतिमंत्रैमुराद्वैस्त्यादिभिश्चाभिषिंचेत् तच्छंयोःशंयु
र्विश्वेदेवाःशक्करी ऋग्भिः ततोवस्त्रवेष्टितमुखाभ्यांनिर्ऋतिरुद्रकुंभाभ्यामभिषिक्तोयजमा
नःशुक्लवस्त्रगंधमाल्यधरःसपत्नीकःसापत्योविभूतिधारणंकृत्वारुद्रकलशस्यदेवतावि
सर्जनप्रदानपुरस्सरंपूजांविसर्जनंचकृत्वाचार्यादीश्चंदनादिनासंपूज्याचार्यायस रा.म.:
वत्सांगांपयस्विनींदद्यात्।निर्ऋतिप्रतिमांसोपस्कारांतत्कलशंचतथाग्रहप्रतिमाग्रह ९७
प्रीत्यर्थंदक्षिणाश्चाततोरुद्रजापिनेन्द्रान्देयाः।रुद्रप्रतिमासोपस्करास्तत्कुंभाश्चाऽस्तरे

भ्योयथाशक्तिदक्षिणांदद्यात्।तत्राचार्यदत्तार्धंब्रह्मणेदद्यात् तदर्धंसदस्यायतत
द्दत्तार्धंप्रत्येकमृत्विग्भ्योदेयं ततस्तेभ्योमूलजननसूचितसर्वारिष्टनिवृत्तिरस्त्विति।
आशिषंगृहीत्वाप्रणम्यसमापयेत् ततःपायसादिनाशतंतदर्धंदशवाब्राह्मणान्भो।
जयेत् तैश्चब्राह्मणैःसर्वशांतिपाठपूर्वकंभुक्त्वाशिषोदेयाः यजमानोनिर्ऋतिःप्रीय
तामिति तान्समापयेत् ततईश्वरार्पणंकुर्यात्।इतिमूलशांतिः।अथआश्लेषाशांति
विधिः।मानवसंहितायां।प्रसंभवेतुजन्मर्क्षेअन्यस्मिन्वाशुभेदिने स्नातोभ्यंगादिभिस्त।
स्मिन्वरयेत्सुधिजोत्तमान्।विभवेपंचकुंभस्तद्वयंवातदलाभतः।देवतास्थापनंचैकमे
कंरुद्राभिमंत्रणे।मूलवद्वीक्षप्रकारेणकुंभेनिक्षिप्यपूजनं।गोमयालेपितेदेशेधान्याद्यैः

Indira Gandhi National Centre for the Arts

परिशोभिते। पंकजे कारयेत्तत्र चतुर्विंशद्दलान्वितं। तंदुलैः कारयेद्धीरं रक्तपीतसितासितैः
कालिकायान्यसेद्विद्वान्स्थापयेत्तेषु कुंभकां कुंभं च वस्त्रगंधाद्यैस्तत्तन्मंत्रैः प्रपूजयेत्।
याः फलिनीरित्यनया क्षिपेद्दलौषधादिकान्। कुंभे परिस्थपात्रे तु आश्लेषा प्रतिमां या
जेत्। तत्पूर्वोत्तरनक्षत्रे दक्षिणोत्तरयोर्यजेत्। ऐंद्राद्यीशानपर्यंतमितरक्षाणि पूजयेत्
मूलोक्तेन विधानेन कुंभयोरभिमंत्रणं॥ रुद्राचीरुद्रकुंभे तु पूर्ववद्धोमाचरेत्। नमोस्तु
सर्पेभ्यः पूजामंत्र इति तत्र। सर्पोरक्तः। षित इति। एवं ध्यात्वा ततोभ्यर्च्य होमकर्म समारभेत्। राम:
त्। कर्त्तुः शाखोक्तमार्गेण आचार्यस्याथवा चरेत्। इदं सर्पेभ्यो जुहुयादधिप्रत्यधिदैव ९८
तं अष्टोत्तरशतं वापि अष्टाविंशतिमेव वा॥ मूलनक्षत्रवद्धोमं होमकर्म समाचरेत्। पूर्णा

हुत्यंतकर्माणि कृत्वा संपातकं तथा। कुंभे जलेषु प्रक्षिप्य अभिषेकमथाचरेत्। दारपुत्रस
मेतस्य यजमानस्य पूर्ववत्। अभिमंत्रितकुंभाद्भिरभिषेचनमाचरेत्। तथा पौराणमंत्रैश्च
पल्लवैरभिषेचयेत्। आश्लेषाक्षजातस्य मातापित्रोर्धनस्य च। भ्रातृज्ञातिकुलस्थानां
दोषसर्वव्य॰ २। यो सौ वागीश्वरो नाम अधिदेवो बृहस्पतिः। मातापित्रोः शिशोश्चैव गंडांतं सा
व्य॰ ३। पितरः सर्वभूतानां रक्षंतु पितरः सदा। सर्पनक्षत्रजातस्य वित्तं च ज्ञातिबांधवान्। ३। ततः
श्लोकं वरधरो यजमानस्तु भूषितः दक्षिणाभिस्ततो विद्वान्मूलवच्च प्रतोषयेत्। सर्पाधी
शनमस्तुभ्यं गणानां च गणाधिपाग्रहाणार्घ्यं मया दत्तं सर्वारिष्टप्रशांतये। मूलनक्षत्रवत्कुर्या
त्सर्पगंडे त्वना॰ म॰ त इति। अथ प्रयोगः। द्वादशाहे तदसंभवे जन्मर्क्षेन्यस्मिन्शुभे दिने वा प्रात

Indira Gandhi National
Centre for the Arts

नित्यविधिं विधाय तैलाभ्यंगोद्वर्तनादिना स्नातो देशकालौ संकीर्त्य अस्य शिशोराश्लेषाजन
नसूचितसर्वारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं मदुक्तविधिना सग्रहमखामाश्लेषाशां
तिं करिष्य इति संकल्प्य गणेशपूजनादि ऋत्विग्वरणांतं कुर्यात् तत्र ग्रहमखोक्तारणसर्षपविकिरणा
दि कृते। स्वशाखोक्तप्रकारेण कुंभपंचके चतुःपल्लवणा पंचवर्द्धकं कुंभेवा सवरुण
रुद्रस्थापनादि पूजनं विधाय रुद्रैकादशिनीजपस्तोत्रपठनमिति स्वक्तजपांते तद् कुंभोत्त
रभागे गोमयेनोपलिप्ते धान्यादिभिः परितः शोभिते शुक्लतंदुलैरष्टपीतसर्षपस्वस्तिपिष्टके
र्वा चतुर्विंशद्दलानि पंकजं विधाय तत्कर्णिकायां भूमिं मही द्यौरिति भूमिं स्पृश्य ३१ राम:
धान्यमसीति व्रीहीन्निःक्षिप्य आकलशेष्विति स्थापयेत् कलशमिमं मे गंग इति तीर्थोदकेन पूर्य ५५

गंधद्वारामिति गंधपुष्पाभ्यां युवासुवासा इति वस्त्रवेष्टनेन च गायत्र्येन च संपूज्य कांडात्कांडादिति
दूर्वाभिरश्वत्थे व इति पंचपल्लवैः। स्योनेति मृद्भिः आपो हिष्ठेति पंचगव्येन च संयोज्य याः
फलिनीरिति यवान्। सर्वौषधीः फलं च प्रक्षिप्य पूर्णा दर्वीति निहितपूर्णपात्रे साष्टदलवस्त्रे
आश्लेषादेवताप्रतिमायां नमोस्तु सर्पेभ्य इति सर्पानावाहयेत्। सर्पो रक्तस्त्रिनेत्रश्च द्विभुजः
पीतवस्त्रकः। फलकासिधरस्तीक्ष्णो दिव्याभरणभूषित इति तद्दक्षिणोत्तरयोः पुष्यमघेअधि
प्रत्यधिदेवते च आवाह्य चतुर्विंशतिदलेषु पूर्वदलमारभ्य प्रादक्षिण्येन पूर्वाफाल्गुनीमारभ्य
पुनर्वसुपर्यन्तानि नक्षत्राण्यावाहयेत् तत्र पुष्यावाहने। बृहस्पतिः प्रथमं जायमानस्तिष्यन्न
क्षत्रमभिसंबभूव। श्रेष्ठो देवानां पृतनासु जिष्णुः दिशोनु सर्वा अभयन्नो अस्तु। तिष्यः पुरस्ता

Indira Gandhi National
Centre for the Arts

बृतमध्यतो नः।बृहस्पतिर्नः परिपातु पश्चात्।बाधेतां द्वेषो अभयं कृणुतां।सुवीर्यस्य पतयः
स्यामेति तैत्तिरीयशाखोक्तो मंत्रः॥तथा मघावाहने।उपहूताः पितरो ये मघासु।मनोजव
सः सुकृतः सुकृत्याः॥ते नो नक्षत्रे हवमागमिष्ठाः॥स्वधाभिर्यज्ञं प्रयतं जुषंतां।ये अग्निदग्धा
ये अनग्निदग्धाः॥ये मुं लोकं पितरो ये क्षियंति।यांश्च विद्म यां उ च न प्रविद्म।मघासु यज्ञं
सुकृतं जुषंतामिति।तथा पूर्वाफाल्गुन्या वाहनानि।तत्रत्यैरेव मंत्रैः॥गवां पतिः फल्गुनीना
मित्यादिवाक्याष्टकैः कर्त्तव्यानि।पद्मानाममंत्रैः।पूर्वाफल्गुनीभ्यां नमः।पूर्वाफाल्गुन्या वाह राम।
यामि।उत्तराफाल्गुनीभ्यां नमः॥२हस्ताय॥३चित्रायै॥४स्वात्यै५विशाखायै६अनुराधायै७ १००
ज्येष्ठायै८मूलाय९पूर्वाषाढाभ्यः१०उत्तराषाढाभ्यः११श्रवणायै१२अविष्ठाभ्यः१३शत

भिषजे१४पूर्वप्रोष्ठपदेभ्यः१५उत्तराप्रोष्ठपदेभ्यः१६रेवत्यै१७अश्वयुग्भ्यां१८अपभरणीभ्यः१९
कृत्तिकाभ्यः२०रोहिण्यै२१मृगशीर्षाय२२आर्द्रायै२३पुनर्वसुभ्यां२४इत्येतैः॥ततो आवाहित
देवताः उक्ततत्तन्मंत्रैः शोडशोपचारैः संपूज्याचार्ययजमानशाखोक्तेन स्वशाक्तेन वा विधि
नाऽग्निं प्रतिष्ठाप्य ग्रहपूजा वरुणपूजनांतं कृत्वा न्वाधाय तत्र ग्रहपीठस्थदेवतानां मूला
श्णांति।वं निर्देशं कृत्वा सर्पान् प्रतिद्रव्यं अष्टोत्तरशतसंख्याभिर्घृतसंमिश्रपायसमिदाज्यचर्वाहु
तिभिः।तिष्यमघास्व अष्टाविंशतिभिस्तदाहुतिभिः सर्पाणामष्टाविंशतिश्चेत्तयोरष्टावष्टौ।तिष्य
मघास्व अष्टाविंशतिस्तदाहुतिभिः सर्पाणामष्टाविंशतिश्चेत्तयोरष्टावष्टौ।पूर्वाफल्गुद्विच
तुर्विंशतिदेवताः प्रत्येकमष्टाष्टसंख्याभिः पायसाहुतिभिः रक्षोहप्रभृतिदेवानां निर्देशो मूल

Indira Gandhi National
Centre for the Arts

शांतिवत्। शेषेणेत्यादिपायसस्रुक्सस्त्रुवणोश्च पणेंआज्यभागांते यथान्वाधानं त्यागं कुर्यात्। य
जमानः स्वस्वमंत्रैर्होमं संप्रज्ञल्विगाचार्यः कुर्यात्। आज्यहोमेतु प्रत्याहुति तत्तत्स्थापितजलकुं
भेसंपातान्वांशेषंच क्षिपेत्। सर्पेभ्यो होमस्तु। इदं २ सर्पेभ्यो हविरस्तु जुष्टं। आश्लेषायेषाम
नुयंतिचेतः। येअंतरिक्षंपृथिवीक्षयंति। तेनः सर्पासो हवमागमिष्ठाः। ये रोचने सूर्यस्यापि सर्पाः
ये दिवं देवीमनुसंचरंति। येषामाश्लेषा अनुयंति कामं। तेभ्यः सर्पेभ्यो मधुमज्जुहोतीति। तैत्तिरी
यवाक्यात् ष्टकेन कार्यः। इदं सर्पेभ्यो जुहुयादिति मानवोक्तेमदनरत्नोदाहृतसंहितायामस्या
मेवशांतौ होमाधिकारे इदं सर्पेभ्य इतिच वाक्यान्यष्टोत्तु सार्पमद्यत्फल्ल्या संबाहुलामाचा। अ राम।
तएवेदं हविरितियोजनयेदमित्यस्य मानववाक्ये वै यथीमायाद्य ज्ञोनमोमान्येभ्यः। सा १०१

र्पेतिष्यमघाद्धोमोऽवदानसंपदादायपायसचर्वोः कार्यः। पूर्वाफाल्गुन्यादिमहाव्याहृतिहो
मांतं मूलशांतिवद्धोमः। प्रायश्चित्तहोमांते विनायकादिभ्यो बलिदानांतं कृत्वा रुद्राय सर्पेभ्यःति
ष्यमघाभ्यः क्षेत्रपालाय चस्पदीपबलीन्दद्यात्। ततआचार्यो द्वादशगृहीतादिविधिना मूलशां
तिवत्पूर्णाहुतिं हुत्वा संपातं कुंभे क्षिपेत्। ततः प्रणीतानिनयनादि तद्वत्सर्पसूक्तेणां तंततो रुद्रकुंभं।
दक्षिणतस्पष्टाअंबकजपादि मूलशांतिवत्। ततो रुद्रसर्पादिदेवतानां पंचोपचारैरुत्त
रजां कृत्वाभिषेकानुज्ञातं धद्देवादायाभिषिंचेत्। सर्त्विगाचार्य्यः अद्दीम्यामित्यादि यजाग्र
तस्यंतं मूलशांतिवत्श्लोकेषु विशेषः। योसौ वज्र॰ सर्पाजाल॰ हतु॥१॥ योसौ शक्तिधरो॰ ग्निः सा
र्पदोषं॰२ योसौदंडधरो॰ सार्पजात॰ यमोनम॰३ योसौ देवो नागस्त्राणे॰ सार्पदोषंव्य॰ ४ योसौनि

ndhi National Centre for the Arts

धिपतिर्देव.स्व. माता पित्रोः शिशोश्चैव सार्पदोषं व्यपोहतु ॥७॥ यो सो पर्य्य ॥ आश्लेषामूलगंडां तं दोष माशु व्यपोहतु ॥ विघ्नेशः ॥ क्षेत्रपो दुर्गा लोकपालान वग्रहाः ॥ सर्वदोषप्रशमनं कुर्वेस र्वे तु शांतिदः ॥ शेषं मूलशांतिवत् ॥ आश्लेषाद्यक्षजातस्य माता पित्रोर्धनस्य च ॥ भ्रातृज्ञा तिकुलस्थानां दोषं सर्वं व्यपोहतु ॥ यो सो वागीश्वरो नाम अधिदेवो बृहस्पतिः ॥ मातापि त्रोः शिशोश्चैव गंडांतं स व्यपोहतु ॥ पितरः सर्व भूतानां रक्षंतु पितरः सदा ॥ सर्पनक्षत्रजा ॥ तस्य विघ्नं च शांतिं वो यच्छन्तु ॥ सुरास्त्वा ॰ तन्नंयोः ॰ शतच्छिद्रांतर्धाने नमूलवदभिषेकांते आचार्यहर्जापिभ्यां धेनुकृष्णानडुहः अन्यो भ्यो दक्षिणादानं मूलवत्कृत्वा ग्रहाणमुत्त रपूजनं विधाय सर्पेभ्यो दत्तफलपुष्पयुतमर्घं मया दत्तं सर्वारिष्टप्रशांतय इति ॥ ततो ब्रा रामः ११२

ह्मणभोजन संकल्पादि आशीर्ग्रहणांतं मूलशांतिवदिति आश्लेषाशांतिः ॥ इत्यनंतदे वकौस्तुभे आश्लेषाशांतिः संपूर्णा ॥ श्रीमज्जगदंबिकार्पणमस्तु जगतः ॥ अथ ज्येष्ठाशां तिविधिः ॥ ब्रह्मयामले ॥ ज्येष्ठादौ जननी माता द्वितीये जननी पिता ॥ तृतीये जननी भ्राता ॥ स्वयं माता चतुर्थके ॥ आत्मानं पंचमे हंति षष्ठे गोत्रक्षयो भवेत् ॥ सप्तमे चोभये कुलं ज्येष्ठमा तरमष्टमो नवमे श्वशुरं हंति सर्वं हंति च शांशकः ॥ वसिष्ठः ॥ सुरेशता राजनिताथवाग्रतं द्वि दैवताराजनीता तु देवरं ॥ पुरंदरर्क्षे जनितः सुतस्तथा ॥ तस्याग्रजं हंति न पुत्रिका यदि ॥ पारिजा ते गार्ग्यः ॥ सुखासीनं मुनिश्रेष्ठं गर्गं मुनिगणान्वितं ॥ कृतांजलिपुटो भूत्वा पप्रच्छ प्रतिशोनकः ॥ मर्गः ॥ ज्येष्ठा नक्षत्रसंभूतं गंडदोषविनिर्णयः ॥ तस्य शांतिविधानं च यथा वक्ष्ये यथा मयाहं घटि

Indira Gandhi National Centre for the Arts

कैकाचमैसत्रांतेज्येष्टादौ घटिकात्रयं। तयोः संधिरिति ज्ञेयं शिशुगंडसमीरितं। प्रथमे च द्वि
तीये च ज्येष्टर्क्षे च तृतीयके। पादत्रये जातनरो ज्येष्टो ष्यत्र प्रजायते। ज्येष्टांतपादजातस्तु
पितुस्तस्य विनाशकः॥ जायते नात्र संदेहो दशाहाभ्यंतरे तथा। ज्येष्टपादजातस्तु पितुस्त
स्य विनाशकः॥ जायते नात्र संदेहो दशाहाभ्यंतरे तथा। ज्येष्टर्क्षे च पुमान्जातो ग्रजस्य वि
नाशकः॥ तृतीये कन्यका जाता देवरस्त्रीघ्ने वाग्रजं। तच्छांति। तस्य वक्ष्या भिगंडदोषप्रशां
तये। सुदिने शुभनक्षत्रे चंद्रताराबलान्विते। स्थकांते तथा कुर्या ज्येष्टाशांतिं विधानतः रामः
वज्रांकुशधरं देवमैरावतगजान्वितं। कुर्याच्छचीपतिं सम्यं देवं सुरनायकं। कर्षमात्र १०३
सुवर्णेन कर्षार्धेर्धपादतः॥ तद्विधानं प्रकुर्वीत वित्तशाट्यं न कारयेत्। शालितंदुलसंपू

र्णे कुंभस्योपरि पूजयेत्। इंद्रायेंद्रो मरुत्वन इति मंत्रेण वाग्यतः। गंधपुष्पैर्धूपदीपै
र्नानाभक्ष्यनिवेदनैः। पूजयेद्विधिना विप्र लोकपालगणान्वितां। रक्तवस्त्रद्वयोपेतं पंपू
जयेत्सुरनायकं। तत्र संस्थापयेत्कुंभान्चतुर्दिक्षु विशेषतः॥ तन्मध्ये स्थापयेत्कुंभं श
तच्छिद्रसमन्वितं। पुण्योदकसमायुक्तान् वस्त्रयुग्मनिवेष्टितान्। कुंभेषु विन्यसेद्धीमा
न्पंचगव्यं सत्रकं। तत्र संस्थापं चामृतं पंचरत्नं मृत्तिकाः पंचसंख्यकाः॥ पंचत्वक्कषायां
श्च पंचपल्लवकांस्तथा। सुवर्णकुशदुर्वाश्च शतौषधिविनिक्षिपेत्। पूजयेद्वारुणैर्मं
त्रैः कुंभांस्तत्र विधानतः। त्वनोग्ने जपेदाद्ये सत्वनो पि द्वितीयके। समुद्रज्येष्टा इति।
चेमं मे गंगे तत्तुर्थकं। पूजयेद्वस्त्रयुग्माद्यैश्चतुरः कलशान्स्थान्वरुणानपीत्यर्थः। जपंकु

पुः प्रयत्नेन मंत्रैरपि द्विजोत्तमाः। आनो भद्रा जपं कुर्याद्भद्राग्रे विशेषतः। इंद्रसूक्तं हरसू-
क्तं जपेन्मृत्युंजयं ततः। इंद्रं संपूज्य देवेशं वरुणं कुंभसंस्थितं। सुमंकल्पविधानेन होमका-
र्यं ततश्चरेत्। समिद्भिर्बीजवृक्षस्य शतमष्टोत्तरं तथा। सर्पिषा चरुणा चैव मूलमंत्रेण
वाग्यतः। हुनेज्जाप्यं च तेनैव यत इंद्र भयेति च। तिलान्व्याहृतिभिर्हुत्वा शतमष्टोत्तरं पृथ-
क्। भार्यापुत्रसमोपेतं यजमानं विशेषतः। अभिषेकं प्रकुर्वीत सूक्तैर्वारुणसंज्ञितैः॥
समुद्रज्येष्ठादिभिर्मंत्रैरिमं वरुण तथा। द्यौः शांतेत्यादिभिर्मंत्रैरभिषेकं समाचरेत्। अ-
भिषेक निवृत्तौ तु यजमानः समन्वितः। शुक्लवस्त्राणि धृत्वाथ कुर्यादाज्यावलोकनं। राभं:
रूपं रूपेति मंत्रेण चित्रं तच्चक्षुरेव च। देवता पुरतः स्थित्वा धूपदीपनिवेदनं। दद्यात्स्वाचमनं १०४

सम्यक्तां कृत्वार्घ्यं तथैव च। नमस्ते सुरनाथाय नमस्ते शचीपते। गृहाणार्घ्यं मया दत्तं गंडप-
दोषप्रशांतये। कार्यं पत्रजकादीनां भूमेलब्ध्वा समर्पयेत्। आचार्याय च गां दद्यात्सुशी-
लां च पयस्विनीं। रक्तवर्णां वत्सयुतां सवालंकारभूषितां। वस्त्रयुग्मपिधानां च यथावि-
भवसारतः। यक्षगंधर्वसिद्धैश्च पूजितोसि शचीपते। दानेनानेन देवेश गंडदोषविनाश-
य। अष्टोत्तरशतं संख्या कुर्याद्ब्राह्मणभोजनं। तेभ्यो पि दक्षिणां दत्वा प्रणिपत्य क्षमापयेत्। इ-
मो कृत्वा ज्येष्ठा शांतिं पथ्यां विमुक्तमार्गतः। गंडदोषं विनिर्वर्त्य आयुष्मान्यायते नरः। इ-
त्युक्तं वृद्धगार्ग्येण शौनकाय विशेषतः। यन्मया मतितिरिक्तं वा तत्सर्वं क्षंतुमर्हसि। इति ज्ये-
ष्ठा शांति विधिः। अथ प्रयोगः। सुदिने देव नक्षत्र युते चाल पितुश्च दत्ताराबलान्विते सू-

...dhi National
Centre for the Arts

तकांतेसतिसपत्नीककर्त्तादेशादिकीर्त्तनांतेऽस्यशिशोर्ज्येष्ठाजननसूचितसर्वारिष्ट
परिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थं ज्येष्ठाजननशांतिं करिष्य इतिसंकल्प गणेशपूजादिस्व
स्तिवाचनांतं कुर्यात्। आचार्यः सर्षपविकिरणादि स्वस्त्ययनमितिप्रोक्षणांते कृतेप्रति
मान्युत्तारणं कृत्वा मही द्यौरित्यादि विधिना स्थापितं कलशं शालितंदुलैः पूरयित्वा तत्र
पूर्णा दर्वीति निहित पूर्णपात्रे साष्टदले वस्त्रे कर्षतदर्धतदर्धान्यतरमानेन हेमनि।
र्मितां शच्यासहैरावतारोहणं वज्रांकुशधिभुजामिंद्रप्रतिमां निधाय इंद्रमावाहना
द्युपचारैः पूजयेत्। इंद्रायेंद्रो मरुत्वत इति मंत्रस्य कश्यपऋषिर्मरीच इंद्रो गायत्री। पूजने वि० राम।
इंद्रमावाह्य लोकपालांश्चावाह्य तत्समन्वितमिंद्रमुद्दिश्य क्रमंत्रेण पूजयं नासमाप्तिमो। १०५

नीमवेत्। वस्त्रार्पणकाले रक्तवस्त्रद्वयं नैवेद्यकाले शष्कुल्यादि नानाभक्ष्यनिवेदनं।
कुर्यात्पूजांते तस्य चतुर्दिक्षु कुंभचतुष्टयं तत्पूर्वं मध्यमागोचशतच्छिद्रं मही द्यौरित्या
मिदिनाविधाय इमं मे गङ्ग इति चतुरुत्तरकेनापूर्यतेषु गायत्र्यादिभिः पंचगव्यैर्गोमूत्रादि
भिराप्यायस्वेत्यादिभिः पंचामृतं क्षीरादि। पंचरत्नानि पंचमृत्तिकाः। पंचपल्लवान्त्वक्
षायसहितान्। हिरण्यं। कुशान्। दूर्वाः। याओषधीरिति सर्वौषधीः प्रक्षिप्येन मंत्राश्च
त्वा तत्तन्मंत्रैर्निक्षिप्य युवासुवासा। वस्त्रयुग्मेन वेष्टितेषु पूर्णपात्राणि निधाय तेषु
क्रमेण वरुणपूजां कुर्यात्। प्रथमकलशे त्वन्नोअग्नेगोतमो वामदेवो वरुणस्त्रिष्टुप्
पूजने। द्वितीये सत्वनो गोतमो वामदेवो वरुणस्त्रिष्टु० पू० तृतीये समुद्रज्येष्ठा वरुण।

...i National Centre for the Arts

त्रिष्टुप्‌ऋजं।चतुर्थे इमं मे गंगे सिंधुक्षित्प्रैयमेधो वरुणो जगती।ऋजने।प्रतिप्रतिकुंभं व
आर्पणं समये पयेत्।ततश्चतुर्षु कुंभेषु ऋत्विजश्चत्वारि सूक्तानि जपेयुः।आ नो भद्रा
राहूगणो गौतमो विश्वेदेवा आद्याः पंच सप्तमी च जगत्यः षष्ठी विराट्स्थाना त्रिष्टुप् प्र
थमकलशे जपेत्।आ नो भद्राः ९ मंद्रा अग्ने बध्र्यश्वः सुमित्रो वाग्निर आद्ये जगत्यौ।अंत्या
त्रिष्टुभः।द्वितीयकलशे जपे।मंद्रा अग्नेः सहस्रशीर्षा पुरुषो नारायणः पुरुषोनुष्टु
प् अंत्या त्रिष्टुप्।तृतीये कलशे जपे।कद्रुद्राय घोरः कण्वो रुद्रो गायत्री।चतुर्थक
लशे जपे।आचार्य ऐंद्रे कलशे इंद्रायेंद्रो मरुत्वत इत्येतमष्टोत्तरशतादि संख्यया रामः
जपित्वा यत इंद्र भयामहे इंद्र त्रिष्टुप् एतत्सूक्तशेषं जपित्वा रुद्रजपं सर्वं जपयेत्पंचाष्ट १०६

विंशत्यादिसंख्यया कुर्यात्॥ततः स्थंडिलेग्निं वेद्यां ग्रहान् प्रतिष्ठाप्यान्वादध्यात्।अत्र
प्रधानं।ग्रहानेतत्संख्याभिः समिच्चर्वाज्याहुतिभिः तदंगदेवता अप्येतत्संख्याभिरुक्ता
हुतिभिः।इंद्रं पालाशसमिदाज्यचर्वाहुतिभिः प्रतिद्रव्यमष्टोत्तरशतसंख्याभिः प्रजा
पतिमष्टशततिलाहुतिभिः।शेषेणेत्यादि आज्यभागांते अष्टोत्तरशताहुतिपर्याप्तं
समिदाज्यचर्वात्मकं द्रव्यत्रयं इंद्रायेति तत्संख्याहुतिपर्याप्तास्तिलाः प्रजापतये
इति त्यागोत्तरं वा यत आचार्यो द्रव्यत्रयेणोक्तसंख्यं होमं कुर्यात्।एतद्धोमांते इंद्रा
येंद्रो मरुत्वते यत इंद्र भयामहे इति ऋचं जपेत्।ततो व्याहृतिभिस्तिलानष्टोत्तरशतं
जुहुयात्।आज्यचरुतिलशेषैः स्विष्टकृतं हुत्वा प्रायश्चित्तहोमांतं कुर्यात्।ततो ब

Indira Gandhi National Centre for the Arts

लिङ्गानेलोकपालादिभ्यो तेइंद्रायदेत्रयायच। ततःप्रणीताहुतिः प्रणीताविमोकपरिस्तर
णविसर्जनादिपर्युक्षणांत। ततोमायाशिष्यसहितंयजमानसमेसमुपवेश्याभिषेकः॥
नदितेनक्षत्रमितिदशर्चस्यसूक्तस्याजीगर्तिःशुनःशेपोवरुणस्त्रिष्टुप्‌पंचविधीत्येकविं
चेशस्याजी॰पोवरुणोगायत्री। इदंकवेरित्येकादशर्चस्यकूर्मोगात्समदोवरुणस्त्रिपाद
इंकवेरादित्यस्यस्वराजोविश्वानिसांतस्यस्त्रिमद्रू। अतियोमंद्रोयजथायदेवःसुकीर्ति
मिहेवरुणस्यभूरेः। तवव्रतेसुभगासस्यामस्वाध्योवरुणतुष्टुवांसः। उपायनउषसांगो
मतीनामग्नयोनजरमाणाअनूद्धन्। तवस्यामपुरुवीरस्यशर्मन्नुरुशंसस्यवरुणप्र रामः
णेतः। यूयंनःपुत्राअदितेरदब्धाअभिक्षमध्वंयुज्यायदेवाः। प्रसीमादित्योअसृ। १२७

जद्विधर्त्ताऋतंसिंधवोवरुणस्ययंति। नश्राम्यंतिनविमुचंत्येतेवयोनपप्तूरघुयापरि
ज्मन्। विमच्छ्रथायरशनामिवागऋध्यामतेवरुणखामृतस्य। मातंतुश्छेदिवयतोधि
यंमेमामात्राशार्यपसःपुरऋतोः। । समुद्रज्येष्ठावसिष्ठोआपस्त्रिष्टुपसमुद्रज्येष्ठाः॥
इमंमेगंगवरुणेत्यस्याजी॰ वरुणोगायत्री॥ द्यौःशांतासादित्येनशांतेतियाजुषैर्मंत्रैर
भिषिक्तोयजमानःपत्न्यासहशुक्लवस्त्रंदंचनानिकुसुमानिधृत्वारूपंरूपमितिचि
त्रंदेवानामितिचमंत्रैरवलोकितमाज्यंसदक्षिणंब्राह्मणायदत्वाइंद्रपुरोभागेस्थि
त्वागंधादिपंचोपचारैःसंपूज्याचमनतांबूलेनिवेद्यगंधपुष्पफलयुतमर्घ्यंनिवेदये
त्।मंत्रः।नमस्तेसुरनाथायनमस्तेभ्यसचीपते।गृहाणार्घ्यंमयादत्तंगंडदोषप्रशांत।

Indira Gandhi National Centre for the Arts

यो। ततश्चाचार्याय सुशीलां पयस्विनीं रक्तवर्णां सवत्सां हेमशृंगादिसर्वालंकारभूषितां गां
दद्यात्। गोदानविधिना मंत्रविशेषः। यज्ञगंधर्वसिद्धैश्च पूजितोसि शचीपते। दानेनाने
न देवेश गंडदोषं प्रशमयेतेति। अस्या गोर्दक्षिणात्वान्न दक्षिणांतरं। ततोष्टशतं
वा ब्राह्मणान्भोजयेत्तेभ्यो यथाशक्ति दक्षिणां दत्वा प्रणिपत्य क्षमध्वं मम अपराधानिति
क्षमाप्य इदं प्रार्थयेत्। आज्ञानाद्यदि वा ज्ञानाद्वैकल्याद्वा धनस्य च। यन्न्यूनमतिरिक्तं
वा तत्सर्वं क्षंतुमर्हसीति। ततो विसर्जनं आचार्याय हस्ते सोपस्करां प्रतिमां दत्वाग्निं सं
पूज्य विसृष्टिं गच्छेति तं विसृज्य ज्येष्ठाशांतिसुकृतं यन्मया लब्धं तेन देवेंद्रनामेश्वरः एमं
प्रीयतामिति। ।इति ज्येष्ठाशांतिः। अथ वैधृतिव्यतिपातसंक्रमणशांतिः। ।शौनकः। अ १०८

थातः संप्रवक्ष्यामि शौनकः शांतिमुत्तमां। वैधृतौ च व्यतीपाते महादोषोभिजायते। कु
मारजन्मकाले तु व्यतीपातश्च वैधृतिः। संक्रमश्च रवेस्तत्र जातो दारिद्र्यकारकः। दरिद्र
णो महादुःखं व्याधिपीडा महद्भयं। अप्रियं मृत्युमाप्नोति नात्र कार्या विचारणा। स्त्री
णां च शोकदुःखं च सर्वनाशकरो भवेत्। शांतिर्वा पुष्कला कुर्यात्तद्दोषस्य प्रशांत
ये। प्रथमं गोमुखो जन्म ततः शांतिं समाचरेत्। गृहस्य पूर्वदिग्भागे गोमयेनानुलि
प्य चालंकृते शुद्देशे तु व्रीहिराशिं प्रकल्पयेत्। पंचद्रोणमितं धान्यं तदर्धं तंडु
लेन च। तदर्धं तु तिलैः कुर्यादन्योन्योपरि कल्पयेत्। द्व्यत्रितयराशौ तु अष्टपत्रं
लिखेद्बुधः। पुण्याहं वाचयित्वा तु आचार्यं वृणुयात्सुरा। पंचांगभूषणं दद्यात्य

Indira Gandhi National Centre for the Arts

द्वयस्यांगुलीयकं। राज्ञो प्रतिष्ठितं कुंभमव्रणं सुमनोहरं। तीर्थोदकेन संपूर्णं समृद्धौ
षधीपल्लवं। सागर्भ्यं पंचरत्नं च वस्त्रयुग्मेन वेष्टयेत्। तस्योपरिन्यसेत्पात्रं सूक्ष्मवस्त्रे
ण वेष्टितं। प्रतिमां स्थापयेद्धीमान्सार्धिप्रत्यधिदेवतां। चंद्रादित्यकृती पार्श्वमध्ये वै
र्धृतिमर्चयेत्। वैधृतिदेवतां रुद्रं। एवमेव व्यतीपातशांतौ संक्रमणस्य च। मानोरुद्रेतरं तां
रुद्रमंत्रद्विणं तो यजेत्। निष्कमात्रेण वार्धेन पादेनापि स्वशक्तितः। प्रतिमां कारयेद्धी
मान्लक्षणलक्षितां। प्रतिमापूजनार्थाय वस्त्रयुग्मं निवेदयेत्। अधिदेवो भवेत्सू
र्यः श्चंद्रः प्रत्यधिदेवतां। ततो व्याहृतिपूर्वेण तत्तन्मंत्रैः प्रपूजयेत्। त्र्यंबकेन मंत्रे रामः
ण प्रधानप्रतिमां यजेत्। उत्सूर्य इति मंत्रेण सूर्यपूजां समारभेत्। आप्यायस्वेति मंत्रे १०९

---

। ण सोमपूजां समाचरेत्। उपचारैः षोडशभिर्यद्वा पंचोपचारकैः। अर्चयित्वा गंधपुष्पैः
फलैर्नैवेद्यमर्पयेत्। मृत्युंजयेन मंत्रेण प्रधानप्रतिमां स्पृशेत्। अष्टोत्तरसहस्रं वा शत
मष्टोत्तरं तु वा। अष्टाविंशतिवारं वा पूजां च ते स्वशक्तितः। सर्वसौरं प्रजप्याथ सोमं सो
मेश्च मंत्रकैः। आनो भद्रेति सूक्तं च मण्डलाग्नेश्च सूक्तकं। जपेत्तु पौरुषं सूक्तं त्र्यंब
कमतः परं। कुंभस्य प्राचतुर्दिजपं कुर्युस्तथर्त्विजः। कुंभस्य पश्चिमे देशे स्थंडिले ग
ग्निं प्रकल्पयेत्। स्वगृह्योक्तविधानेन कारयेत्संस्कृतानलं। त्र्यंबकेन मंत्रेण समिदा
ज्यचरून्हुनेत्। अष्टोत्तरसहस्रं वा अष्टोत्तरशतं तु वा। अष्टाविंशति वा कुर्यात्स्व
स्य शक्त्यनुसारतः। मृत्युंजयेन मंत्रेण तिलहोमं समाचरेत्। ततः स्विष्टकृतं हुत्वा

Indira Gandhi National Centre for the Arts

अभिषेकं तु कारयेत्। समुद्रज्येष्ठा सूक्तेन आपो हि ष्ठा तृचेन चा अक्षीभ्यामिति सूक्तेन
पावमानीभिरेव चात्र्यंबकेन तत्सूर्य माप्यायस्वेति मंत्रतः। सुरास्त्वामिति मंत्रैश्च अ
भिषेकं समाचरेत्। जापकेभ्यो ब्राह्मणेभ्यो दक्षिणाः प्रतिपादयेत्। दीनांधकृपणे
भ्यश्च प्रदद्याद्भूरिदक्षिणां। ब्राह्मणान् शतसंख्याकान्मिष्टान्नैर्भोजयेच्च तानाता
नाचार्यत्विजश्चैव स्वयं। बंधुभिः सह भुंजीत यथाविभवसारतः। एवं यः कुरुते मर्त्यो
नैव दुःखमवाप्नुयात्। अथ प्रयोगः। गोमुखप्रसवमुक्तविधिना कृत्वा देशकालौ
संकीर्त्यास्य शिशोर्व्यतीपातजन्मसूचितसर्वारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्या ग्र॰प्र॰
र्थं व्यतीपातशांतिं करिष्य इति संकल्प संक्रांतौ तु संक्रमणजन्मसूचितसर्वारिष्टे ११०

त्यादि संकल्पः। गणेशपूजनादिकं कलशस्थापनाचार्यवरणादि कुर्यात्। वृतायाचार्याय
पट्टवस्त्रयुगं कुंडलमंगुलीयकं च दद्यात्। आचार्यो यदत्र संस्थितमित्यादि स्वस्त्य
यनं तार्क्ष्यमिति प्रार्थनां तं कृत्वा तत्रैव गोमयलिरंगवल्याद्यलंकृते समे देशे महीद्यौ
रिति पृथ्वीमभिमृश्य ओषधयः समिति पंचद्रोणपरिमितव्रीहिराशिं कृत्वा तं समं कृ
त्वा तदुपरि सार्धद्रोणद्वयपरिमिततंडुलराशिं तदुपरि सपादद्रोणपरिमिततिल
राशिं कृत्वा तत्राष्टदलं कृत्वा आकलशेष्विति कुंभं प्रतिष्ठाप्य इमं मे गंग इति तीर्थोद
केनापूर्य सप्तमृदः सर्वौषधीः। पंचपल्लवान् पंचगव्य पंचरत्नानि तत्तन्मंत्रेण कुंभे
प्रतिष्ठाप्य वस्त्रयुग्मेनावेष्ट्य तदुपरि सूक्ष्मवस्त्रपुतं पूर्णपात्रं पूर्णादर्वीति निधा

National Centre for the Arts

घृतदुपरिनिष्कतदर्धतदर्धान्यतरपरिमितहेमप्रतिमांसूर्यस्यनिधाय।तत्रसूर्यमा
वाह्नाद्युपचारैःपूजयेत्।व्याहृतिनांपरमेष्ठिनांप्रजापतिःप्रजापतीर्बृहती।उ
त्सूर्यइतिमंत्रस्यमैत्रावरुणिर्वसिष्ठऋ॰सूर्यो॰त्रिष्टुप्छंदः।पूजने॰।ॐभूर्भुवःस्वः।ॐउ
त्सूर्योबृहदर्चींष्यश्रेत्पुरुविश्वाजनिममानुषाणां।समोदिवाददृशेरोचमानःक्रत्वाकृतःसु
कृतःकर्तृभिर्भूत्।तद्दक्षिणतोग्निमावाहयेत्।अग्निंकाण्वो॰रग्निर्गायत्री।ॐभूर्भुवःस्वः
अग्निंदूतंपुरोदधेहव्यवाहमुपब्रुवे।देवांआसादयादिह।उत्तरतोरुद्रमावाहयेत्
त्र्यंबकंवसिष्ठोरुद्रोनुष्टुप्।ॐभूर्भुवःस्वःत्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं।उर्वारुकमि
वबंधनान्मृत्योर्मुक्षीयमामृतात्।एवमेवसंक्रांतीशांतौसर्वंज्ञेयं।व्यतीपातस्तूक्रमणयोर्जन्मनि।व्य रामं १११

तीपातसंक्रांतीशांतितंत्रेणकरिष्यइतिसंकल्पमात्रेविशेषः।तिस्रोदेवताःषोडशोपचा
रैर्वस्त्रयुग्मसहितैःपंचोपचारैर्वासंपूज्यगंधपुष्पाद्यर्चितफलनैवेद्यंसमर्प्यप्रधानदेव
तांस्पृष्ट्वान्सर्वेसौरमंत्राजपेत्।उदुत्यमितित्र्योदशर्चस्यसूक्तस्यकण्वपुत्रःप्रस्कण्वोन
वाद्यागायत्र्योंत्याश्चतस्रोनुष्टुभः।चित्रंदेवानामित्यस्यांगिरसःकुत्सस्त्रिष्टुप्।इंद्रंमित्र
मितिद्वयोरौचथ्योदीर्घतमास्त्रिष्टुप्।हंसःशुचिषदितिगोतमोवामदेवोजगती।पत्वासू
र्येत्यत्रिरनुष्टुप्।यदद्यसूर्येत्येकस्याउत्सूर्येतितिसृणांउद्घेतितिसार्धचतसृणां।उदुत्य
दर्शतमितितिसृणांमैत्रावरुणिर्वसिष्ठस्त्रिष्टुप्।उदुत्यदर्शतमितिबृहती।शीर्ष्णःशी
र्ष्णःसतोबृहती।तच्चक्षुरितिपुरउष्णिक्।वण्महांअसीतिद्वयोर्भृगुःपुत्रोजमदग्निःप

Indira Gandhi National
Centre for the Arts

वीबृहती।उत्तरासतोबृहती।नमोमित्रस्येति।सूर्योनोदिवइतिपंचर्चस्यपुत्रश्चक्षु
र्गायत्री।विभ्राड्बृहदितिचतसृणांसूर्यपुत्रोविभ्राड्बृहती।विभ्राजमित्यास्तारपंक्तिः।आयं
गौरितिसार्वराज्ञीगायत्री।सर्वेषांसूर्योदेवता।जपे।ततोरुद्रप्रतिमामांस्पृशन्त्र्यंबकं।
मंत्रमष्टोत्तरंसहस्रमष्टोत्तरशतमष्टाविंशतिवाजपेत्।ततःसोममंत्रेणसोमं।ततश्चत्वा
रऋत्विजश्चतुर्दिक्षुकुंभस्थाःक्रमेणसूक्तानिजपेयुः।पूर्वस्यांआनोभद्राइतिसूक्तं
दक्षिणस्यां।भद्राअग्नेरितिद्वादशर्चंसूक्तं।प्रतीच्यांसहस्रशीर्षोत्तरस्यांत्र्यंबकंवसि
ष्ठोरुद्रस्त्रिष्टुप्।अथकुंभपश्चिमदेशेस्थंडिलेस्वगृह्योक्तविधिनाग्निंप्रतिष्ठाप्यकुंभ राम:
स्थोत्तरतोग्रहाणामावाहनादिपूजांकृत्वादीशान्यांकलशस्थापनंकृत्वाप्रार्थनांतेऽग्नेः ११२

पश्चिमतउपविश्यान्वाधानात्।चक्षुषीआज्येनेत्यंतेप्रधानं।आदित्यादिग्रहान्चिकीर्षि
तसंख्याभिःअर्कादिजातीयसमिच्चर्वाज्याहुतिभिःग्रहपीठदेवताएकैकसंख्याभिःसमि
च्चर्वाज्याहुतिभिःसूर्यंप्रत्येकमष्टोत्तरशतसंख्याभिःसमिच्चर्वाज्याहुतिभिः।अग्निंरुद्रंच
प्रत्येकंअष्टाविंशतिसंख्याभिस्तदाहुतिभिःमृत्युंजयंअष्टाविंशतिसंख्याकाभिस्तदाहु
तिभिःशेषेणेत्यादिप्रायश्चित्ताहुत्यंतेबलिदानं।ततःपूर्णाहुतीःप्रणीताविमोकःसंस्था
जपः।ततोघृतनववस्त्रयोर्दंपत्योःसबालकयोरभिषेकः।समुद्रज्येष्ठाइतिसूक्तस्यवसि
ष्ठआपस्त्रिष्टुप्।आपोहिष्ठेतितिसृणांसिंधुद्वीपआपोगायत्री।अक्षीभ्यांमीतिषण्णां
विवाहायक्ष्महानुष्टुप्।स्वादिष्ठयेतिपावमानीनांमधुच्छंदाःपवमानःसोमोगायत्री।ॐ

Indira Gandhi National
Centre for the Arts

तत्सूर्यो-अग्निं दूतं। त्र्यंबकं। आसां त्र्यष्यादि पूजा कालेत्रसकं। सुरास्त्वेत्यादिभिश्च मंत्रैरभि
षिक्तो यजमानोभिषेकवस्त्रमाचार्याय दद्यात्। सपत्नीको यजमानश्वेतवस्त्रचंदनादि
धृत्वा आज्यावेक्षणं कृत्वा तत्पात्रं सदक्षिणं ब्राह्मणाय दत्वा वस्त्रहेमांगुलीयकैराचार्यं
संपूज्य व्यतीपातदोषजननशांत्यर्थं गोवस्त्रस्वर्णानि तुभ्यमहं संप्रददे इत्याचार्या
य दत्वा तथैव ब्रह्मणे दानपटं तथैव दद्यात्। ऋत्विग्भ्यो यथाशक्ति दक्षिणां दत्वा दीनांधकृ
पणेभ्यो भूयसीं दत्वा शतं ब्राह्मणान् त्रिभिः सह मिष्टान्नैर्भोजयित्वा पूर्णतां वाचयित्वा
इष्टदेवतार्पणं कृत्वा बंधुभिः सह भुंजीतेति। व्यतीपातसंक्रांतशांतिविधिः। ततो तुसंकल्पैवे रा.भ.
धृते जलेरवः। आवाहनेमध्ये सव्याहृतिः त्र्यंबकमंत्रेण रुद्रमावाह्य तद्दक्षिणेन उत्तरे सूर्यं इति ११२

सूर्यं। उत्तरतो। आप्यायस्वेति सोमं। संपूज्य रुद्रप्रतिमां स्पृष्ट्वा सर्वसौरजपः सोमप्रतिमां आ
प्यायस्वेति जपः। अन्यथा रुद्र समिद्वीज्याहुतिभिः अष्टोत्तरशतसंख्याभिः सूर्यसोमौ प्रा
त्येकमष्टाविंशतिसंख्याभिः मृत्युंजयमष्टोत्तरसहस्रशतविंशत्यन्यतरसंख्याभिस्तिला
हुतिभिः शेषेणेत्यादि तथैव होमः। कार्य इति विशेषः। इति वैधृतिशांतिः। अथैकनक्षत्र
जननशांतिः। वृद्धगार्ग्यः। एकस्मिन्नेव नक्षत्रे भ्रात्रोर्वा पितृपुत्रयोः। प्रसूतिश्चेत्तयोर्मृ
त्युर्भवेदेकस्य निश्चयः। तद्दोषनाशाय तदा प्रशस्ता शांतिं कुर्यादभिषेचनेन च। संपूज्य स्व
र्णप्रतिमां तदग्रे दानं च कुर्याद्विभवानुरूपं। तत्र शांतिं प्रवक्ष्यामि सर्वाचार्यमतेन तु। शु
भर्क्षे शुभवारे च ताराबलान्विते। रिक्तां विवर्ज्य तु प्रारभ्ये विधिना सुधीः। आचार्यं वरयेत्पूर्वं

Indira Gandhi National Centre for the Arts

चतुरश्च द्विजोत्तमान् पुण्याहं वाचयित्वा तु शांतिकर्म समारभेत्। अग्नेरीशानदिग्भागे नक्षत्र
प्रतिमां ततः। तत्तद्व्योक्तमंत्रेण अर्चयेत्कलशोपरि। रक्तवस्त्रेण संछाद्य वस्त्रयुग्मेन वेष्ट
येत्। स्वशाखोक्तेन मार्गेण कुर्यादग्निमुखं ततः। अनेनैव तु मंत्रेण जुहेदष्टोत्तरं शतं। प्र
त्येकसमिदन्नाज्यैः प्रायश्चित्तांतमेव च। अभिषेकं ततः कुर्यादाचार्यः पितृपुत्रयोः। वस्त्रा
लंकारगोदानैः आचार्यं पूजयेत्ततः। ऋत्विजां दक्षिणां दत्त्वा माषत्रयसुवर्णकं। देवता
प्रतिमादानं धान्यवस्त्रादिभिः सह। यानशय्यासनादीनि दद्यात्तद्दोषशांतये। भोजयेद्व्रा
ह्मणान्सर्वान् वित्तशाठ्यविवर्जित इति। भ्रात्रोः पितृपुत्रयोरित्यत्र पुंस्त्वमविवक्षितं। रामः
निमित्तविशेषणत्वात्। एकोदरयोर्जन्यजनकयोश्चैकनक्षत्रजनने शांतिरित्यर्थः। पूर्वे ११४

विधित्सितपुण्याहवाचनात् अत एव वाचयित्वेत्यानंतर्यार्थकं। नक्षत्रप्रतिमां तद्देवता
प्रतिमां वा। नक्षत्रदेवतापूज्या त्वधिप्रत्यधिपूर्वकमिति ज्योतिर्निबंधात्। तत्तद्व्योक्त
मंत्रा अग्निर्नः पातु कृत्तिका इत्यादिका यः। तन्नक्षत्रदेवोभयप्रकाशकत्वात्सद्द्वयेपि
विनियोगार्हाः। अथ प्रयोगः। उक्तसमये जनकनक्षत्रोत्पत्तौ गोमुखप्रसवं कृत्वा एकोद
रनक्षत्रोत्पन्नौ तु तमकृत्वा देशकालौ संकीर्त्य अस्य शिशोः पित्रैकनक्षत्रोत्पत्तिसूचितस
र्वारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं शांतिमभिषेकं पूजितनक्षत्रप्रतिमाग्रे यथाशक्ति
दानं च करिष्य इति संकल्प्य गणपतिसंपूज्याचार्यं चतुरत्विजश्च वृत्वा पुण्याहं वाचयि
मात्रैकनक्षत्रेत्यादिस्थलेनात्र संकल्पः। ततआचार्यो यदत्र संस्थितमिति सर्षपविकरणं प्रो

Indira Gandhi National
Centre for the Arts

हणप्रार्थनामिचकृत्वास्थंडिलादैशान्यांकलशंमहीद्यौरित्यादिनास्थाप्यतत्ररक्तवस्त्रा
द्यादितेनसूत्रतद्देवतास्वर्णप्रतिमांकृताग्न्युत्तारणांतन्मंत्रेणवाह्योपचारैःपूजयेद्धस्त्रा
पित्रेतद्युग्ममर्पयेत्।पूजांतेग्निंव्याहृतिभिःप्रतिष्ठाप्यान्वाधानेचक्षुषीआज्येनेत्यंतेहोन
क्षत्रमिमांदेवतांवाप्रत्येकमष्टोत्तरशतसंख्याकाभिःसमिच्चर्वाज्याहुतिभिःशेषेणस्वादिप्रा
यश्चित्तहोमांतेप्रणीताविमोकादिआचार्यःकलशोदकेनतयोरभिषेकंकुर्यात्।ए
षोरेकनक्षत्रजन्म।ततःपूजितप्रतिमाग्रेआचार्यायवस्त्रालंकारगाःदद्यात्।ज्योतिर्नि
वेद्योऽस्यास्वर्णरूप्यमयौ।हरिहरौसंपूज्यंतौवादद्यात्।विविधस्यास्यविश्वेशपितरौ। रामः
विश्वतोमुखौ।प्रीयेतांमूर्तिदानेनदेवौहरिहरावुभावपि।माषत्रयसुवर्णस्तुत्विग्भ्यो ११५

दत्वानंतरंपूजाविसर्जनं।आचार्यायदस्तेप्रतिमाप्रतिपादनेधान्यवस्त्रादिभिःसहोप
शय्यासनादीनि।इतरब्राह्मणेभ्योदानंकृत्वातैःसहाचार्त्विजोभोजयित्वापूर्णतांवा
चयित्वेश्वरार्पणंकुर्यात्।इतिएकनक्षत्रजननशांतिः।अथग्रहणशांतिः।पारिजाते।
ग्रहणेचंद्रसूर्यस्यप्रसूतिर्यदिजायते।शांतिंतेषांप्रवक्ष्यामिनराणांहितकाम्यया।य
स्मिन्नृक्षेविशेषेणग्रहणंसंप्रजायते।तदृक्षाधिपतेरूपंस्वर्णेनप्रकल्पयेत्।यथाशक्त्या
नुसारेणविघ्नशात्यर्थंनकारयेत्।सूर्यग्रहेसूर्यरूपंसुवर्णेनविशेषतः।चंद्रंचंद्रग्रहेधीमा
नरजतेनविशेषतः।राहुरूपंप्रकुर्वीतनागेनैवविशेषतः।शुचौदेशेप्रयत्नेनगोमयेन
प्रकल्पयेत्।नागेनसीसमयेनेत्यर्थः।तस्योपरिन्यसेद्धीमानवस्त्रंसुशोभनं।त्रयाणांचैव

Indira Gandhi National Centre for the Arts

रूपाणां स्थापनं तत्र कारयेत्। रक्तांबरं रक्तगंधं रक्तपुष्पां वराणि च। सूर्यग्रहे प्रदातव्यं
सूर्यप्रीतिकराय च। श्वेतवस्त्रं श्वेतमाल्यं श्वेतगंधाक्षतादिभिः। चंद्रग्रहे तथा चंद्रमाप्याय
स्वेतिमंत्रतः। सूर्यग्रहे अर्कसमिधो जुहुयात्संस्कृतेनले। चंद्रग्रहे च पालाशैः समिद्भिर्जुहु
यान्नरः। दूर्वाभिर्जुहुयाद्धीमान् राहोः संप्रीणनाय च। समिद्भिर्जलहस्तोत्थैः भशायजुहु।
याद्बुधः। मेशायनक्षत्राधिपतये आज्येन चरुणा चैव तिलैश्च जुहुयात्ततः। पंचगव्यैः
पंचरत्नैः पंचत्वक् पंचपल्लवैः। जलैरौषधकल्कैश्च सहितैः काशादकैः। अभिषेकं।
प्रकैत यजमानेप्रयत्नतः। मंत्रैर्वरुणदेवत्यैरापोहिष्ठादिभिस्त्रिभिः। इमं मे गंगे यितर राम।
स्तत्वा यामिति मंत्रतः। अभिषेके निवृत्ते तु यजमानः समाहितः। आचार्यं पूजयेत्पश्चात्स ११६

शांते नियतेंद्रियः। तस्मै दद्यात्प्रयत्नेन दद्यात्प्रतिकृतित्रयं। दक्षिणा सिद्धसंयुक्तं यथाशक्त्या।
नुसारतः। ब्राह्मणान्भोजयित्वा तु प्रणिपत्य क्षमापयेत्। तेभ्योपि दक्षिणां दद्याजमानः समा।
हितः। अनेन विधिना शांतिं कृत्वा सम्यक् विशेषतः। अकालमृत्युं शोकं च व्याधिपीडां च
नाप्नुयात्। सौख्यं सौमनसं नित्यं सौभाग्यं लभते नरः। इत्थं ग्रहणजातानां सर्वारिष्टविना
शनं। कथितं सर्वं भार्गवेणोदं शौनकाय महात्मने। अथ प्रयोगः। सूर्यग्रहणे प्रसूतौ।
तत्कालस्थितनक्षत्रस्याधिपाः अस्याधिदेवतातस्याः सूर्यस्य च यथाशक्ति हेम्ना प्रा
मेवि य राहोः सीसेन गाकृतिं कृत्वा। शौचांते मम भार्यायाः सूर्यग्रहकालीनसूचितसर्वा
रिष्टपरिहारद्वारा श्री परमेश्वरप्रीत्यर्थं सग्रहमखां शांतिं करिष्ये इति संकल्य गणेशपू।

Indira Gandhi National
Centre for the Arts

जनाद्याचार्यवरणपूजांतं कुर्यात्। चंद्रग्रहे तु सूर्यस्थाने राजतं बिंबं कुर्यात् द्रव्यद्वयं पूर्ववत्
त्। संकल्पे सूर्यस्थाने चंद्रपदप्रयोगः। ततआचार्यो यस्त्रेत्याद्यं तैश्चिदिशोगोमयेनोपलि
प्ते तत्र नवं सदशं क्षालितं श्वेतवस्त्रं प्रसार्य तं ज्ञोक्तं देवतानां रूपत्रयं निधाय। आकृष्णेनेति हि
रण्यस्तूपः सविता त्रिष्टुप्। मध्ये सूर्यं रक्तवस्त्रां धान्यपुष्पैर्धूपादिभिश्च पूजयेत्। तद्दक्षि
णतो राहुं कृष्णगंधादिभिः धूपादिभिश्च पूजयेत्। स्वर्भानोरित्यस्यात्रिः स्वर्भानुस्त्रिष्टुप्।
स्वर्भानोरधयदिंद्र्याञ्चवो दिवो वर्तमानान्आवाहन। मूलं सूर्यं तमसा पत्ते तेन तुरीयेण
ब्रह्मणाविंददत्रिः। नक्षत्रदेवतामग्निर्नःपातु कृत्तिका इति तैत्तरीयापठितनक्षत्रदैवत्याष्ट राम.
कैः पूजयेत्। सूर्यस्योत्तरतः। चंद्रग्रहे तु मध्ये चंद्रपूजनं। आप्यायस्वगोतमः सोमो श्वेता। ११७

धादिभिर्धूपदीपादिभिश्चेति विशेषः। अन्यदेवतयोः पूर्ववत्पूजनं। ततोऽग्निस्थापनं।
ग्रहपूजाकलशस्थानांतं कुर्यात्। चक्षुषी आज्येनेत्यंते। ग्रहान्वाधानं कृत्वा सवितारमर्
कं समिदाज्यचरुतिलानां प्रत्येकमष्टोत्तरशताहुतिभिः स्वर्भानुं दूर्वासहिताज्यादिनांता वा
तान्निराहुतिभिः शेषेण त्यादि। यथान्वाधानं त्यागः। प्रायश्चित्तांते बलिपूर्णाहुति भि
संस्थाजपांते पंचगव्यपंचरत्नपंचत्वक्पंचपल्लवैः। औषधीकल्कैश्च मिश्रितलौकि
कजलैर्ग्रहकलशोदकैश्च सहितैरभिषेकः। आपो हि ष्ठेति च स्यसिंधुद्वीप आपो गा
यत्री। अभि। आपो हि ष्ठेति तृचेन। इमं मे गंग इति सिंधुक्षित्प्रैयमेधो न द्यो जगती। अ
भि। इमं मे गंग इत्यृचेन। पितरः पितामहः परे वरे इति याजुषमंत्रेण। त्वत्वायामि शुनः शे।

Indira Gandhi National Centre for the Arts

षो वरुणस्त्रिष्टुप्। अभि॰। तत्वा॥ अभिषेकांते आचार्यं संपूज्य तस्मै प्रतिमां च यं दक्षिणां च द-
द्यात्। ततो ग्रहाणां पूजनविसर्जने प्रतिमाप्रतिपादनं ब्राह्मणभोजनसंकल्पश्चेति मूलशां-
तिः॥ अथ नक्षत्रगंडांतशांतिविधिः। पारिजाते। अश्विनीमूलमघादौ त्रिपद्धं नवनाडिकाः॥ रे-
वतीसार्पशाक्रांते मासाश्वरक्तुसायकाः। अश्विनीमूलमघादौ नाडिकाद्वितयं तथा रेवतीसा-
र्पशाक्रांते नाडिकाद्वयमेव हि॥ अश्विनीमघमूलानां पूर्वार्द्धे बाध्यते पिता। पूषाहिशक्रपश्चा-
र्द्धे जननी बाध्यते शिशोः॥ पित्रोः संध्ययोर्जातो नास्ति गेहे निरामयः। सर्वेषां गंडजातानां परित्यागो
विधीयते। वर्जयेद्दर्शनं तावद्यावत्षाण्मासिकं भवेत्। तस्य शांतिं प्रवक्ष्यामि सोममंत्रेण भक्ति- राम:
मान्। कांस्यपात्रं प्रकुर्वीत पलैः षोडशभिर्नवा। अष्टभिश्च चतुर्भिर्वा यथाशोभनं तथा॥ त- ११८

न्मध्ये पायसं शंखं नवनीतं न पूरयेत्। राजतं चंद्रमं चैव सितपुष्पसहस्रकैः। देवज्ञः क्षौमवासा
स्त्र सितपुष्पांबरार्चितः। सोमोऽहमिति संचिंत्य पूजां कुर्यादतंद्रितः। जपेत्साहस्रकं मंत्रं श्रद्दधा-
नः समाहितः। दद्याद्दक्षिणामिष्टां गंडदोषप्रशांतये। शुक्लां वा गामश्वं चैव ताम्रपात्रसम-
न्वितां। गंडदोषोपशांत्यर्थं दद्याद्वेदविदे शुचिः॥ ज्योतिर्निबंधे। कुंकुमं चंदनं कुष्ठं गोरोचनम-
थापि वा। ऋतपूर्णेषु कुंभेषु चतुर्षु प्रक्षिपेत्क्रमात्। सहस्राक्षेण मंत्रेण बालकं स्नापये-
न्नरः। पितृपुक्ष्म दिवाजातं मातृपुक्षं तु रात्रिजं। स्नापयेत् पितृमातृभ्यां संध्ययोरुभयोर-
पि। कांस्यपात्रं घृतं पूर्णं गंडदोषोपशांतये। सक्षीरं मौक्तिकं शंखं श्वेतवस्त्रयुगं शुभं।
यजुर्वेदविदे विदे दद्याद्गंडदोषानुपत्तये। दद्याद्धेनुं हिरण्यं ग्रहांश्चापि प्रपूजयेत्। आ-

Indira Gandhi National
Centre for the Arts

युद्धिकरंजप्त्वाकुघ्रूलग्नतर्पणमिति।अत्रचाश्विन्यादिभागेआदिसंख्यारेवत्याघंत
भागो।दिवारेवत्याघंतभागोरात्रौदुष्टतमौ।तत्रापिद्विद्विघटिकेअतिदुष्टे।अतएवनिमि
त्ततारतम्येननैमित्तिकेतारतम्यं।कांस्यपात्रपरिमाणचतुष्टयोपन्यासेसूचितं।अतएवचं
द्रवागीश्वरप्रतिमादावपिकर्षादिपरिमाणतारतम्यमूह्यं।अथप्रयोगः।षण्मासोत्तरमे
कादशेऽहनिप्रथमतोगौ।प्रसवंकृत्वादेशकालौसंकीर्त्यममास्यशिशोरेवत्यश्विनीसं
ध्यात्मकगंडांतजन्मसूचितसर्वारिष्टनिवारणद्वाराश्रीपरमेश्वरप्रीत्यर्थंनक्षत्रगंडांत
शांतिकरिष्यइतिसंकल्प्यगणेशपूजनादियजुर्वेदविदैवज्ञाचार्यर्त्विग्वरणांतंकुर्या रामः
त्।तंचदनश्रकुमाल्याद्यैःक्षौमशुक्लवासोभ्यांपूजयेत्।ततआचार्योनिर्मित्तस्यापि। ११९

निमित्तानुसारिपरिमाणकांस्यपात्रस्यपुनर्निर्माणमाप्यायस्वेतिमंत्रेणकुर्यात्।चंद्रप्रति
मानामप्युत्तारणंचाततोयदस्रेत्यादिना।संस्कारंकृत्वाउपलिप्तदेशेकांस्यपात्रेपाय
संवापयोवानिःक्षिप्यतत्रनवनीतपूर्णशंखंनिधायतत्ररजतंचंद्रबिंबंसंस्थाप्यसोमो
हमितिध्यानपूर्वकंसमाहितचेताआप्यायस्वेतिमंत्रेणवाऋचादिषोडशोपचारैस्तत्र
चंपूजनंकुर्यात्।तत्रश्वेतंसदशंवस्त्रद्वयंसमर्पणीयं।पुष्पाणिश्वेतानिसद्रत्नंसमर्प
णीयानिमौक्तिकंदक्षिणातदसंभवेइष्टमन्यत्।पूजांतेतमेवमंत्रंध्यायन्सद्रत्नंप्रण
वादिपूर्वकंजपेत्।तदुत्तरतस्ताम्रकलशंमहीद्यौरित्यादिविधिनास्थापयित्वातत्र
तप्रतिमायांबृहस्पतिमंत्रेणवागीश्वमावाह्यसंपूज्यतदुत्तरतः।क्रमेणतेनैवविधिना

Gandhi National Centre for the Arts

निहितकुंभचतुष्टये अश्वस्थेवइति क्रमेण पंचपल्लवान् क्षिप्त्वा चतुर्षु क्रमेण स्वीमू
त्तानि कुंकुमचंदनकुष्ठगोरोचनानी सिंचेत्। तेषु वरुणं पूजयेत्। ततः पश्चिमदेशस्थं दि
ग्लाक्षिग्निप्रतिष्ठापनांतं कृत्वा स्थापितकलशोत्तरभागे ग्रहावाहनादिकलशप्रार्थनां
तं कृत्वान्वाधानादिग्रहमखं पूर्णाहुत्यंतं कुर्यात्। अभिषेककाले वारुणकलशचतुष्टय
स्थोदकैर्वा गंडांतजातं बालं पित्रा सह। रात्रिगंडांतजातं बालं मात्रा सह। संध्ययोर्जातं।
मुभाभ्यां सहाभिषिंचेत्। सहस्राक्षेणेति मंत्रस्य पद्मनाशः प्रजापत्यइंद्रस्त्रिष्टुप् अभि रामा॰
षेकं। ॐ सहस्राक्षेण शतशारदेन शतायुषा हविषाहार्षमेनं। शतं यथेमं शरदो नयातीं १२०
द्रो विश्वस्य दुरितस्य पारं। ततः सर्वकलशोदकैः समुद्रज्येष्ठेत्यादिभिः सुरास्त्वेत्यादिभिः

श्वाभिषिक्तो तेसुस्नातः सपत्नीकः कर्त्ता धृतश्वेतचंदनादिविभूतिधारणं कृत्वाचार्याय शेष
दानं कुर्यात्। इमं सचंद्रं संखस वस्त्रयुग्मं समौक्तिकं नवनीतापूपचारसहितं गंडदोषानुप
त्तये देवब्राह्मण यजुर्वेदविदे तुभ्यमहं संप्रददे इति। तत्सांगतासिध्यर्थं सहिरण्यां धेनुं द
द्यात्। ततो वागीश्वरं ताम्रपात्रसहितं गंडदोषशांत्यर्थं संप्रददे इति बृहस्पतिमादानं त
दंगत्वेन दक्षिणादानं च। ततस्थापितदेवतानामुत्तरपूजापूर्वकं विसर्जनं माचार्यहस्ते
प्रतिपादनं च। ततः सहस्राक्षेति मंत्रेणायुर्वृद्ध्यर्थं यथाशक्ति जपः। दश वा ब्राह्मणभोज
नं च। इति नक्षत्रगंडांतशांतिः। अथ तिथ्यादिगंडांतशांतिः। पारिजाते गार्ग्यः। अमुकेन रजा
तस्य सूतकोत्पदिने यथा। शांतिं मे कृत्वा कुर्यात्तावत्सुतं न लोकयेत्। तिथिगंडे त्वना

Indira Gandhi National Centre for the Arts

१२१ ष्ठादेन नक्षत्रे येनुरुच्यते। कांचनं लग्नगंडे तु गंडदोषं विनश्यति। आद्यभागे पितुर्गंडे त्रयाणा
मभिषेचनं। मातापित्रोः शिशोश्चैवेत्यर्थः। इतरत्र शिशोर्मातुरभिषेकं च कारयेत्। उत्तरेति
लपात्रं स्यात्पुष्ये गोदानमुच्यते। अजाप्रदानं त्वाष्ट्रे च पूर्वाषाढे च कांचनं। उत्तरातिष्यचि
त्रर्क्षपूर्वाषाढोद्भवस्य च। कुर्याच्छांतिं प्रयत्नेन नक्षत्राकारजं बुधः। सुवर्णेन तदर्धेन यथा
विभवसारतः। नक्षत्राधिपतेरूपं कृत्वा वस्त्रद्वयान्वितं। वरुणस्यार्चनं कार्यं स्वस्तिवा
चनपूर्वकं। शतौषधी चरत्नानि मृत्त्वकपल्लवसंयुतं। पूजांते समिदन्नाज्यैर्होमं तिलय
वैस्तथा। ततः पूर्णाहुतिं कृत्वा बेदाव्यापि कुटुंबिने। उत्तराप्रथमे पादे तिलपात्रं तथै राम: १२१
व च। तिष्ये तु गां सवत्सां च सुशीलां च पयस्विनीं। अजां चित्रासु वै दद्यात्पूर्वाषाढे तु कां

चनं। यवांश्च ब्रीहिमाषांश्च तिलमुद्गांश्च दापयेत्। यथावित्तानुसारेण कुर्याद्ब्राह्मणभोज
नं। पितुरायुष्यसिद्ध्यर्थं शांतिरत्र विधीयते। एवं यः कुरुते नूनं शांतिकर्म समाहितः। न दोषै
र्लिप्यते नूनं पद्मपत्रमिवांभसेति। गंडांतलक्षणं तु ज्योतिर्निबंधे पूर्णानंदाख्ययोस्ति
थ्योः संधिर्नाडीद्वयं तथा। गंडांतकुलिराशिंह्योः कीटचापयोर्मीनमेषयोः। गंडांतमं
तरालं स्यात्घटिकार्धमिति प्रदेदोद्भव्यां। उत्तरादानां निषिद्धभागस्य वस्यो क्रान्तसिं
हप्रसादे। चित्राद्यार्धे पुष्यमध्ये द्विपादे पूर्वाषाढाधिष्ण्यपादे तृतीये। जातः पुत्रश्चो
त्तराद्येविधत्ते पित्रोर्मातुः स्वस्य चापि प्रणाशमिति। उत्तराफाल्गुन्याद्यपाद इत्यर्थः। अथ प्रयो
गः। तिथिगंडपूर्वार्धजन्मनि कर्त्ता स्नातः पुत्रमनालोक्यास्य शिशोस्तिथिगंडपूर्वार्धजन्मस

Indira Gandhi National Centre for the Arts

चितसर्वारिष्टनिरसनद्वारापरमेश्वरप्रीत्यर्थंअनुष्ठानंकरिष्यइतिसंकल्प्यनान्दीश्राद्धात्पूर्वांगं
द्वशेषेणब्राह्मणपूजनमित्यस्यस्थानेशांतिमित्यूहेनसंकल्प्यगणेशपूजनआचार्यवरणं
तंकुर्यात्।संचयदत्रेत्यादिनामह्यादिकलशस्थापनंकृत्वा।कलशे।याओषधीः।सहिरण्या।
नि।सानःपृथिवि०।रुवतिभीम०।अश्वत्थेवो०।शतौषधीरत्नानिमृदंत्वचःपल्लवांश्चनिक्षिप्य
पूर्णपात्रेस्थापितेहेमवरुणप्रतिमायांतत्वायामीतिवरुणंपूजयेत्।ततोग्निंप्रतिष्ठाप्य
ग्रहान्संपूज्यान्वादध्यात्।चक्षुषीआज्येनेत्यंतेअत्रप्रधानंग्रहादिपूर्ववत्पुनरत्रप्रधा
नंवरुणंप्रतिद्रव्यमष्टोत्तरशतसंख्याभिःसमिधांचरोराज्यस्यतिलानांपदानांचाहु रामः
तिभिःशेषेणस्विष्टकृदादिबलिदानपूर्णाहुतिप्रणीताविमोककलशद्वयोदकेनसमुद्रज्येष्ठेत्या १२२

दिभिःपित्रादित्रयाणामभिषेकः।यवव्रीहिमाषतिलमुद्गानांदक्षिणात्वेनदानंविसर्जनंय
थाशक्तिब्राह्मणभोजनंचेति।तिथिगंडोत्तरार्धजन्मनितुतत्तात्कालिकदानं।लग्नगंडपू
र्वार्धजन्मनिकांचनदानमितिविशेषः।नक्षत्रगंडस्योत्तरादिनिषिद्धभागस्यचपूर्वार्धजन्म
निकांचनेनसमंतिलपात्रादेश्चदानं।शांतौतुनक्षत्रप्रतिमायास्तत्तद्वाक्याष्टकेन
पूजनं।उत्तरार्धजन्मनिदानं।।दक्षिणकालेउत्तरादौतिलपात्रादेर्दानं।इतरत्रयवव्री
ह्यादेरभिषेकव्यवस्थाचपूर्ववत्।इतितिथ्यादिगंडांतशांतिः।अथदिनक्षयादिशांतिः।
पारिजातेगार्ग्यः।अथातःसंप्रवक्ष्यामिजन्मकालेविशेषतः।गंडांतानांचनामानिमहादो
षकराणिच।दिनक्षयेव्यतीपातेव्याघातेविष्टिवैधृतौ।शूलेगंडेतिगंडेचपरिघेयमघंटे

Indira Gandhi National Centre for the Arts

के। कालदंडे मृत्युयोगे दग्धयोगे च। दारुणे। तस्मिन्नोड्दिने प्राप्ते प्रसूतिर्यदि जायते। अ
१२३ तिदोषकरी प्रोक्ता तस्मिन्नापयुति सति। यजनं देवतानां च ब्राह्मणं चैव पूजनं। दीपं शिवाल
ये भक्त्या घृतेन परिदापयेत्। अभिषेकं शंकराय अश्वत्थस्य प्रदक्षिणं। आयुर्वृद्धिकरं जा
प्यं सर्वारिष्टविनाशनं। गुरुदैवतविप्राणां पूजनं गोत्रवर्धनं। पुष्ट्यायुस्तुष्टिशांत्य
र्थं अभीष्टफलसिद्धये। सर्वारिष्टहरार्थाय ग्रहयज्ञं समाचरेत्। शिवाय विधिवद्भक्त्या
दीपदानं करोति यः। अखंडं गोघृतं नैव सर्वमृत्युं जयेन्नरः। विष्णुमूर्तिमहापुण्यं भ
क्त्यं श्रीकरं सदा। प्रदक्षिणं नरो भक्त्या कृत्वा मृत्युंजयं भवेत्। सर्वसंपत्समृद्ध्यर्थं तथा क राम
ल्याणवृद्धये। अभीष्टफलसिद्ध्यर्थं कुर्याद्ब्राह्मणभोजनं। अभिषेकं शिवे शांतिं कृत्वा भक्त्या न १२३

रोत्तमः। अकालमृत्युं निर्जित्य दीर्घायुर्जायते नरः। गणपत्यं पुरुषसूक्तं सौरमंत्रं जपं श्रु
भं। शांतिजाप्यं रुद्रजाप्यं कृत्वा मृत्युंजयी भवेत्। मूले वा सर्पगंडे वा कुर्यादेतानि यत्नतः।
आयुर्वृद्धिकरार्थाय गंडदोषप्रशांतये। इति। तस्मिन्नापयुते सति। विष्ट्यादेरपि निषिद्धांशायु
ते जन्मकाले सति दोषाधिक्यमित्याशयः। ततश्च प्रसूतेर्भद्रापुच्छादौ जन्मनि स्वल्पदो
षइत्यर्थः। मूलादीनां निषिद्धांशा नारदेनैव सिद्धाः। विरुद्धयोगेषु पश्चाद्यपादः सर्वेषु
कार्येषु विसर्जनीयः। सवैव तेयो व्यतिपातयोगः सर्वेषु नेष्टः परिघार्धमाद्यं॥ तिस्रस्तु ना
ड्यः प्रथमेव वज्रे गंडातिगंडेपि च षड्भषट्। व्याघातशूलेनव पंच योगे भेषु कार्येषु वि
वर्ज्या इति। अर्कारतमसौ स्वार्थमंदाः पद्धे कराशिगाः। कंटका व्योममृत्युदोषः सर्वा

कर्मविनाशकृत्॥ तमोपहृत्॥ यजनं देवतानामिति। गुरुदेवताविप्राग्नयः। जयंत्योक्तकर्म
णां प्रशंसारेवाक्यशेषे तत्संकीर्तनात्। ब्राह्मणभोजनाश्च प्रदक्षिणांतानि समाप्या।
तन्मध्यपठितस्यापि शंकराभिषेकस्य शांतिपदसमानाधिकरण्येन पृथक्संकीर्त
नं पूर्वोक्तजाप्यादीनां मध्ये शांतिनां च निरपेक्षकार्यमभिषेक इति द्योतनार्थं। जपस्य तदनं
तरं संकीर्तनं तत्तुल्यताज्ञापनार्थं निमित्तरूपस्यैकादशिन्यभिषेकयोः संख्याबि
वृद्धिः कल्पनीया। मूले चेति तडं इत्यर्थः॥ पूर्वोक्तागंडांतशांत्या सह विकल्पेनाभि
षेकसहितानि जपकर्माणि कुर्यादित्यर्थः॥ इति दिनक्षयशांतिः॥ अथ विनाडीजन
नशांतिः॥ पारिजाते वृद्धगार्ग्यः॥ विघनाडीषु संजातः पितृमातृधनात्मनां। नाशकृद्वि रा मा।
१२४

शाल्मोः॥ क्रूरे लग्नेंशगेपि वा। तद्दोषपरिहाराय शांतिकर्म समारभेत्॥ रुद्रोयमोग्निर्मृत्यु
श्च देवताः परिकीर्तिताः॥ सुवर्णेन यथाशक्ति तत्तल्लक्षणलक्षिताः। प्रतिमाः कारयि।
त्वा तु प्राच्यां कोव्रीहिभिः स्थले। स्थंडिलं परिकल्प्याथ कुंभमौषधिसंयुतं। जलैः संपूर्य।
संस्थाप्य मृदादि प्रक्षिपेत्ततः। वस्त्रद्वयेन संवेष्ट्य पंचरत्नानि निक्षिपेत्। कुंभोपरि तु सं।
स्थाप्य चतस्रः प्रतिमास्तथा। तत्तन्मंत्रैश्च संपूज्य गंधपुष्पोपहारकैः। कद्रुद्रायेति मंत्रेण
यमाय सोममित्यथ। अग्निर्मूर्धेति मंत्रेण परं मृत्योरिति त्वथ। एतैश्चतुर्भिर्मंत्रैश्च क्रमाद
वैद्धुनेत्तथा। समिच्चरुघृतद्रव्यैः प्रत्येकं च यथाक्रमात्। ऋत्विग्भिः सह कार्यो हुनेदष्टस
हस्रकं। अष्टोत्तरशतं वापि अष्टाविंशतिमेव वा। ततस्तिलैर्हुनेद्देवां तत्तन्मंत्रैस्त्रैमंत्र

Indira Gandhi National
Centre for the Arts

चित। ततोभिषेचयेदानमंत्रैः पौराणिकैः क्रमात्। वक्ष्यमाणैरितिविशेषः। प्रीयतांभ
गवानीशः पिनाकीसर्वतोमुखः। तवमूर्त्तिप्रदानेनसर्वानीष्टप्रदोभव। इषत्पीनोयमः
कालोदस्तदंडः प्रसन्नधीः। स्फुरद्ग्नीलकायश्चमहिषस्थः शिवंकुरु। पिशंगश्मश्रुसा
केशांतः पिंगाश्चाम्बरगोरुणः। छागास्वसन्नस्त्रश्चसमाचीरक्तलोचनः। तवमूर्त्तिप्रदा
नेममममपापंव्यपोहतु। दंष्ट्राकरालवनोनीलांजनसमाकृतिः। रक्षश्चोसिगदापाणिः
प्रीतस्तुमेयातुसर्वदा। दानमेवंविधैर्मंत्रैर्यथाविधिसमाहितः। गोभूहिरण्यवस्त्रैश्च।
आचार्यंपूजयेत्सुधीः। एवंकुर्याद्विधानेनविषदोषः प्रशाम्यतीति। विषनाडीस्ति। रामः
थिवारादिसंबंधीनाराद्दत्तगार्ग्यः। तिथि ५ इष्ट ५ नाग ८ अद्रि ७ गिरि ७ ईश ११ बा १२५

रिधिः ४ अद्रि ७ दिक १० पावक ३ दिक्क १० रुद्र ११ मुनि ७ इभ ८ संख्याः प्रथमातिथेः क्रमा।
त्परंविषसंज्ञंघटिकाचतुष्टयमिति। विंश २० चतुर्थ द्वादश १२ दिक च १० शैल ७ बाणश्च
५ तत्वानि २५ यथाक्रमेण। सूर्यादिवारेषुभवत्यनंतरंनाड्योविषाख्यंघटिकाचतुष्टा
यमिति। इतिवारविषः। खमार्गणाः ५० वेदपक्षाश्च खरामाः ३० व्योमसागराः ४० वाधिचंद्रा
१४ रूपदस्राः २१ व्योमबाहवः २० द्विराया ३२ खाग्नयः ३० शून्यदस्राः ३० कुंजरस्मयः १८
रूपपक्षाः २१ व्योमदस्राः २० वेदचंद्र १४ चतुर्दशाः १४ शून्यचंद्रा १० वेदचंद्राः १४ पक्षाब्धि २४
वेदबाहवश्च शून्यदस्राः २० शून्यचंद्राः १० पूर्णचंद्रा १० गजेंद्र ८ तर्कचंद्राः १६ वेदपक्षाब्धि
२४ पक्षाश्च खरामाः ३० अश्विनीतः क्रमात्। अत्र तिथिवारनक्षत्रेषुउक्तसंख्योत्तरंघटिकाचतु

Indira Gandhi National Centre for the Arts

ष्ट्यं॥ विषनाड्य इति व्यवस्था॥ अथ प्रयोगः॥ कर्त्ता शौचांते देशकालौ संकीर्त्य विषनाड्या ए
तद्दिग्भ्रजननसूचितसर्वारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं वृद्धगार्ग्योक्तविधिना
शांतिं करिष्य इति संकल्प्य गणेशपूजनाद्याचार्यर्त्विग्वरणांतं कुर्यात्॥ आचार्योक्तवि
यदत्रेत्यादि स्थलस्थंडिलं कृत्वा यथाशक्ति लक्षणनिमित्तानां देवतानां हेमानां रूपादि
प्रतिमानां च तत्स्वरूपमनुसारेणं कृत्वा पूर्वभागे मही द्यौरिति भूमिं स्पृष्ट्वा ओषधयः स
मिति चतुःप्रस्थमितान्व्रीहीन् प्रक्षिप्य तैः स्थंडिलं परिकल्प्य तत्र कलशस्थापनोदकपूर
णेस मंत्रे सर्वौषधीः पंचपंचमृदः पंचपल्लवान् दूर्वाः हिरण्यं फलं तत्र मंत्रैः कलशे क्षि रामः
प्त्वा युवा सुवासा इति वस्त्रद्वयेनां वेष्ट्य पंचरत्नानि गंधादिना कलशं संपूज्य पूर्णपात्रं नि १२६

धाय तत्र प्रतिमाचतुष्टयं निधाय तास्तास्वावाहनादिषोडशोपचारैः पूजयेत्॥ कद्रुद्राये।
ति कण्वो रुद्रो गायत्री। यमाय सोमं यमोनुष्टुप्। अग्निर्मूर्द्धा विरूपोगारको यत्री। परं मृत्यो
गत्समदो मृत्युस्त्रिष्टुप्। परं मृत्यो अनुपरेहि पंथां यस्ते स्वइतरो देवयानात्॥ चक्षुष्मते
भएव ते तेऽब्रवीमि मा नः प्रजां रीरिषो मोत वीरान्॥ पूजांते पश्चिमभागे स्थंडिले प्रति।
ष्ठाप्य स्थापितदेवतोत्तरभागे ग्रहवाहनादिकलशस्थापनांतं कृत्वान्वाद्धानादाच
क्षुषी आज्येनेत्यंते ग्रहपीठदेवतान्वाधानं प्रतिद्रव्यं कृत्वा रुद्रं प्रति द्रव्यं अष्टोत्तरशत
संख्याः समिच्चरुघृताहुतीः यमग्निं मृत्युं च तावतीभिस्तदाहुतिभिः ता एव देवताः स्ति।
लाहुतिभिश्चतत्संख्याभिः शेषेणेत्यादि प्रणीताप्रणयनांते आज्यनिर्वापः आज्येन सह ग्रह

Indira Gandhi National Centre for the Arts

सिद्धान्तस्यपर्यग्निकरणं।संमार्गांतिचरोरग्नावधिश्रवणंमभिधारणंचकृत्वोद्गुद्वासदीआज्य
भागांतेग्रहपीठदेवताउद्दिश्ययथान्वाधानंत्यागंकृत्वेप्रत्येकमष्टोत्तरसंख्याहुतीपर्या
प्तंसमिच्चरुघृतात्मकंद्रव्यत्रयंरुद्राय।एवंयमाय।अग्नये।मृत्यवे।एवंतत्संख्याहुति।
पर्याप्तंतिलाद्रव्यारुद्रादिभ्योनममेतित्यागंकृत्वेतेत्व्रक्सहितआचार्यस्ततन्मंत्रेर्जुहुया
त्।प्रायश्चित्तहोमांतेलोकपालग्रहपीठदेवताभ्योवलिदानांतेरुद्रयाग्निस्तुभ्यश्चव
लिंदत्वांतिद्वेत्र्यालविंदद्यात्पूर्णाहुत्यंतेप्रणीताविमोकःकलशद्वयोदकेनाभिषे
कः।समुद्रज्येष्ठेत्यादिभिर्मंत्रैः।ततप्रीयतांभगवानीशइत्यादिभिश्चतुर्भिश्लोकैश्चआभि रामः
षिक्तोयजमानस्तैरेवसंकल्पैरेकैकांदेवतामाचार्यायदद्यात्।तस्मैगोमहिहिरण्यवस्त्रा १२७

वस्त्राणितत्लिङ्गरूपेवादद्यात्।कृतस्यकर्मणःसांगतायेइमांदक्षिणांतुभ्यमहंसंप्रदद
इति।एवमृत्विग्भ्योयथाशक्तिदक्षिणांदानंतमोग्रहपीठदेवानांपूजनविसर्जनेआचा
र्यहस्तेप्रतिमादानंब्राह्मणभोजनंचेतिविषनाडीशांति।अथयमलशांतिः।तत्रैतरेयि
ब्राह्मणेपिब्राह्मणे।आहिताग्निर्यस्यभार्यागौर्वायमौज।अग्नयेमरुत्वतेत्रयोदशकपा
लंपुरोडाशं।आहुतीवाहवनीयेजुहुयात्इत्युक्तं।आश्वलायनसूत्रेतुयस्यभार्यागौर्वा
वीयमौजनयेदिष्टिर्मरुतःइतिमारुतयागएवोक्तः।वृत्तिकृद्देवत्राताभ्यांमरुतदेवते।
त्युक्तेः।एवकारस्वपदेष्टिर्मरुतःइतिमारुतयागएवोक्तः।वृत्तिकृद्देवत्राताभ्यांमरुतदे।
वतेत्युक्तेः।एवकारस्वरसेनसिद्धांतभाष्यकृताचितदुपपादेभ्यश्चपूर्णाहुतिरिति।आहिता

Indira Gandhi National Centre for the Arts

न्नेः कृतप्रकृत्यारंभस्येष्टिः। अकृततदारंभस्य पूर्णाहुतिरिति वृत्तिकारः। अनाहिताग्निगृह्याग्नि
प्रयत्ताऽऽह। कारिकाकारः। अथ यस्य वडवा गौर्वा जनयेद्यमौ ततः। स मरुद्भ्यश्चरुं कुर्यात्पू
र्णाहुतिमथापि वेति। गृह्याग्निनापि मरुद्भ्यो वडवाचरुः कात्यायनोक्तं। प्रायश्चित्तं कुर्यात्। स्वगृ
ह्योक्ताभावपरगृह्योक्तस्य लौकिकाग्नौ संभवात्। तच्च कात्यायनगृह्ये पठितं। अथातो यमल
जनने विधिं व्याख्यास्यामो यस्य भार्या गौर्वा दासी वडवा वा विकृतिं प्रसेत्स प्रायश्चित्ती भवेत्पूर्णे
दशाहे चतुर्णां क्षीरवृक्षाणां। कषायमुपाहरेत्प्लक्षवटोदुंबराश्वत्थशमीदेवदारुगौ।
रसर्षपास्तेषां मिश्रमयोहिरण्यं दूर्वांकुरैः सर्वौषधीभिरष्टौ कलशानापूर्य दंपती स्नापये
त्। आपो हि ष्ठेति तिसृभिः कयानश्चित्रेति द्वाभ्यां पंचैंद्रेणेन्द्रमापः प्रवहतेत्यपाघमिति स्नापयि राम। १२८

लंकृतौ दर्भेषु संवेशयाति। मारुतं स्थालीपाकं श्रपयित्वाज्यभागाविष्ट्वाज्याहुतीर्जुहोति पू
र्वोक्तैः स्नपनमंत्रैः स्थालीपाकस्य जुहोति। अग्नये। सोमाय। पवमानाय। पावकाय। मारुता।
मरुद्भ्यः। यमाय। अंतकाय। मृत्यवे। अग्नये स्विष्टकृते स्वाहेत्येतदेव गृहोत्पातेषूल्काः क
पोतो गृध्रो श्येनो वा प्रविशेत्स्तंभो वा प्ररोहेद्वल्मीकं मधुजालं वा स्वेदुदककुंभस्य प्रज्वल
नेऽऽसनशयनयानभंगे गृहगोधिकाकृकलाससरीसृपसर्पणे छत्रध्वजविनाशे चान्ये
षूत्पातेषु एतदेव प्रायश्चित्तं ग्रहशांतिं चोक्तविधिना कृत्वा ब्राह्मणान्भोजयित्वा स्वस्ति वाच्या
शिषः प्रतिगृह्णीयादिति। विकृतिप्रसवो यमलोत्पत्तिः। अद्भिः पूरितेषु कलशेषु कषायैः प्ल
क्षादिशाखाभिः गौरसर्षपैर्मिश्रितैर्हिरण्यप्रक्षेपो दूर्वांकुराणां सर्वौषधीनां च प्रक्षेपः कार्यः

Indira Gandhi National Centre for the Arts

पंचैतामंत्रायस्मिन्नृतत्यंचैतस्सूक्तं।एवमन्यत्र।इदमापः स्रवत।अपाघं।अपनःशोशुचदघमिति।
सूक्तं।यातेष्वित्यनंतरं भूकंपोल्कापातकाकसर्वसंगमप्रेक्षणादिष्विति कृचित्पाठः।अ
थप्रयोगः।ममभार्यायाःमलजननसूचितसर्वारिष्टपरिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थं मि
थ्रापत्स्यइतिश्रौताग्निमतोगृह्याग्निमतस्तमाहृतस्थालीपाकेनयक्ष्यइतिसंकल्प्य।अद्य
तत्प्रत्यारंभस्यतत्स्थानेपूर्णाहुतिंहोष्यामि।अग्निश्चन्यस्तसमग्रदस्यखंकात्यायनोक्तंप्रा
यश्चित्तंकरिष्यइतिसंकल्प्यगणेशपूजनादिचार्यवरणांतंकुर्यात्।आचार्योयदत्रेत्या
दिनाभूशुद्धिंकृत्वाविधायप्रागादिक्रमेणैशान्यंतासुदिक्षुमहीद्यौरित्यादिविधिनाक शा.भ.
लशाष्टस्थापनांतंकृत्वाहिरण्यरूपइतिहिरण्यंकषायादिसहितंप्रक्षिप्यकांडादितिदूर्वाया। १२९

ओषधीरितिसर्वौषधीश्चप्रक्षिप्यगंधादिप्रक्षेपादिवरुणपूजांतंकुर्यात्।अथकलशोदकेनचा
र्योदंपत्योरभिषेकंकुर्यात्।आपोहिष्ठेतितिसृणांअंबरीषःसिंधुद्वीपआपोगायत्री।अभिकु
र्वानइतिद्वयोर्वामदेवइंद्रोगायत्री।अभिषेके०ओंकयानश्चित्रआभुवदूतीसदावृधःसखा।
कयाशचिष्ठयावृता।कस्त्वासत्योमदानांमंहिष्ठोमत्संदंधसः।दृढाचिदारुजेवसु।आनस्तु
तउपेतिपंचानांवामदेवइंद्रस्त्रिष्टुप्।अभिषेके०आनस्तुतउपवाजेभिरूतीइंद्रयाहिहरि
भिर्मदसानः।तिरश्चिदर्यःसवनापुरूण्यांगूषेभिर्गृणानःसत्यराधाः।आहिष्मायातिनर्यश्चि
कित्वापमानःसोतृभिरुपयज्ञं।स्वश्वोयोअभिरुर्मन्यमानःसुष्वाणेभिर्मदतिसंहवीरैः।श्रा
वयेदस्यकर्णावाजयध्यैजुष्टामनुप्रदिशंमंदयध्यै।उद्वावृषाणोराधसेतुविष्मान्करंन

Indira Gandhi National
Centre for the Arts

ऽऽः स्तुतीर्थामयं चात्र छायो गंतानाधमानस्तीऽछा वित्रं हवमानं गणं तो उपत्मन्निद्धानो धुर्या ऽग्र
स्सहस्रादिशता निबक्तवाहुः । त्वो तासोम धवं निंऽं विप्रावयं तेस्याम स्वरयो गणं तः । भेजा नासो
वृहद्दिवस्य रायआकाध्यस्य दावने पुरुभोः । मेषुणेति पंचानां वसिष्टो वरुणो गायत्रीः । अभि०
ऊँमो षुवरुणमन्मयं गृहं राजन्नहं गमं । मृला सुक्षत्र मृलय । यदेमि प्रस्फुरन्निव दृत्तिर्न ध्मातो
अद्रिवः । मृला० । क्रत्वः समह दीनता प्रतीपं जगमा शुचे । मृला० । अपां मध्ये तिस्थिवांसं तृष्णाविद
ज्जरितारं । मृला० । यत्किंचेदं वरुण दैव्ये जने भिद्रोहं मनुष्या ३ श्वरामसि । अचित्ती यत्तव धर्मा युयोपि
मामानस्तस्मादेनसो देव रीरिषः । इदमाप इत्यस्य सिंधुद्वीप आपोनुष्टुप् । अभि० । अपनः । शोशुच रा.प्र.:
दधमित्यस्य सूक्तस्य कुत्सोऽग्निर्गायत्री अभि० । अपनः स्वक्त । एवमभिषिक्तौ दंपती श्वेतवस्त्रवं १३०

दनं पुष्पैः सौवर्णभूषणैश्चालंकृत्य दर्भेषूपवेशयति । तत्र तौ उदङ्मुखौ तिष्ठतः । तत्समीपे
प्राङ्मुख आचार्यः स्थंडिलेग्निं प्रतिष्ठाप्येशान्यां ग्रहयज्ञोक्तकलशस्थापनांतं कृत्वान्वाधानं
कुर्यात् । चक्षुषी आज्येनेत्यंते अस्ति सप्तभिराज्याहुतिभिः । इदं सप्तभिः । वरुणं पंचभिः । अपए
कया । अग्निमष्टाभिराज्याभिराज्याहुतिभिः । अग्निं । सोमं । पवमानं । पावकं । मरुतो मरुतः । या
मं । अंतकं । मृत्युं च एकैकया च वीत्याहुत्या शेषेण स्यादिनात्रद्वी षट्त्रिंशद्वारं निर्वापप्रोक्षणे
यथान्वाधानमाज्याहुतिमुत्यागः । अग्नये स्वाहेत्यवदानसंपदाः । नवाहुतयः । यथालिंगं ।
त्यजनापि अग्न्याधानसमरुतो ध्येयाः । प्रयाजेषु मरुत्स्व इति त्यागे समिदाद्या त्मानानिकारु
क्तौ क्वाग्निध्यानवत् । तत० । स्विष्टकृदादि बलिदानांते पूर्णाहुतिः पूर्णपात्रनिनयनेग

Indira Gandhi National Centre for the Arts

यमलपारसुचिरा॥ कारकाय एकस्मिन्वत्सरे चैव आसन्नुमंडपे तथ॥ कर्तव्यं मंगलं सद्भिर्भ्रात्रोर्यमलजातयोः मंडपशुद्धेन मंडपप्रतिष्ठा विधयिता॥ तेन यमल पोरेकस्मिन्नुदिने विवाहे प्राप्ते नांदीश्राद्धं मंडपप्रतिष्ठा दितंत्रेणैकमेवनाप्यत्र कर्तव्यभेद इति दिक्॥ प्रयोगनिता मणौ॥

ह कलशेनाभिषेकमाचार्याय दक्षिणादानं स्थापितदेवताभ्यस्तां पूजादीप्रतिपादनं तं च कृत्वा ब्राह्मणभोजनं चित्वा स्वस्ति भवंतो ब्रुवंत्विति वाचयीत तेभ्यश्चाशिषो गृहीत्वा ईश्वरार्पणं कुर्यादिति॥ यमलशांतिः॥ अथ त्रिकशांतिः॥ शांतिसर्वस्वे॥ सुतत्रये सुतायेत्स्या त्त्रये वा सुतो यदि॥ माता पित्रोः कुलस्यापि तदा निष्टं महद्भवेत॥ ज्येष्ठनाशो धनेहानिर्दुःखं वा सुमहद्भवेत॥ जातस्यैकादशाहे वा द्वादशाहे शुभे दिने॥ आचार्यमृत्विजो वृत्वा ग्रहयज्ञपुरःसरं॥ ब्रह्मविष्णुमहेशेंद्रप्रतिमाः स्वर्णतः कृताः॥ पूजयेद्धान्यराशिस्थकलशोपरि शक्तितः॥ पंचमे कलशे रुद्रं पूजयेद्रुद्रसंख्यया॥ रुद्रसंख्यया चत्वारि सूक्तानि जपेदित्यन्व शांमः
यः॥ रुद्रसूक्तानि चत्वारि शांति सूक्तानि सर्वशः॥ आचार्यो जुहुयात्तत्र समिदाज्यतिलांनि जयेदि १३१

श्वरं॥ अष्टोत्तरसहस्रं वा त्रिशतं वा शतं तु वा॥ देवताभ्यश्चतुर्वक्त्रादिभ्यो ग्रहपुरःसरं॥ ब्रह्मा दिमंत्रैरिंद्रस्य यतइंद्र भयामहे॥ ततः स्विष्टकृतं हुत्वा बलिपूर्णाहुतिं ततः॥ अभिषेकं कुटुंबा स्य कृत्वाचार्यं प्रपूजयेत॥ हिरण्यं धेनुरेका च ऋत्विजां दक्षिणा ततः॥ आज्यस्यावेक्षणं कृत्वा॥ शांतिपाठं कारयेत॥ अथ प्रयोगः॥ एकादशे द्वादशे अन्यस्मिन्शुभे दिने॥ सभार्यो देशकालौ संकीर्त्य मम सुतत्रयजन्मानंतरं सुताजननसूचितसर्वारिष्टपरिहारद्वारा श्रीपरमेश्वरप्री त्यर्थं सग्रहमखां शांतिं करिष्य इति संकल्य निर्विघ्नतांतरे लद्दः कार्यः॥ तत्रो गणेशपूजनाद्याचार्यर्त्वि ग्वरणांतं कुर्यात॥ आचार्यो यद्वत्रेत्यादिरग्न्युत्तारणं च॥ ततः स्थंडिलपूर्वभागे ग्रहपूजां कलश पूजनांतं कृत्वा॥ तदुत्तरतदकसंस्थानं पंचकलशानां महीद्यौरित्यादिना यथाशक्तिधान्योप॥

Indira Gandhi National Centre for the Arts

रिस्थापितानोवपरियथाशक्तिदेमनिर्मिताः। ब्रलचिमहेशरुद्रप्रतिमांस्थापयित्वातासुदेवताः
प्रजयेत्। ब्रलजज्ञानंवामदेवोब्रल्लात्रिष्टुप्।इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री। तत्पुरुषाय।
हिरण्यगर्भोमहेशोगायत्री। यतइंद्रभयामहेइंद्रस्त्रिष्टुप्। कद्रुद्रायघोरःकण्वोरुद्रोगायत्री। प्रजांतेरु
द्रकलशंस्पृष्ट्वागायत्री। यतइंद्रभयामहेइंद्रस्त्रिष्टुप्। कद्रुद्रायघोरःकण्वोरुसीतामश्विनाभगः। स्वस्ति।
देव्यदितिरनर्वणःस्वस्तिपूषाअसुरोदधातुनः। स्वस्तिद्यावापृथिवीसुचेतना स्वस्तयेवायुमुप
ब्रवामहे। सोमंस्वस्तिभुवनस्यपस्पतिः। बृहस्पतिंसर्वगणंस्वस्तयेस्वस्तयआदित्यासोभवंतुनः। वि
श्वेदेवानोअद्यास्वस्तयेवैश्वानरोवसुरग्निःस्वस्तयेदेवाअवंत्वृभवःस्वस्तयेस्वस्तिनोरुद्रःपात्वंहसः राम:
स्वस्तिमित्रावरुणा स्वस्तिपथ्येरेवती। स्वस्तिनइंद्रश्चाग्निश्चस्वस्तिनोअदितेकृधि। स्वस्तिपंथामनु। १३२

पुनर्ददताघ्नताजानतासंगमेमहि। स्वस्त्ययनंतार्क्ष्यमरिष्टनेमिंमहद्भूतंवायसंदेवतानां। असुरघ्न
मिंद्रसखंसमत्सुबृहद्यशोनावमिवारुहेमा। अंहोमुचमांगिरसंगयंचस्वस्त्यात्रेयंमनसाचतार्क्ष्यं।।
प्रयतापाणिः। शरणंप्रपद्येस्वस्तिसंबादेष्वभयंनोअस्तु। आशुःशिशानोवृषभोनभीमोघनाघ
नःक्षोभणश्चर्षणीनां। संक्रंदनोनिमिषएकवीरःशतंसेनाअजयत्साकमिंद्रः। संक्रंदने
नानिमिषेणजिष्णुनायुत्कारेणदुश्च्यवनेनधृष्णुना। तदिंद्रेणजयततत्सहध्वंयुधोनरइषुह
स्तेनवृष्णा। सइषुहस्तैःसनिषंगिभिर्वशीसंस्रष्टासयुधइंद्रोगणेन। संसृष्टजित्सोमपाबाहुश
र्ध्युग्रधन्वाप्रतिहिताभिरस्ता। बृहस्पतेपरिदीयारथेनरक्षोहामित्राँअपबाधमानः। प्र
भंजन्सेनाःप्रमृणोयुधाजयन्नस्माकमेध्यविताराथानां। बलविज्ञायःस्थविरःप्रवीरःसहस्वान्

Indira Gandhi National Centre for the Arts

सहमानउग्रः अभीवीरोसत्वासहोजाजैत्रमिंद्ररथमातिष्ठगोवित्। गोत्रभिदंगोविदंवज्रबाहुं
जयंमज्मप्रमृणंतमोजसा। इमंसजाता अनुवीरयध्वमिंद्रंसखायो अनुसंरभध्वं। अभिगोत्राणि
सहसागाहमानोदयोवीरः शतमन्युरिंद्रः दुश्च्यवनः पृतनाषाडयुध्यो स्माकंसेनावतुप्रयुत्सु।
इंद्र आसांनेता बृहस्पतिर्दक्षिणायज्ञः पुरएतुसोमः। देवसेनानामभिभंजतीनांजयंतीनांमा
रुतोयंत्वग्रं। इंद्रस्यवृष्णोवरुणस्यराज्ञ आदित्यानांमरुतांशर्धउग्रं। महमनसांभुवनच्या
वानांघोषोदेवानांजयतामुदस्थात्। उद्धर्षयमघवन्नायुधान्युत्सत्वनांमामकानांमनां
सि। उद्वृत्रहन्वाजिनांवाजिनान्युद्रथानांजयतांयंतुघोषाः। अस्माकमिंद्रः समृतेषुध्वजेष्वस्मा रामः १३३
कंयाइषवस्ताजयंतु।। अस्माकंवीरा उत्तरेभवंत्वस्मां उदेवा अवताहवेषु। अमीषांचित्तंप्रती

लोभयंति। गृहाणांगान्यप्वेपरेहि। अभिप्रेहिनिर्दहहृत्सुशोकैरंधेनामित्रास्तमसासचंतां। प्रेता
जयतानरइंद्रोवःशर्मयच्छतु। नाधृष्यायथासथ। असौयासेनामरुतःपरेषामभ्येतिनओ
जसास्पर्द्धमाना। तांगूहततमसापव्रतेनयथामीषामन्यो अन्यंनजानात्। अंधा अमित्राभ
वताशीर्षाणाहयइवा। तेषांवोअग्निदग्धानामग्निमूढानामिंद्रोहंतुवरंवरं। मुंचामित्वाह
विषाजीवनायकमज्ञातयक्ष्मादुतराजयक्ष्मात्। ग्राहिर्जग्राहयदिवैतदेनंतस्याइंद्राग्नीप्र
मुमुक्तमेनं। यदिक्षितायुर्यदिवापरेतोयदिमृत्योरंतिकंनीतएव। तमाहरामिनिर्ऋतेरुपस्था
दस्पार्षमेनंशतशारदाय। सहस्राक्षेणशतशारदेनशतायुषाहविषाहार्षमेनं। शतंयथेमंशरदोन
यातींद्रोविश्वस्यदुरितस्यपारं। शतंजीवशरदोवर्धमानःशतंहेमंतांछतमुवसंतान्। शत

Indira Gandhi National Centre for the Arts

मिंद्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः ।। आहार्षं त्वाविदं त्वा पुनरागाः पुन
र्नवा सर्वैति चक्षुः सर्वमायुश्च ते विदं । त्यमूषु वाजिनं देवजूतं सहावानं तरुतारं रथानां । अ
रिष्टनेमिं पृतनाजमाशुं स्वस्तये तार्क्ष्यमिहाहुवेम । इंद्रस्येव रातिमाजोहुवानाः स्वस्तये नावमि
वारुहेम । उर्वी न पृथ्वी बहुले गभीरे मा वामेतौ मा परेतौ रिषाम । सद्यश्चिद्यः शवसा पंच कृष्टीः
सूर्य इव ज्योतिषापस्ततान । सहस्रसाः शतसा अस्य रंहिर्न स्मा वरंते युवतिं न शर्यां । महि त्री
णामवोस्तु द्युक्षं मित्रस्यार्यम्णः । दुराधर्षं वरुणस्य । नहि तेषाममा च न नाध्वसु वारणेषु । ईशे
रिपुरघशंसः । यस्मै पुत्रासो अदितेः प्रजीवसे मर्त्याय ज्योतिर्यच्छंत्यजस्रं । तद्वं योरावृणीम राम:
हे । सर्वारिष्टशांतिरस्तु । ततो नित्यप्रतिष्ठापनादिष्वन्वाधाने चक्षुषी आज्येनेत्यंते । प्रसिद्ध १३४

गृहपीठगतदेवतान्वाधानं कृत्वा आलयं विश्लुमदेशांगदेवं प्रत्येक चक्षुषी आज्येनेत्यंते
प्रसिद्धगृहपीठगतदेवतान्वाधानं कृत्वा असंभवे अष्टोत्तरत्रिशताहुतिभिः । अत्राप्यशक्तौ
अष्टोत्तरशताहुतिभिरिति वा । आज्यभागांते यथान्वाधानं त्यागः । ततः प्रधानहोमसुक्तमंत्रे
णाचार्यर्त्विक्कर्तृकग्रहहोमपुरःसरं कुर्यात् । प्रायश्चित्तहोमांते बलिः पूर्णाहुतिश्च । ततः प्रणीतावि
मोकसंस्राजपरिस्तरणविमोकांते पद्धूलज्ञादकेन सकुटुंबयजमानाभिषेकः समुद्रज्येष्ठा इ
त्यादिमंत्रैः । ततस्त्वाचार्याय सहिरण्यधेनुं दत्वा ऋत्विग्भ्यो यथाशक्ति दक्षिणादानं च कृत्वा स्था
पितदेवतानामुत्तरपूजनविसर्जनांते प्रतिमां आचार्यहस्ते प्रतिपाद्य कांस्यपात्रे रूपंरूपंप्रतिरू
पो बभूव तदस्य रूपं प्रतिचक्षणाय । इंद्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शतादश ॥

Indira Gandhi National Centre for the Arts

आज्यमेवस्य सदक्षिणं तद्दानं कृत्वा ब्राह्मणभोजनं यथाशक्ति संकल्प्य यथाशक्ति शांतिपाठं
कारयित्वा परमेश्वरार्पणं कुर्यात्॥ इति त्रिकशांतिः॥ अथ दंतजननशांतिः॥ अद्भुतसागरे पाद्मे॥
दंतजन्मनि सामान्यं शृणु स्नानमतः परं। भद्रासने निवेश्यैनं मूर्ध्नि मूलफलैस्तथा। सर्वौषधीः स
र्वबीजैः सर्वगंधैस्तथैव च॥ स्नापयेत्पूजयेच्चात्र वह्निहोमं समीरणं॥ पर्वतांश्च तथा ख्यातान्देवदे
वं च केशवं। एतेषामेव जुहुयात् घृतमग्नौ यथाविधि॥ ब्राह्मणानां च दातव्या यथाशक्त्या च दक्षिणे
ति॥ तत्रैव बृहस्पतिः॥ बालानामष्टमे मासि षष्ठे मासि ततः पुनः। दंता यस्य च जायंते माता वा
म्रियते पिता। बालकः पीड्यते तत्र स्वयमेव न संशयः। दधिक्षौद्रघृताक्तानामश्वत्थसमिधां ततः॥ हु ए म:
यात् पृष्ठशतं प्राज्ञः समंत्रेण तु मंत्रवित्॥ धेनुं च दक्षिणां दद्यात्ततः संपद्यते शुभमिति॥ विष्णुध १३५

र्मोत्तरे॥ दंतजन्मनि बालानां लक्षणं यत्तन्निबोध मे॥ उपरि प्रथमं यस्य जायंते च शिशोर्द्विजाः। दंते
सदैव यस्य स्याज्जन्ममासे भृगूत्तम। द्वितीये च तृतीये च चतुर्थे पंचमे तथा। यदा दंताश्च जायं
ते मासि चैव महद्भयं। पितरं मातरं वाथ खादेदात्मानमेव वा। तत्र शांतिं प्रवक्ष्यामि तां मे निगद
तः शृणु। गजपृष्ठगतं बालं नौस्थं वा स्नापयेद्द्विजः। तदभावे तु धर्मज्ञ कांचने तु वरानने सा।
र्वौषधैः सर्वगंधैर्बीजैः पुष्पैः फलैस्तथा॥ पंचगव्येन रत्नैश्च मृत्तिकाभिश्च राघव। स्था
ल्लीपाकेन धातारं पूजयेत्तदनंतरं। सप्ताहं चात्र कर्तव्यं तथा ब्राह्मणभोजनं। अष्टमे
ह्नि विप्राणां तथा देया च दक्षिणा। कांचनं राजतं गाश्च भुवं वा धनमेव च। अथ प्रयोगः।
अस्य शिशोः प्रथमम् ऊर्ध्वदंतजननसूचितारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं शांतिं करिष्ये

...dhi National Centre for the Arts

गणेशपूजनाद्याचार्यवरणांते। आचार्यो यदत्रेत्यादि अनुसारेणांतं कृत्वा होमदेशोत्तरभा
गे गजपृष्ठे नौकायां स्वर्णपीठे वा स्वस्तिकचर्मयोगेन भद्रासनं त्वकल्पितं वा वा तमुपवेश्य।
सर्वौषधसर्वगंधादिपुष्पं जलैः स्नापयित्वा होमदेशपूर्वभागे स्थापितकलशोपरि धातारं व
ह्निं सोमं वायुं पर्वतान् केशवं च षट्प्रतिमासु संपूज्याग्निं प्रतिष्ठाप्य ग्रहान् संपूज्यान्वाद
ध्यात्। अत्र प्रधानं ग्रहान्वाधानांते। धातारं सकृच्चरुणा तथा षाड्देवताः एकैकया आज्याहुत्या
प्रोक्षणेत्यादि धात्रे त्वा जुष्टं निर्वपामि प्राजापत्यामीति समंत्रं निर्वापप्रोक्षणे। प्रदानं दित्वा ग। शम:
होमांते धात्रे स्वाहा अवदानधर्मेण सकृदाहुतिः। ॐ वह्नये स्वाहा। सोमाय समीरणाय। १३६
पर्वतेभ्यः देवदेवाय केशवाय। इति षड्वेणाज्याहुतयः। यथालिंगं त्यागः चर्वाज्याभ्यां हि

---

ष्टकृद्बलिपूर्णाहुत्यंते कलशोदकेनाभिषेकः। यथाशक्त्याचार्याय दक्षिणादानांते हस्तिप्रतिमा प्रति
पादनं च भूमिदक्षिणा अन्येभ्यो यथाशक्ति दत्वा सहस्रं ब्राह्मणान् भोजयेत्॥ अष्टमे द्वितीय अपनु
सारेण कांचनादिदानं तेभ्यः कार्यं। दिनाष्टकं व्रतचर्यांते परमेश्वरार्पणं कुर्यात्॥ इति सदंतजनन
शांतिः॥ षष्ठे सप्तमे वा मासे दंतोत्पत्तौ तु देशे तु सारिसं कल्पपूर्वकं बृहस्पतेरेव मंत्रेण तत्पूजनवि
धिना पूजनं दधिमधुघृताक्तानां अश्वत्थसमिधां अष्टोत्तरशतं तन्मंत्रेण होमः। आज्येन स्विष्टकृ
दादि तत्कलशोदकेनाभिषेकः। आचार्याय धेनुं दद्याद् ब्राह्मणभोजनांते ईश्वरार्पणं कुर्यादिति ष
ष्ठाष्टमासदंतोत्पत्तिशांतिः। अष्टमादिषु मासेषु दंतजन्म शुभावहमिति ज्योतिर्निबंधवाक्ये तु अ
शुभसंज्ञानवकुविहितानवमादिग्रहणमिति चेन्नः। अथ प्रसववैकृतशांतिः॥ तत्र दुग्धगे॥

...dhi National
Centre for the Arts

यत्रगर्भविपर्यासो मनुष्याणां गवामपि। अद्भुतानि प्रसूयंते तत्र देशस्य विद्रवः। अत्रापि दिव्यजा शांति
:कार्या पंचदक्षिणा बुधैः। पंचशीर्षा प्राप्यतिशेषः पर्वणीत्यर्थः। मानुषामानुषाणां च गोत्रापि दिव्यजा शां
तिः कार्या पंचदक्षिणा बुधैः। पंचशीर्षा प्राप्यतिशेषः पर्वणीत्यर्थः। मानुषामानुषाणां च गोजाश्च मृगप
क्षिणां। जायंते जातमेदाश्च सदंता विकृतास्तथा। बहुशीर्षा अशीर्षा। शीर्षा बहुकर्णा अकर्णका
:। एकशृंगा द्वित्रिशृंगास्तथैव चतुरादिजाः। दीर्घकर्णा महाकर्णा गजकर्णाश्च मानवाः। मान
वाश्च यदा व्याघ्रा मार्जारास्तनुधारिणां। जायंते पुरुषा यत्र तत्र संग्राममादिशेत्॥ राजश्चष्टकु दम:
लेनाशो धनस्य च कुलस्य च। यमला तत्र जायंते नारीणां गजवाजिनां। ब्रह्मशांति ततः कुर्या १३७
देय्यत्र बलाघश्रासिता॥ अष्टोत्तरसहस्राणि चरुं वै जुहुयाद् घृतं। समिधां तु पलाशीनां तर्पे

येत्पूर्ववद् द्विजान्। दासीदाससमायुक्तं गोदानफलसंयुतं। कांचनं वृषभं दद्याद् द्विप्राय दक्षिणां
। अतिरा जायते जंतुर्द्वित्रिरास्त्रित्रिराश्चापि सयाद्भुतं विजानीयात्पूजयित्वा दिवाकरं। दध्या
ज्यमधुसंयुक्ताः समिधस्त्वर्कसंभवाः। पद्माजनः प्रस्तुतिभिर्जुहुयाद् घृतमेव च। धेनुं सुवर्णं व
स्त्रं च दद्याद्वात्रेसदक्षिणां सर्वे दोषा विनश्यंति ततः संपद्यते शुभं। मृगीजनयते सर्पान्मं
डूकां श्चाप्यमानुषान्। व्हहस्यत्पद्भुतमिदं तद्वारे संप्रपूजयेत्। औदुंबरस्य समिधो दधि
सर्पिः समन्विताः। दोषोपशमनार्थाय जुहुयान्नियमस्थितः। वस्त्रं सुवर्णं धेनुं च दद्या
द्विप्राय दक्षिणां। स्त्रीगर्भपातो यमलप्रसूयंते थवा स्त्रियः। सदंताश्चैव जायंते जातमात्र
हनंति चा बुधा द्भुतं विजानीयात्तद्वारे तत्प्रपूजयेत्। वस्त्रं गावः सुवर्णं च दद्याद्द्विप्राय द

Indira Gandhi National Centre for the Arts

क्षिणां॥ अद्भुतसागरे नारदः॥ भानौ सिंहे गते चैव यस्य गौः संप्रसूयते। मरणं तस्य निर्दिष्टं षड्भि
र्मासैर्न संशयः। तत्र शांतिं प्रवक्ष्यामि येन संपद्यते शुभं। प्रसूतां तत्क्षणादेव तां गां विप्राय दा
पयेत्। ततो होमं प्रकुर्वीत घृताक्तै राजसर्षपैः। आहुतीनां घृताक्तानामयुतं जुहुयात्ततः॥
होमो व्याहृतिभिः कार्यो नात्र का॰ अस्य वामस्य त्रयो धपत्रेति सूक्तेन तद्विष्णोरिति मंत्रतः।
सोपवासः प्रयत्नेन दद्याद्विप्राय दक्षिणां। वस्त्रयुग्मं नवं चैव सुवर्णं प्रतिपादयेत्॥ इष्टदे
वतमंत्रेण ततः शांतिर्भविष्यति॥ इति वैकृतप्रसवशांतिः॥ इति जननशांतयः समाप्ताः॥ अ
थ नामकरणं॥ तत्र कालः॥ तत्र नाम चास्मै दद्युरिति सूत्रव्याख्यावसरे वृत्तिकृतोक्तं नामकर
णस्याचार्येण कालानुक्तेर्जातकर्मानंतरं कार्यमित्यत्रैक इति॥ तथा च ज्योतिर्वसिष्ठः॥ ज

राम: १३८

न्माहे द्वादशाहे वा दशाहे वा विशेषतः। कुर्याद्वै नामकरणं कुमारस्येति वै श्रुतिरिति॥ याज्ञवल्क्य
ः॥ अहन्येकादशे नामेति॥ पारिजाते बृहस्पतिः॥ द्वाविंशे दशमे वापि जन्मतो दिवसे शुभे। षोडशे विंश
ते चैव द्वाविंशे वर्णतः क्रमादिति॥ षोडशैकोनविंशे द्वात्रिंशे वर्णतः क्रमादिति क्वचित्पाठः॥
कीदृशः क्रमादित्यपेक्षायामुक्तं संग्रहे॥ एकादशे द्विविप्राणां क्षत्रियाणां त्रयोदशे। वैश्यानां
षोडशे कार्यं मासांते त्वन्त्यजन्मन इति॥ आश्वलायनपरिशिष्टे नामैकादशे दिवसे शततरात्रे सं
वत्सरे वा यथोपपत्त्येके इति॥ नियतकाले मलमासगुरुशुक्रास्तयोर्दोषो न। तथा च पारिजाते बृ
हस्पतिः। यस्यां क्रियायां यः प्रोक्तः कालो मासदिनैरपि। तस्यां दोषो न मूढत्वं वक्रत्वं वा जीवशुक्र
योरिति॥ व्यतीपातादौ तु न कार्यं॥ पारिजाते गर्गः॥ व्यतीपाते च संक्रांतौ ग्रहणे वैधृतावपि। श्रा

...i National Centre for the Arts

र्त्तं विना शुभं नैव प्राप्तकालेपि मानवः। कुर्यादिति ज्योतिषे। तथान्त्रमासंक्रांति विष्णौ हि प्राप्तका
लेपि नाचरेदिति॥ पूर्वाह्णः श्रेष्ठः मध्यंदिनो मध्यमः। अपराह्णं रात्रिं च वर्जयेत्॥ नक्षत्रादीन्या
ह॥ मित्रादित्यमघोत्तराहस्तभिषक्स्वातीधनिष्ठाश्रुतप्राजेशाश्विनाश्चि कर्पौष्णदिनो
कृत्सुब्रुपसुराज्ञो। स्थिरे। रिक्तां पंचदशीं विहाय च नवमीमुद्दिष्टमेभागे वक्षाचार्यमतपादश्मा
गदिवसे नामानि कुर्यादिति ज्योतिः। भागदिवसे पंचांभाग्याख्यो ज्ञो दिवसाख्यवासरे चेति प्रत्ये
कमन्वयः। नामानीति बहुवचनमेकस्य त्रीणि वा बहूनि नामानीति ज्ञापनार्थं॥ प्रथममा
ह शंखः। कुलदेवतासमधं पितानाम कुर्यादिति॥ कुलपूज्या या देवता तत्संबद्धमित्य रामः
र्थः। द्वितीयमाह गार्ग्यः। मासनाम गुरोर्नाम दद्याद्बालस्य वै पिता। कृष्णोऽनंतोऽच्युतश्चक्री वैकुं १३९

ठोऽथ जनार्दनः। उपेंद्रो यज्ञपुरुषो वासुदेवस्तथा हरिः। योगीशः पुंडरीकाक्षो मासनामान्यनुक्र
मात्। अत्र मार्गशीर्षादिक्रमः। चैत्रादिमासनामानि वैकुंठोऽथ जनार्दनः। उपेंद्रो यज्ञपुरुषो वा
सुदेवस्तथा हरिः। योगीशः पुंडरीकाक्षः कृष्णोऽनंतोऽच्युतस्तथा। चक्रधारीति चैतानि क्रमा
दाहुर्मनीषिणः इति॥ मासाश्चात्र चांद्राः। तेष्वेव चैत्रादिशब्दानां मुख्यत्वात्। ते च शुक्ला
दिकृष्णांता एव। अमावास्यापरिच्छिन्नो मासः स्यात् इति स्मृति वचनात्॥ तृतीयमप्या
ह बोधायनः॥ नक्षत्रनामधेयेन द्वितीयं स्यान्नामधेयं गुह्यमस्यान्यान्यत् व्यावहारिकात्।
नक्षत्रनामधेयेनेति तत्तीयपात्तत्रजात इत्यधिकारे विहितं तद्धितमुच्यते। तानि च नामानि
। कृत्तिकां रोहिणः। मार्गशीर्षः। आर्द्रकः। पुनर्वसुः। तिष्यः। आश्लेषः। माघः। फाल्गुनः। हस्त

Indira Gandhi National Centre for the Arts

राफाल्गुनः। हस्तः। चित्रः। स्वातिः। विशाखः। अनुराधाः। ज्येष्ठः। मूलकः। पूर्वाषाढः। उत्तराषाढः॥
अभिजित्। अभिजितो वा। श्रवणः। श्रावणो वा। श्रविष्ठः। शतभिषजः। शतभिषक्। श
तभिषः इति वा। पूर्वप्रोष्ठपदः। उत्तराप्रोष्ठपदः। रैवतः। अश्वयुक्। आश्वयुजो वा। अ
पभरणः। आपभरणो वा। तैत्तिरीयेन श्रौतेषु कृत्तिकाद्यपभरण्यंतपाठात् कृत्तिकादिक्र
मः। अथवा चूचेचोला इत्यादि ज्योतिःशास्त्रोक्तचूडालादि वा नाम॥ अथवा। अग्निः प्रजा
पतिः सोमो रुद्रो दितिर्बृहस्पतिः। सर्पाश्च पितरश्चैव भगश्चैवार्यमापि च। सविता त्वाष्टाथ
वायुश्चेंद्राग्नी मित्र एव च। इंद्रो निर्ऋतिरापो विश्वेदेवास्तथैव च। विष्णुर्वसवो वरुणो ग.म:
अजैकपात्तथैव च। अहिर्बुध्न्यस्तथा पूषा अश्विनौ यम एव च। नक्षत्रदेवता एता ए १५०

ताभिर्यज्ञकर्मणि। यजमानस्य शास्त्रज्ञैर्नाम नक्षत्रजं स्मृतमिति॥ वचनात्। अग्निः प्रजा
पतिरिति वा। तृतीयनाम व्यवहारिकं चतुर्थमाह आश्वलायनः। घोषवदाद्यंतरंतस्थम
भिनिष्ठानांतं द्व्यक्षरं चतुरक्षरं वा षडक्षरं प्रतिष्ठाकामश्चतुरक्षरं ब्रह्मवर्चसकामो युग्मा
नि त्वेव पुंसाम् अयुग्मानि स्त्रीणाम् इति॥ वर्गाः पुकखचेत्यादि प्रथमद्वितीयभिन्नाः गघङजेत्
यादि पंचदश हकारश्चेत्येते घोषवतो हलः। तदन्यतरः आदिर्यस्य। अंतस्था यरलवा अं
तरा मध्ये यस्य। अभिनिष्ठानो विसर्जनीयोंते यस्य। अक्षरः स्वरः स च ऋलृभिन्नः। शर्मांतं ब्रा
ह्मणस्येत्यत्र कृत्वा तु रामशर्मा इति व्यवहारिकं नाम ज्ञेयं। अभिवादनीयं नाम उपांशु कर्त
व्यं तन्मातापितरौ विद्यातामोपनयनात्। नाक्षत्रं नाम अभिवादनीयं भवतीति दिक्। अ

प्रयोगः॥ तत्र गर्भाधानादिसंस्कारातिपत्तौ प्रमादान्नकरणे जातकर्मणः कालातिपत्तिनिमित्त
काज्यहोमपूर्वकं प्रत्येकं पादकृच्छ्रं बुद्धिपूर्वकाकरणे प्रत्येकमर्धकृच्छ्रं गोदानं तिलसहस्र
होमादीन्यतरप्रत्याम्नायेन कुर्यात्॥ आरभ्याधानमाचौलात्कालेतीते तु कर्मणां। व्याहृत्या
ज्यं सुसंस्कृत्य हुत्वा कर्म यथाक्रमं। एतेष्वेकैकलोपे पादकृच्छ्रं समाचरेत्। चूडाया अर्धकृ
च्छ्रं स्यादापदि त्वेवमीरितं। अनापदि तु सर्वत्र द्विगुणं द्विगुणं चरेत् इति भगवदुक्तेः। अग्नि
न्होमेया रिजाते पाकयज्ञतंत्रमुक्तं॥ केचित्तु आज्यं सुसंस्कृत्येति वचनादग्निस्थापनाज्यसं
स्कारयात्रसंमार्गो तिरिक्तं न कार्यमित्याहुः। प्रतिसंस्कारं ॐ भूर्भुवस्वः स्वाहेति एकैकामाहु रामः १५१
तिं जुहुयात्॥ अथ देशकालौ संकीर्त्य अस्य कुमारस्यायुरभिवृद्धिव्यवहारसिद्धिवीजगर्भ

समुद्भवैनोनिवर्हणार्थं नामकर्म करिष्ये इति संकल्प्य गणेशपूजनस्वस्तिवाचनादि कुर्यात्।
अमुकनाम्न स्वस्ति भवंतः ब्रुवंतु। विशेषः। नांदीश्राद्धांतं कृत्वाचारप्राप्तं नामदेवतापूजनं कुर्यात्। तत
दिल्के। तंडुलपूर्णे कांस्यपात्रे सुवर्णशलाकया श्रीगणेशाय नमः इति लिखित्वा कुलदेव
तानाम लिखेत् नृसिंहभक्त इत्यादि। ततो मासनाम कृष्ण इत्यादि ततो नाक्षत्रनाम कृ
त्तिकः। अथवा चूडाल इत्यादि। ततो व्यवहारिकं शिववर्मेति। ततो नामदेवताभ्यो नम इ
ति तेष्वेवाक्षरेषु नामदेवता आवाहयेत्। तदस्तु मित्रावरुणा तदग्ने शंयोरस्मभ्यमिदम
स्तु शस्तं। अशीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय॥ गृहा वै प्रतिष्ठा सूक्तं तत्प्रति
ष्ठिततमया वाचा शंस्तव्यं तस्माद्यद्यपि दूर इव पशूँल्लभते गृहानेवैनानाजिगमिषति गृहा

पक्षानां प्रतिष्ठा प्रतिष्ठा॥ नाममंत्रेण षोडशोपचारैः संपूज्य बालस्य दक्षिणकर्णे उपदिश्य तस्मात
दिवसाद्दशमाद्याः कुमारस्य नामास्य विदधाम्यहमिति प्रार्थितब्राह्मणैरनुज्ञातः श्रीगणपतयेनमः इ-
त्यस्य कुलदेवतानाम्ना श्रीनृसिंहभक्तो असि मासनाम्ना कृष्णोसि नक्षत्रेण नाम्ना कृत्तिकोसि
इ...पांशु वदेत्॥ ततो व्यावहारिकेण नाम्ना शिवशर्मासीति॥ तदस्तु • गृह्णावे • सुप्रतिष्ठि
तं नामास्त्विति प्रतिवदेयुर्ब्राह्मणाः। ततः कर्त्ता तिष्ठन् कुलदेवतानाम्ना नृसिंहभक्तोयं भवत
ः सर्वान् ब्राह्मणान् अभिवादयं ते आयुष्मान् भवतु नृसिंहभक्त इति ब्राह्मणा वदेयुः। एवं कर्त्ता मासना
म्ना कृष्णोयं भवतः ते चायुष्मान् कृष्ण इति। ततः कर्त्ता उपांशु नाक्षत्रेण नाम्ना कृत्तिकोयं भवतः आ रामः
युष्मान् भवतु ऊ नामेति वदेयुः। कर्त्ता व्यावहारिकेण नाम्ना शिवशर्मायं भवतः स • ते आयु • १४२

शिवशर्मा इति वदेयुः। तदस्तु • गृह्णावे • कृतस्य नामकर्मणः सांगता सिध्यर्थं दशब्राह्मणान्
भोजयिष्ये इति संकल्प्य ... प्रसंगी संकल्प्य ईश्वरार्पणं कुर्यादिति॥ स्त्रीनामकरणे तु अस्याः कु
मार्या इति संकल्पः। सर्वत्र नाम्नि स्त्रीप्रत्ययांतं नाम निर्दिश्य तत्। व्यावहारिकं तु अयुग्माक्षरेण
मिति सूत्रादयुग्माक्षरं नाम कर्तव्यं। अमंत्रकाः क्रियाः सर्वा इति॥ इति नामकरणं॥ अथ दो
लारोहणं प्रभविष्य। अभीष्टदिवसे पुण्ये चंद्रताराबलान्विते मध्ये ध्रुव क्षिप्र भेषु कुर्या
द्दोलाधिरोहणं ज्योतिर्निबंधे॥ आंदोलारोहणे पुंसो द्वादशो दिवसः शुभः। त्रयोदशस्तु कन्या
यां न तत्र विचारणा। अन्यस्मिन् दिवसे चेत्स्यात्तिथिमास्य प्रशस्यत इति। अन्यदिवसानाह पारिजा
ते बृहस्पतिः दोलारोहणं तु कर्तव्यो दशमे द्वादशेपि वा षोडशे दिवसे वापि द्वाविंशे दिवसेपि वेति।

Indira Gandhi National Centre for the Arts

द्वात्रिंशदितिक्वचित्पाठः। इति दोलारोहणं॥ दुग्धपानं॥ श्रीधरीये॥ एकत्रिंशे वासरे वा द्वितीये जन्म
र्दिवा शुभलग्ने नुकूले शंखक्षीरसलिलं दद्यात् लिभूनां वक्षे धात्रीपूज्य पूजां विधाय। शंखेऽमृत
सप्तमी तृतीया पार्थोन सिंहः पूर्वाह्णे थवा मध्याह्ने कुर्यात् रात्रिं विवर्जयेदिति॥ अथ चात्र प्रसू
तिका जलपूजनं॥ कवीज्यास्तचैत्राधिमासेनपौषे जलं पूजयेत्सूतिका सपुत्री बुधेन्द्वीज्यवारे प्र
रिक्ततिथौ हि श्रुतीज्यादितीदर्कनैर्ऋत्यमैत्रीरिति॥ इति जलपूजा॥ अथान्नप्राशनं॥ आश्वला
यनः॥ षष्ठे मास्यन्नप्राशनमिति॥ पारिजाते नारदः। जन्मतो मासि षष्ठे स्यात् सौरेणोत्तममान्य
दा तदभावेऽष्टमे मासे नवमे दशमेऽपि वा॥ द्वादशे वापि कुर्वीत प्रथमान्नप्राशनं परं। संवत्सरे राम: १४३
वा संपूर्णे केचिदिच्छंति पंडिताः इति। सौरमानेन षष्ठ इत्यन्वयः। न चायमेव नियमः। बालान्नभो

जनविधौ नुरू शुक्रमो द्वा बाल्पप्रयुक्तमशुभं त्वधिमासदोषः। नास्त्येव सावनविधा विह मासि षष्ठे
॥ युग्मे च मासि परतः शुभचंद्रपक्ष इति॥ तिथीनाह नारदः॥ द्वितीया च तृतीया च पंचमी सप्तमी त
था॥ त्रयोदशी च २ दशमी प्राशने तिथयः शुभाः। पंचपर्वसुरिक्तायां नंदायां माघभोजनं। बल
मायुर्यशो हंति सप्तम्यां चेति केचन। इंदुबुधशुक्रगुरुवासरे॥ नक्षत्राण्याह। पौष्णादितीं
दुहस्ताश्विचित्रास्तु वैष्णववासवाः। रोहिणी मैत्र तिष्याश्च वरुणश्चोत्तरात्रयं। श्रविष्ठा च शुभा ह्येते
प्राङ्शान्नाशने शुभा इति॥ एवं सूर्यावलोकनादीनामिन्नकाललोपे दशेऽपि क्लिष्टैरन्नप्राशनका
ले एव प्रायश्चित्तानुष्ठानात्। शौनकेन निष्क्रमणेन प्राशनकालोपदेशात्॥ सोऽकर्यात्सह प्रयोगोऽभि
धीयते॥ तत्रान्नप्राशनकालविरोधेन निष्क्रमणादिकालोपसंहारेण निर्णीतदिने कार्यं। अथ प्रयो

Indira Gandhi National Centre for the Arts

गः। भार्यया सह कृताभ्यंगस्नानो देशकालौ संकीर्त्य ममास्य कुमारस्यायुरभिवृद्धिद्वारा श्री॰ सूर्याव
लोकनं। आयुः श्रीवृद्धिवीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीप॰ निष्क्रमणं। आयुरभिवृद्धिद्वारा श्री
प॰ भूम्युपवेशनं। मातृगर्भमलप्राशनशुद्धि अन्नाद्यब्रह्मवर्चसतेजइंद्रियायुर्बललक्षणफ
लसिद्धिवीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्री॰ अन्नप्राशनं च करिष्य इति संकल्प्य। गणेश
पूजनादिनांदीश्राद्धांतं कृत्वा निष्क्रमणांगत्वेन इंद्रादिविंशतिदेवता उपवेशनांगत्वेन वरा
हं पृथिवीं सूर्यावलोकनादिके सेलकर्मांगत्वेन इष्टदेवतां च पूजयिष्य इति संकल्प्य त्रयोविं
शति पुत्तलिकासु धान्यपुंजेषु वा इंद्रायनमः इंद्रमावाहयामीति एवमिंद्रादिलोकपालान् रामः
प्राच्यै नमः प्राचीमावाहयामीत्येवं प्राच्याद्यष्टौ दिशः ब्रह्मायनमो अर्कायनमो वासुदेवा १५५

यनमो गगनायनमो वराह पृथिव्यै नमः इत्येतैर्मंत्रैः प्रणवादिरमुमावाहयामीति चेंद्रादिदेवताः
अमुष्मै नमो अमुमावाहयामीऽतीष्टदेवतां वा वाद्यघोषेण षोडशोपचारैः संपूज्य सूर्यावलोकनं कारयेत्॥
स्वस्तिनः स्वस्त्यात्रेयो विश्वेदेवास्त्रिष्टुप्॥ शिशुमारं कारोपणे विनियोगः ॐ स्वस्तिनो मिमीतामश्विना
भगः स्वस्तिदेव्यदितिरनर्वणः। स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतना। अंके
मारोप्य। आयुः शिशुमारज इति सूक्तस्य इंद्रोऽप्रतिरथ इंद्रस्त्रिष्टुप्॥ चतुर्थी बार्हस्पत्या त्रयोदशानुष्टुप् जप
पे॰ आयुः शिशुमारो हैं तु वरं वरं। तच्चक्षुर्वसिष्ठः सूर्यः पुरउष्णिक्॥ शिशोः सूर्यावेक्षणे विनियोगः। तच्च
क्षुर्देवहितं शुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतं॥ अथ निष्क्रमणं॥ पूजितदेवताप्रीत्य
र्थं ब्राह्मणान्भोजयित्वा ॐ कुमाराय स्वस्ति भवंतो ब्रुवंत्विति वाचयित्वा यथाशाखं स्थलं कृत्वा

Indira Gandhi National Centre for the Arts

लंधात्रामातुलेनवाहेनेवाउत्पमानंमंगलंवाघट्टोषेणकनिक्रददतिऋचौतिसूक्तद्वयंपठन्ज्ञातिभिः।
कनिक्रदज्जनुषंप्रब्रुवाणइयर्तिवाचमरितेवनावं।सुमंगलश्चशकुनेभवासियालाकाचिदभि
भाविश्वाविदत्॥मात्वाश्येनउद्वधीन्मासुपर्णोमात्वाविददिषुमान्वीरोअस्ता।पित्र्यामनुप्रदिशंक
निक्रदत्सुमंगलोभद्रवादीवदेह।अवक्रंददक्षिणतोगृहाणांसुमंगलोभद्रवादीशकुंतो।मान
स्तेनईशतमाघशंसोबृहद्वदेमविदथेसुवीराः।प्रदक्षिणिदभिगृणंतिकारवोवयोवदंत
ऋतुथाशकुंतयः।उभयावाचौवदतिसामगाइवगायत्रंचत्रैष्टुभंचानुराजति।उद्गातेवशकुनेसाम
गायसिब्रह्मपुत्रइवसवनेषुशंससि।वृषेववाजीशिशुमतीरपीत्यासर्वतोनःशकुनेभद्रमाव गम: १४५
दविश्वतोनःशकुनेपुण्यमावद॥आवदंस्त्वंशकुनेभद्रमावदतूष्णीमासीनःसुमतिंचिकिद्धि

नः।यदुत्पतन्वदसिकर्करिर्यथाबृहद्वदेमविदथेसुवीराः।सहस्रैववह्निनीलापुरोभागेब्राह्मणानां
दर्पेणकज्जलंवाकन्याघट्टमंगलानांसूर्याग्निचंद्रधेनूनांचयथासंभवंदर्शनंकारयित्वावह्निर्दक्षि
णचोक्षानेतिमुमुपर्वेत्पादेवताःप्रार्थयेत्।चंद्रार्कयोर्दिग्गजानांदिशांचगगनस्यच।निक्षेपार्थ
मिमंदद्मितेमंरक्षंतुसर्वदा।अप्रमत्तंप्रमत्तंवादिवारात्रावथापिवा।रक्षंतुसततंसर्वेदेवाःशक्रपुरो
गमाइति।करणस्येतिक्वचित्पाठः।दिशांचेत्यत्रअनुक्रमुचयार्थेचकारोच्चारणकालेवाबुद्धे
वंध्यायेत्तमितिमित्येकारश्छांदसः।ततोविष्णुदिवानिशिवादिष्टदेवालयानीलास्वगृहस्थदेव
तासमीपेवानीलादेवंसंपूज्यवालंप्रणमय्यप्रदक्षिणंचकारयित्वामातुलादिबंधुगृहंप्रापय्य
स्वगृहेवातमानीयमातुलादिनावस्त्रादिभिःपितृभ्यांसहवालेपूजितेस्वगृहेगोमयोपलिप्तेचतु

Indira Gandhi National Centre for the Arts

रक्षाविधानं रात्रीन्वविधास्यते प्रविष्टकालस्याङ्गिरासिमाले चविमूत्यालेपनेन रक्षां कुर्यात् । त्र्यंबकंय
सिष्टोरु ऐनुष्टुक्छंदो रक्षाकरणे विनि ॐ हौं जूं सः । त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं । उर्वारु
कमिव बंधनान्मृत्योर्मुक्षीय मामृतात् सः जूं हौं मिति मृतसंजीवनमंत्रेण । ततो गणेशं भूतेशं च
त्रिशुद्धहस्तेन सफलान्पात्राद्युपहारैस्तोषयित्वा ब्राह्मणैः सुवासिनीभिश्चाशिषो वाचयेत् । पत्न्या
योपवेशनं भीमानुकल्पगुरुद्विजन्मनः संप्रजप्य कृतंर्मणो आनंदे ३ उपलिप्त तंडुलपि
ष्टेन तंदुलैश्च कृतमंडलोपरि वाद्यघोषेण ब्राह्मणोक्तलेकेन ऊर्जाते वस्त्राकुने सामगायसी
त्यादिमंत्रेण च बालं पित्रादि रूपवेशयेत् । तस्य मंत्राः । रक्षैनं वसुधे देवि सदा सर्वगतं शुभे आयु
षः प्रमासकलं निक्षिप स्व हरिप्रिये आल्ला चिरादायुष्मत्स्य पंचकेचित्वा रियं धितः । जीविता

क
तमः
१४६



Indira Gandhi National Centre for the Arts